Kendriya Sanskrit Vidyapeetha Special Series—No. 1

VEDAKĀLĪNAJANATANTRASTHĀNĀNI

Kendriya Sanskrit Vidyapeetha Special Series—No. 1

VEDAKĀLĪNAJANATANTRASTHĀNĀNI

Bhawan's Sri Sankaracharya Sanskrit Mahavidyalaya • Bharatiya Vidya
588

By
AGNIHOTRAM RAMANUJA TATACHARYA
Vedaniketan, Kumbakonam

भारतीय विद्या भवन, नई दिल्ली-1
28-1-98

KENDRIYA SANSKRIT VIDYAPEETHA
TIRUPATI
1970

First Edition 1970

All Rights Reserved

Published by Dr. B. R. Sharma, Director, Kendriya Sanskrit Vidyapeetha, Tirupati, India,
Printed by M.L.J. Press Private Ltd., Madras-4.

केन्द्रीयसंस्कृतविद्यापीठविशिष्टग्रन्थमाला—१

वेदकालीनजनतन्त्रस्थानानि

श्री अग्निहोत्रं रामानुजताताचार्येण
लिखितम्

BVB Sri Sankaracharya Sanskrit Mahavidyalaya
588

केन्द्रीयसंस्कृतविद्यापीठम्
तिरुपति
१९७०

प्रथमं प्रकाशनम् १९७०
सर्वेऽधिकाराः स्वायत्तीकृताः

प्रकाशकः
डा. वे. रा. शर्मा
निदेशकः, केन्द्रीयसंस्कृतविद्यापीठम्, तिरुपति

मुद्रापकः
एम्. एल्. जे. प्रेस् (प्राइवेट्) लिमिटेड्
मद्रास्—४

PREFACE

In the *Mantra* and *Brāhmaṇā* portions of the Veda, are found abundant political data. While the terms, *Sabhā* and *Samiti* denote the popular Vedic Assemblies, others such as *Gaṇa*, *Sajāta* and *Jānarājya* reflect the democratic notions of Vedic India.

Although several writers like JAYASWAL, MUKERJI, GHOSAL—only to mention a few—have admitted that the Vedas contain a rich mine of political information, yet no single work is entirely dedicated to a critical study and examination of the Ancient Indian Polity embodied in Vedic texts.

An attempt is made in this book—*Vedakālīnajanatantrasthānāni*—to synchronise the Vedic conceptions of statecraft, associated with the three divisions of the Vedic society: *Brahma*, *Kṣatra* and *Viśa*. It is my firm conviction that the later Indian Ministerial Council can be traced to the Vedic concept of *Mahājanasabhā*.

It remains for me to thank the Government of India for the financial assistance given to me in carrying out my studies. Padmabhūṣaṇa, Dr. V. RAGHAVAN deserves my thanks for his useful suggestions. I owe a deep debt of gratitude to Dr. B. R. SHARMA, the Director of Kendriya Sanskrit Vidyapeetha, and the Vidyapeetha Society, Tirupati for kindly undertaking the publication of my work. Lastly I thank the staff of M. L. J. Press, Madras, who have seen this work through press with accuracy and skill.

PLACE : *Kumbakonam.* AGNIHOTRAM RAMANUJA TATACHRYA.

DATE : 21-1-70.

वेति विचारस्यावश्यकताऽप्यस्ति। कृत्स्नवेदपरिशीलनेनैवं निर्णयो जायते। वैदिकराज्यतन्त्रं प्रजाप्रधानमेव। तत्र राजा, प्रजानां अभिप्रायं निर्वोढुमागत इति। प्रजानां विभागो राज्यतन्त्रानुसारेण त्रिधा कृतः—ब्रह्म-क्षत्त्र-विश इति तेषां नाम। विशः प्रजाः ताः स्वसमुदायकार्यनिर्वाहाय क्षत्रतत्त्वं सृष्टवन्तः। क्षत्रमेव "पोलिटिकल् पवर्" इत्युच्यते। तादृशतत्त्वस्य प्रजाभ्य एवोत्पत्तिः। क्षत्त्रतत्त्वनिर्वाहार्थं राजाख्यं स्थानं सृष्टम्। यतः क्षत्त्रस्य प्रजाभ्यः उत्पत्तिः ततः सर्वदा राज्ञः प्रजानुवर्तित्वमावश्यकम्। प्रजाभिप्रायविरुद्धं कुर्वन् राजा स्वस्थानादेव भ्रष्टो भवति। यावत्प्रजानामभिप्रायानुकूल्यं न भवति, तावत् राजा अपरुद्धो भवति। प्रजाः स्वाभिप्रायाविष्करणार्थं सभासमित्यादिस्थानानि सृष्टवत्यः। तत्र साक्षाद्वा प्रतिनिधिद्वारा वा संभूय स्वसमुदायविषयं विवादपूर्वं निर्णीतवत्यः। ब्रह्माख्यं स्थानं वैदिकराज्यतन्त्रे असाधारणतया वर्तते; यस्य च विट्क्षत्त्रयो रक्षणं कार्यम्, अलौकिकमार्गेण लौकिकमार्गेण च। लौकिकमार्गानुसारेण विट्क्षत्त्रयोरुपदेशमुखेन रक्षणं करोति। देवताप्रार्थनादिद्वारा तत्तत्काले विट्क्षत्त्रयोः क्षेमार्थं कर्मकरणेन चालौकिकमार्गेणोपकरोति। ब्रह्मशक्तेः क्षत्रापेक्षयोत्कृष्टत्वात् क्षत्रशिक्षकत्वमप्यङ्गीकृतम्। क्षत्रशक्तिः विशां योगक्षेमार्थं कल्पिता; तादृशस्थानस्यावश्यकत्वात् विशः तादृशस्थानपरिपालने जागरूका दृश्यन्ते। तैरेव सृष्टं स्थानं ते पूजयन्ति, तस्मै नमन्ति च। राजाख्यस्थानस्य न स्वतः पूज्यत्वम्, परन्तु क्षत्त्रधर्माश्रयत्वेनैव। राजा च स्वकार्यनिर्वाहे साहाय्यं कर्तुं बहूनि स्थानानि सृष्टवान्। प्रजाभ्यः करमादायैव क्षत्त्रकार्यं राजा निर्वहति। वैदिकराज्यतन्त्रस्य प्रजाप्रधानत्वं बहुभिर्मन्त्रब्राह्मणवाक्यैः प्रकटीकृतम्। तत्र सजात-गण-गणपति इत्यादि-व्यवहारा ब्राह्मणेषु सुप्रसिद्धा वर्तन्ते। वैदिकराज्यतन्त्रे गणशः प्रजा विभक्ताः। सजाताख्यं स्थानमपि प्रजाभ्य एवोत्पन्नम्। सजातैरुपकृत एव राजा राज्यपरिपालनं करोति। सजातानुवृत्तिप्राप्त्यर्थं बहवो यागा विहिताः। वैदिकराज्यतन्त्ररीत्या तत्र तत्राधि-कारविभागः अधिकारिविशेषश्च प्रतिपादितः। गृहपति-कुलपति-विश्पति-ग्रामणी-दशपति-शतपति-पूर्पति-इत्यादिव्यवहाराः अधिकारिपुरुषनिर्देशपूर्वकमधिकारविभागञ्च सूचयन्ति। सर्वेषामेतादृशानामाधिकारिपुरुषाणामुपरि राजा भवति। एतादृशविभिन्नाधिकारस्थानसमुदायस्यैव राज्यमिति नाम। राज्यानि अनेकानि। तत्तद्राज्ये एकैको राजा वर्तते। कुत्रचित् द्वयोः त्रयाणां राज्यानां संमेलने एक एव राजा कल्पितः। साम्राज्यमिति अनेकेषां राज्यानां समाहारेऽस्ति व्यवहारः। आधुनिकैतिहासिकैः संराजः "अशोक"नाम्नः पूर्वं भारत-देशीयेतिहासे सम्राडेव नासीदिति वदन्ति। परन्तु इदं निर्मूलकमेव। वेदेषु "साम्राज्य"-तत्त्वमनेकेषु स्थलेषु प्रतिपादितम्। अनेके सम्राट्शब्दवाच्या राजान आसन्। "सम्राट्" इति अनेकेषां राज्ञां राज्यानां ... रि वर्तमानस्य राज्ञो नाम। "सार्वभौमा"ख्यं स्थानमपि दृश्यते। सागरान्त... ः सर्वस्या अपि स राजा। एवंविविधमेव

वैदिकं राज्यतन्त्रम् । यद्यप्यारम्भकाले तत्तज्जननाम्ना राज्यं राजानश्च प्रसिद्धाः, अथापि कालक्रमेणानेकविधजनसमुदायवासभूतदेशनाम्नापि राज्यं राजानश्च व्यवहृता दृश्यन्ते । एतादृशविषयनिरूपणार्थमेवात्रोद्यमः क्रियते । वैदिकराज्यतन्त्रविषये आधुनिकैः लिखिताः सर्वेऽपि ग्रन्थाः समालोचिताः । प्राचीनवेदभाष्याणि सर्वाण्यपि समालोचितानि । वैदिकराज्यतन्त्रस्य प्रजाप्रधानत्वमेवेति निरूपणमेवास्य ग्रन्थस्य मुख्योद्देशः । ग्राम-गण-सजातविषये निरूप्यमाणा अंशा अत्यन्तमपूर्वा एतावता कालेन न केनापि समालोचिता अत्र निरूप्यन्ते । निरूपणस्यापूर्वत्वात् विषयाणां सर्वमन्त्रब्राह्मणव्याप्तिप्रदर्शनार्थं एकस्मिन् विषय एव बहूनि प्रमाणानि प्रदर्शितानि ॥

॥ एतादृशोद्यमे प्रेरकाः ॥

विदितमेव सर्वेषां यत् भारतदेशीयकेन्द्र सर्कार्महाशयाः संस्कृतभाषाभिवृद्धये महान्तं प्रोत्साहं कुर्वन्ति इति । प्राचीनपद्धत्या ये विद्यां प्राप्तवन्तः तेषां प्रोत्साहनाय प्रतिमासं तात्कालिकं वेतनमपि दत्वा विषयविमर्शने प्रेरयन्ति तान् । केन्द्रसर्कार् विद्यामन्त्रिस्थाने संस्कृतभाषारक्षणार्थं काचन समितिः सञ्चालिता (Sanskrit Board) 'सेन्स्क्रट् बोर्ड" इति तस्या नाम । ते च विमर्शकनिर्णयं विमर्शनीयविषयनिर्णयं च कुर्वन्ति । तैरहं विमर्शकतया वृतः । "वेदकालीनजनतन्त्रस्थानानि" इत्ययं विषयश्च विमर्शनार्थं निर्णीतः । तेषामाज्ञानुसारेणास्मिन् विषये विमर्शं कृतवान् । उपकारकरणेम प्रोत्साहं कृतवतः केन्द्रसर्कार्स्थानस्य धन्यवादं प्रदर्शयामः । एतादृशविमर्शस्यावकाशदानेन संस्कृतभाषारक्षणं कृतवतां तेषां संस्कृतभाषाभिमानिनः सर्वथा अधमर्णा एव ॥

॥ विमर्शाध्यक्षस्य धन्यवादः ॥

केन्द्रसर्कारद्वारा नियुक्तेन मया मद्रप्रान्ते मद्रपुर्यां वर्तमानकुप्पुस्वामिशास्त्रि (Research Institute) रिसर्च इन्स्टिट्यूट् इत्यालये स्थाने विमर्शनं कृतम् ; यतोऽत्र बहवो ग्रन्था वेदग्रन्थाः संस्कृत-आङ्ग्लभाषामयाश्च अन्ये ग्रन्था विमर्शनोपकारका वर्तन्ते । अत्रापि पद्मभूषणं-डाक्टर्-वे. राघवन् एम् . ए. महाशयानामाध्यक्ष्य इदं विमर्शनं कृतम् । इमे हि सर्वलोकविदिताः सुप्रसिद्धाः संस्कृतभाषाविमर्शका विद्वांसः । ते हि विषयसंकलनकाले विषयशोधनकाले ग्रन्थनिर्माणकाले च तदा तदा मार्गदर्शनेन समालोचनदानेन च बहूपकृतवन्तः; येषां समालोचनाद्दतेऽस्यग्रन्थस्योत्ण[illegible] भवेत् ; तेषां डाक्टर् राघवन् महाशयानां सप्रश्रयां कृतज्ञतामावेदयामः ॥

॥ अत्र समालोचिता ग्रन्थाः ॥

1 ऋक्संहिता ॥
2 अथर्वसंहिता ॥
3 सामसंहिता ॥
4 तैत्तिरीयकृष्णयजुःसंहिता ॥
5 अथर्ववेदीयशौनकसंहिता पैप्पलादसंहिता च ॥
6 कठसंहिता ॥
7 कापिष्ठलकठसंहिता ॥
8 मैत्रायणीसंहिता ॥
9 तैत्तिरीयब्राह्मणम् ॥
10 ऐतरेयब्राह्मणम् ॥
11 शांखायनब्राह्मणम् ॥
12 ऐतरेयारण्यकम् ॥
13 शांखायनारण्यकम् ॥
14 पञ्चविंशब्राह्मणम् ॥
15 षड्विंशब्राह्मणम् ॥
16 जैमिनीयब्राह्मणम् ॥
17 छान्दोग्योपनिषत् ॥
18 मुण्डकोपनिषत् ॥
19 बृहदारण्यकोपनिषत् ॥
20 तैत्तिरीयारण्यकम् ॥
21 गोपथब्राह्मणम् ॥
22 शतपथब्राह्मणम् ॥
23 आपस्तम्बकल्पसूत्रम् ॥
24 सत्याषाढश्रौतसूत्रम् ॥
25 बोधायनश्रौतसूत्रम् ॥
26 शांखायनश्रौतसूत्रम् ॥

27 जैमिनीयमीमांसासूत्रम् ॥
28 पाणिनिव्याकरणसूत्रम् ॥
29 व्यासब्रह्मसूत्रम् ॥
30 आश्वलायनगृह्यसूत्रम् ॥
31 मनुस्मृतिः ॥
32 कौशिकगृह्यसूत्रम् ॥
33 याज्ञवल्क्यस्मृतिः ॥
34 कात्यायनस्मृतिः ॥
35 वीरमित्रोदयम् ॥
36 यास्कनिरुक्तम् ॥
37 सर्वस्यापि वेदभागस्य भाष्यम् ॥

[अन्ये इमे आङ्ग्लभाषामया ग्रन्थाः]

1. A History of Ancient Sanskrit literature by MaxMuller.
2. A History of Indian Literature by Weber.
3. History of Sanskrit Literature by A. A. Mac donnel.
4. History of Sanskrit Literature by Winternitz.
5. Original Sanskrit text, 5 Vols. by Muir.
6. Vedic India by Ragozin.
7. Life in Ancient India by Adolf Kaegi.
8. Civilization of Ancient India by Renou.
9. Social life in Ancient India by Chakladar.
10. Buddhist India by Rhys Davids.
11. India—Vedic and Post Vedic by Wheeler.
12. Hindu Public Life (in Ancient India) by U.N. Goshal.
13. Local Government in Ancient India by R. K. Mukerjee.
14. Corporated Life in Ancient India by R. C. Majumdar.
15. Ṛg Vedic Culture by A. C. Dass.
16. Ṛg Vedic India ,, ,,
17. Index of Vedic names and subjects by A. A. Mac donnel and A. B. Keith.
18. Religion and Philosophy of Atharva Veda by Shende.
19. Development of Indian Polity by Bandopādhyāya.
20. State and Government in Ancient India by Altekar.
21. Ancient India by Roy Choudhry.
22. Aspects of Political ideas and Institutions in Ancient India by Sharma.

॥ वेदाः राज्यतन्त्रं च ॥

असकृच्च इदमाघुष्यते अधुनातनैः ऐतिहासिकपद्धतिमनुसरद्भिः, यत् जनतन्त्र तत्त्वस्योत्पत्तिः ग्रीक्देश एव समभूत् तत्प्रारम्पर्यं च पाश्चात्यदेश एव वरीवर्ति । अधुनाऽपि जनतन्त्रस्थानानि "पार्लिमन्ट्"शब्दवाच्यानि तत्रैव वर्तन्त इति । एतादृशस्य सिद्धान्त-स्यानुकूलतया बहवो ग्रन्था वृत्तान्ताश्च तैरुदाहृताः । परन्त्विदमत्र समालोचनीयं भवति । अस्मद्देशे वर्तमाना वेदग्रन्थाः ग्रीक्देशग्रन्थेभ्यः तद्देशीयेतिहासवृत्तान्तेभ्यश्च पुरातनाः । अतश्च तादृशपुरातनवेदग्रन्थेषु जनतन्त्रस्थानानमुल्लेखः वर्णनं च वर्तते वा न वेति ॥

समग्रवेदग्रन्थपरिशीलनेनेदमत्र ज्ञायते—ग्रीक्देशवृत्तान्तेभ्यः पूर्वमपि जनतन्त्रतत्त्वस्य प्रतिपादनं वेदेषु वर्तते । न केवलं तेषां उल्लेखमात्रम्; अपि तु तेषां तादृशस्थानानां परिस्थितिः वर्णनं च बहुषु स्थलेषु क्रियते इति । किञ्च न केवलं जनतन्त्रस्थानस्य परिस्थितिमात्रं, अपि तु राज्यतन्त्रमूलभूता अन्ये बहवोंऽशा अमूर्ताः सर्वकालसाधारणा अपि तत्र वेदेषु प्रतिपाद्यन्ते । एतादृशाभिप्रायप्रकाशनार्थमत्र प्रयत्नः क्रियते ॥

अस्य प्रबन्धस्योद्देशः वेदेषु कीदृशं राज्यतन्त्रं प्रतिपाद्यते तत्र जनानां कीदृशं स्थानं वर्तत इति च प्रतिपादनमेव ॥

श्री शङ्कराचार्य संस्कृत महाविद्यालय ... भारतीय विद्या भवन, नई दिल्ली

॥ वेदाः ॥

वेदशब्देन प्रतिपादिताः केचन ग्रन्थाः भारतदेशे वर्तन्ते । एतादृशानां ग्रन्थानां वेदनाम्ना प्रतिपादनं न अधुनातनम् । तैत्तिरीयशाखान्तर्गतब्राह्मणभागे काठकं इति प्रसिद्धे स्थले "वेदैरशून्यः त्रिभिरेति सूर्यः" इति वेदानां प्रतिपादनं सर्ववेदसाधारणतया वर्तते । तथा "यजुर्वेदं क्षत्रियस्याहुर्योनिम् । सामवेदो ब्राह्मणानां प्रसूतिः" इति यजुर्वेदसामवेद-व्यवहारो वर्तते । "वेदा वा एते । अनन्ता वै वेदाः ॥ तै. ब्रा. 3. 10. 11.) इति भारद्वाजोपाख्यानेऽपि वेदशब्दो ग्रन्थविशेषे प्रयुक्तः । अथर्ववेदेऽपि वेदशब्द उल्लिखितः, उपनिषत्सु च (मुण्ड. उप. 1. 1. 5.) । तथा ऋचां साम्नां यजुषामुल्लेखः तत्र तत्र कृतः । सुप्रसिद्धे पुरुषसूक्ते "ऋचः सामानि जज्ञिरे । यजुस्तस्मादजायत" इत्युच्यते । तथाऽन्यत्र "ऋचः सामानि यजूंषि । सा हि श्रीरमृता सताम्" इति ऋग्यजुःसाम्नां प्रस्तावो वर्तते । परन्तु वेदशब्देन प्रतिपाद्यमानो ग्रन्थः कः? इति संप्रदायेनैव निर्णीयते । तथा ऋग्यजुः सन्नामार्थोऽपि सम्प्रदायाधिगम्य एव । कल्पसूत्रकाराः तथा मीमांसासूत्रकाराश्च ऋग्यजुः-सामशब्दानां वेदशब्दस्य चार्थनिर्णयं कृतवन्तः । आपस्तम्बसत्याषाढादयः "मन्त्रब्राह्मणयोः वेदनामधेयम् इति" मन्त्रब्राह्मणभागात्मकत्वं वेदस्य प्रतिपादयन्ति । तथा भगवान् जैमिनिः (जै. सू. 2-1-35-36) "तेषाम् ऋक् यत्रार्थवशेन पादव्यवस्था" "गीतिषु समाख्या" इति, "शेषे यजुःशब्द इति ऋङ्मन्त्राणां यजुर्मन्त्राणां च स्वरूपं निरणैषीत् । मन्त्रभागवत् ब्राह्मणभागस्यापि वेदभागत्वमङ्गीकृत्य तत्स्वरूपमपि सूत्रकारा वर्णयन्ति । "तच्चोदकेषु मन्त्राख्या" "शेषे ब्राह्मणशब्दः" (जै. सू. 2. 1-32-33)कर्मचोदनानि ब्राह्मणानि । ब्राह्मण-शेषोऽर्थवादः । निन्दाप्रशंसापरकृतिः पुराकल्पश्च । "अतोऽन्ये मन्त्राः" (आपस्तम्ब-परिभाषासूत्रम. 1. 34. 35. 36. 37) ॥

विधिः बहुविधः । अर्थवादश्च ब्राह्मणशब्दप्रतिपाद्य इति महर्षीणामाशयः । शेषे ब्राह्मणशब्द इति आपस्तम्बो वदति । ब्राह्मणशब्देन विधीनामेव संग्रहणं क्रियत इति अन्यः आशयो दरीदृश्यते । विधिव्यतिरिक्तानां ब्राह्मणभागानामर्थवादनाम्ना व्यवहारोऽपि वर्तते । एतादृशवेदान्तर्गतव्यवहारैरेवंनिर्णयः सम्पद्यते । वेद इति कश्चन ग्रन्थः । स च मन्त्रब्राह्मणात्मकः । तत्र मन्त्राः त्रिविधाः, ऋङ्मन्त्राः, यजुर्मन्त्राः साममन्त्राः इति । अथर्ववेदस्थमन्त्राणामपि एतादृशमन्त्रेष्वेवान्तर्भावात्, न पार्थक्येन व्यवहारः । ब्राह्मणभागे कर्मणां तदङ्गानां विधिः वर्तते । बहुविधेतिहासोदाहरणद्वारा विहितानि प्रशस्यन्ते निषिद्धानि निन्द्यन्ते इति ।

॥ ब्राह्मणग्रन्थाः ॥

ब्राह्मणशब्दवाच्या ग्रन्था मन्त्रभागेन समं सर्वत्र वर्तन्ते। तत्तद्वेदेषु यथा मन्त्रभागा वर्तन्ते तथा ब्राह्मणभागा अपि। प्रायो ब्राह्मणभागानां विधिप्रधानता वर्तते। तथा विहितानां कर्मणां प्रशंसा वा निन्दा वा विवरणं वा वर्तते। एतादृशग्रन्थानां ब्राह्मण इति व्यवहारः कथमुत्पन्न इति नास्माभिर्ज्ञायते। ब्राह्मणैः कृतत्वाद् ब्राह्मणमिति केचिद्वर्णयन्ति। न वयं तदङ्गीकुर्मः। ब्राह्मणैरेव कृतमित्यत्र प्रमाणाभावात्; क्षत्रियसम्बन्धिव्यवहाराणां दर्शनाच्च। किञ्च ब्रह्मशब्दस्य बहुत्र मन्त्रेषु प्रयोगात् ब्राह्मणशब्दस्य मन्त्रविवरणात्मकत्वाङ्गीकारे न कमपि दोषं पश्यामः। ब्राह्मणभागानां मन्त्रमूलत्वं मुण्डकोपनिषदा मुखान्तरेणाङ्गीकृतञ्च। "मन्त्रेषु कर्माणि कवयो यान्यपश्यन्" इति हि उपनिषद् वदति। अनेन ज्ञायते मन्त्रेभ्य एव कर्मतत्त्वानामुद्धरणं कृतमिति। अतः कर्मतत्त्वप्रतिपादकत्वं ब्राह्मणभागस्य सुनिश्चितं भवति। ब्राह्मणशब्दस्य यः को वाऽर्थो भवतु, "इति हि ब्राह्मणम्" "इत्युक्तं ब्राह्मणम्" इति व्यवहारः वेदेष्वेव दृश्यते। अतः ब्राह्मणशब्दवाच्यानां ग्रन्थानामपि वेदत्वेनाङ्गीकारः कर्तव्यो भवति॥

॥ अन्ये व्यवहाराः ॥

मन्त्रब्राह्मणयोरेव नामान्तरं व्यवहारान्तरं च वर्तते–संहिता, उपनिषद्, आरण्यकम्–इत्यादिकम्। तत्र च संहिताशब्दो मन्त्रसमुदाय एव दृष्टः। बहूनां मन्त्राणां सङ्कलनात्मके ग्रन्थे संहिताशब्दो रूढो वर्तते। ऋक्संहिता, यजुःसंहिता, सामसंहिता, अथर्वसंहिता चेति। कृष्णयजुःसंहितासु ब्राह्मणभागा अपि संहिताभागे दृश्यन्ते। अतश्च संहिताशब्दस्य मन्त्रमात्रपरत्वं कृष्णयजुःसंहिताव्यतिरिक्तविषयमेव। ब्राह्मणेषु च आरण्यकम् उपनिषत् इति केषाञ्चिद् भागानां नाम कृतम्। अरण्ये अध्येयत्वात् आरण्यकं इति नाम दृश्यते। तथा जीवब्रह्मतत्संबन्धितदुपासकप्रतिपादकानां ब्राह्मणभागानाम् उपनिषच्छब्देन व्यवहारो दृश्यते। उपनिषद्भागा अपि वेदान्तर्गता वेदा एव। अनेनैतत्परास्तम्, यत् पाश्चात्यैः आधुनिकैः अस्मद्देशीयैश्च अङ्गीकृतमुपनिषद्भागानां वेदभिन्नत्वं वेदादर्वाचीनत्वञ्च। सूक्तव्यवहारः ऋङ्मन्त्रेषु वर्तते। एकदेवताप्रतिपादिकानाम् एकाभिप्रायवतीनां ऋचां समुदाये प्रायः सूक्तव्यवहारः समजनि। अनुवाकमण्डलादिनामानि अध्येतृसौकर्यार्थत्वेन कल्पितानि॥

॥ आधुनिकानां अभिप्रायः ॥

एतादृशवेदग्रन्थस्य अपौरुषेयत्वं वैदिकमतानुसारिभिः अङ्गीकृतम् । वेदेष्वेव केषुचित्स्थलेषु वेदानां नित्यत्वं प्रतिपादितम् ॥

वेदमूलेषु ततोऽर्वाचीनेषु ग्रन्थेषु च वेदानामनादित्वं प्रतिपादितम् । केषुचित्स्थलेषु ईश्वरवद्वेदानामनादित्वं प्रतिपादितम् । अनादिनिधना ह्येषा वागुत्सृष्टा स्वयंभुवा । आदौ वेदमयी, अग्नेः ऋग्वेदः आदित्यात् सामवेदः वायोर्यजुर्वेद इति (छा. उ.) भगवान् जैमिनिः बादरायणश्च स्वस्वसूत्रेषु वेदानामपौरुषेयत्वमेव स्थापितवन्तौ । अतश्च वेदानामपौरुषेयत्वमेव सिद्धम । परं त्वाधुनिकाश्चरित्रविमर्शका इदं नानुमन्यन्ते । जनानामितिहासप्रतिपादकशास्त्रानुसारेण भूतत्त्वप्रतिपादकशास्त्रानुसारेण भाषातत्त्वप्रतिपादकशास्त्रानुसारेण च तत्र तत्रोपलभ्यमानचरित्रसम्बन्धिलेखानामनुसारेण च वेदानां कस्मिंश्चित्काले उत्पत्तिरासीदित्यभिप्रयन्ति ॥

किञ्च वेदेष्वेव राज्ञां महर्षीणां स्थलविशेषाणां च प्रतिपादनस्य सत्त्वात् वेदानां चरित्रकालीनत्वमेव तेऽभिप्रयन्ति । तद्रीत्या प्रथमम् ऋङ्मन्त्रा उत्पन्नाः, ततः साममन्त्राः, ततः कर्मप्रधाना यजुर्मन्त्राः, ततः शान्तिकपौष्टिककर्मप्रतिपादका अथर्वमन्त्राश्च । (History of Sanskrit Literature by A. A. Macdonell) ब्राह्मणभागा मन्त्रभागेभ्योऽर्वाचीनाः । उपनिषदः ततोऽर्वाचीनाः । ऋङ्मन्त्रा अपि एकस्मिन् काले नोत्पादिताः, परं तु बहुषु शतकेषूत्पादिताः । तथा इदानीं वर्तमानायां ऋक्संहितायां केचन मन्त्राः अत्यन्तं प्राचीनाः । ततः परं बहोः कालात् समुत्पन्ना मन्त्रा अपि अत्रान्तर्भाविताः । तथा ऋग्वेदकाले ऋग्वेदीयमन्त्रैर्भगवन्तं प्रार्थितवन्तः । लघूनि कर्माण्येव तैस्तदा तदा कृतानि । यजुर्वेदकाल एवातिविस्तृततया कर्माणि प्रवृत्तानि । उपनिषत्सु च कर्मतत्त्वस्य स्थाने उपासनातत्त्वप्रतिपादनं च कृतमिति ते वर्णयन्ति । एवं वेद इति एकस्मिन्नेव काले नैकोऽपि ग्रन्थ आसीत् । परं तु बहुषु शतकेषु उत्पादितानां मन्त्राणां ब्राह्मणानां च वेद इति नाम सञ्जातमिति ते अभिप्रयन्ति । प्रमाणयन्ति च वेदेष्वेव दृश्यमानं भेदम. सामुदायिकराजकीयार्थिकव्यवहारेषु परिणामः क्रमशः सञ्जात इति तेषामाशयः । परिणामवादानुसारेण वेदेषु दृश्यमाना भावाः क्रमशः परिणता इति च ते वर्णयन्ति ॥

यद्यपि वेदकालनिर्णये पाश्चात्येषु किञ्चिदिव अभिप्रायभेदो वर्तते, परं तु वेदस्य पौरुषेयत्वे सर्वेऽपि एकाभिप्रायवन्त एव । यद्यपि पौरुषेयत्वं वेदमतानुसारिभिः अस्माभिर्नाङ्गी-

कृतम्, परन्तु वेदे वर्तमानानामितिहासानां तदुल्लिखितानां नामधेयानां च सत्यत्वम् इतिहाससम्बन्धश्च भगवता बादरायणेनाङ्गीकृतो दृश्यते। वेदस्य नित्यत्वं प्रतिपादयन् भगवान् बादरायणो वेदे दृश्यमानवृत्तान्तानां सत्यत्वमङ्गीकुर्वन् प्रतिकल्पमेतादृशवृत्तान्ता भवन्ति इति प्रतिपादयति। अत्र "समाननामरूपत्वाच्चावृत्तावप्यविरोधः" इति सूत्रमेकमेवालं बादरायणाभिप्रायनिर्णयाय। यतः, अत्र सूत्रकारः वैदिकानां वृत्तान्तानां सत्यत्वं प्रतिकल्पं भावित्वं च प्रतिपादयति, अत एव भगवद्बादरायणमतेनापि चरित्रसंबन्धिवृत्तान्तप्रतिपादनं वेदेषु दृश्यत इति सुदृढं निश्चीयते॥ परंतु जैमिनीयमतानुसारेण वेदेषु दृश्यमाना इतिहासा न सत्याः। सर्वेऽपि अर्थवादा एव। वस्तुतस्तु वैदिकमतानुसारिणः स्वमतग्रन्थस्य प्रशस्तत्वं वक्तुमेव वेदस्यापौरुषेयत्वं प्रतिपादयन्ति। अप्राकृतशक्तिमत्त्वाङ्गीकारो हि मतवादिनां सिद्धान्तः। क्रिस्तुमतानुसारिणः क्रिस्तुशब्दवाच्यस्य पुरुषस्यामानुषत्वमङ्गीकुर्वन्ति। तथा बौद्धमुहम्मदीयमतानुसारिणः स्वमतस्थापकानाममानुषत्वं प्रतिपादयन्ति। तथा वैदिकमतानुसारिणः पुरुषस्थाने ग्रन्थमङ्गीकृत्य तस्याप्राकृतत्वं वर्णयन्ति। ऐतिहासिकाः परं चरित्रमूलकविमर्शं कुर्वन्ति। न तयोः ऐकमत्यस्यावसरः। न चरित्रकर्तारो ग्रन्थस्य पुरुषस्य वाऽप्राकृतत्वप्रतिपादने निर्भराः। अतश्च तैः साकं मतवादिनां विवादस्य प्रसक्तिरेव नास्ति। यः को वा अभिप्रायो भवतु, चरित्ररीत्यापि ग्रीकूदेशपरिस्थितेः पूर्वमेव वेदा आसन् इति सर्वैरङ्गीकृतम्। ईजिप्ट्, बाबुलेनियादेशे भूतपूर्वग्रन्थापेक्षया वेदस्यार्वाचीनत्वं तेऽभिप्रयन्ति। ईजिप्ट्बाबुलेनियादेशे ग्रन्था आसन् वा न वेति, कीदृशा ग्रन्थाः ते इत्यत्र च न निश्चायकं प्रमाणमस्ति। तत्र तत्र शिलालेखेभ्य एव केचन मन्त्राः तैरुद्धृताः। अत इदानीं दृश्यमानलोकग्रन्थेषु वेदाः पूर्वतना इत्यत्र न अभिप्रायभेदः कस्यापि। यद्यपि अपौरुषेयत्वं वेदानामङ्गीकृतं वैदिकमतानुसारिभिः, तथापि मन्त्रकारसूक्तकारसंहिताकारादिव्यवहारो वेदानन्तरभविषु प्राचीनतमेषु ग्रन्थेषु उपलभ्यते। एतादृशा व्यवहारा मन्त्रेषु कश्चन कर्तारमभ्युपगम्य प्रवृत्ता इव दृश्यन्ते। परं तु वैदिकमतानुसारिभिः एतादृशेषु वाक्येषु दृश्यमानकर्तृत्वं द्रष्टृपरत्वेन व्याख्यातम्। मन्वादिस्मृतिषु वेदानांमनादित्वं सुस्पष्टतया प्रतिपादितम्। "युगान्तेऽन्तर्हितान् वेदान् सेतिहासान् महर्षयः। लेभिरे तपसा पूर्वमनुज्ञाताः स्वयंभुवा" इत्येतादृशवाक्यानि स्मृतिषु बहुषु स्थलेषु उपलभ्यन्ते। अतश्च वेदानां लोकग्रन्थेषु प्राचीनतमत्वं निर्बाधम्। वेदव्यासस्य कालात् पूर्वं मन्त्रब्राह्मणात्मको वेदभागः तत्तदाश्रमेषु तत्तद्देशेषु तत्तद्ग्रन्थेषु च गूढ एवासीदिति विज्ञायते। केचन महर्षयः तत्र तत्र वर्तमानानां मन्त्राणां ब्राह्मणानां च संकलनं कृतवन्तः। मन्त्रब्राह्मणानाम् ऋग्यजुस्सामाथर्वात्मना विभागश्च व्यासेन कृतः। ततः परमेव बहूनां महर्षीणां नाम्ना वेदसंहिता ब्राह्मणभागाश्च प्रवर्तिताः। इदमत्र

ज्ञातव्यम्—यथा वा मन्त्रेषु कर्तॄणां स्मरणं सुस्पष्टं दृश्यते नैवं ब्राह्मणेषु । अतश्च तत्र ब्राह्मणानां कर्तारः के इति सुस्पष्टं न ज्ञायते । किं च मन्त्रभागेषु दृष्टकर्त्रपेक्षया विभिन्ना महर्षयो ब्राह्मणभागेषु उल्लिखिताः । अथापि एतेन ब्राह्मणानां मन्त्रेभ्योऽर्वाचीनत्वं न भवेत् । यतो ब्राह्मणभागा मन्त्रव्याख्यानरूपा मन्त्रैः कर्तव्यकर्मप्रतिपादकाः ततो मन्त्रैः सममेव एकस्मिन् काले वर्तेरन् एव । परं तु तादृशानामभिप्रायाणां ग्रन्थेषु सङ्ग्रहः तस्मिंस्तस्मिन् काले कृतः । "पूर्वे पूर्वेभ्यो वचः एतदूचुः", "पूर्वेभिः ऋषिभिः ईड्यः नूतनैः उत" इत्येतादृशवाक्यानि मन्त्रब्राह्मणसम्प्रदायस्य चिरकालपरिणतत्वमेव व्यक्तीकुर्वन्ति । अतश्च वेदशब्देन वैदिकमतानुसारिभिः ये ये ग्रन्था अङ्गीकृताः त एव अत्र गृह्यन्ते । वेदानां मध्येऽपि पौर्वापर्यभावो यद्यपि वक्तुं शक्यते, तथापि विभिन्नशाखासु श्रूयमाणमन्त्रब्राह्मणेषु दृश्यमानमभिप्रायैक्यं नापह्नवार्हम् । बहवः पारिभाषिका अंशा एकविधा एवादृताः । देवतास्वरूपनिरूपणे तत्सम्बन्धि-इतिहासनिरूपणे तथार्थवादेषु दृश्यमाननिरूपणे च श्रूयमाणमैकमत्यं विभिन्नशाखास्थमन्त्रब्राह्मणानमेकग्रन्थत्वमेव प्रकाशयति ॥

एकग्रन्थत्वाङ्गीकारपूर्वकं तत्तद्वेदभागेषु दृश्यमानतत्त्वानां परिणामवादानुसारेण पौर्वापर्यपरत्वमङ्गीकुर्मः । इदानीं वेदेषु एतावान् भागः परिदृश्यते । ऋक्संहिता ऐतरेयब्राह्मणम्, तथा शाङ्खायनब्राह्मणं सारण्यकम् सामसंहिता कौथुमराणायनीयशाखाभेदतो भिन्ना पञ्चविंशषड्विंशजैमिनीयसंहिताब्राह्मणानि उपनिषत्सहितानि. यजुःसंहितासु पञ्चषाः शाखाः उपलभ्यन्ते । तैत्तिरीयसंहिता-मैत्रायणीयसंहिता-काठकसंहिता-कापिष्ठलसंहिता अत्र प्रधानाः । तैत्तिरीयशाखायां परं ब्राह्मण इति नाम्ना व्यवह्रियमाणो ग्रन्थो दृश्यते । तथा कल्पसूत्राणि कर्मतत्त्वविवरणं कुर्वन्ति । तानि वेदेभ्योऽनन्तरं समुत्पन्नानि । तत्तच्छाखासु वेदार्थनिर्णयाय कञ्चिदुपकारं कुर्वन्ति । कल्पसूत्राणामपि वेदसदृशत्वं केषाञ्चिदाचार्याणामभिमतमेवेति ज्ञायते । जैमिनिः स्वसूत्रे कल्पसूत्राणां वेदत्वमाक्षिपति । कल्पसूत्रेषु च बहूनि ब्राह्मणवाक्यानि उदाहृतानि । विशिष्य बोधायनश्रौतसूत्रे ब्राह्मणवाक्यानां बाहुल्यं सुस्पष्टं प्रतीयते । एतादृशवेदग्रन्थसमालोचनपूर्वकं जनतन्त्रस्य परिस्थितिः कथं वा वेदेषु वर्तत इत्यत्र निरूप्यते । जनतन्त्रस्य राज्यतन्त्रेऽन्तर्गतत्वात्, राज्यतन्त्रेऽपि वेदस्याशयः कः? इति निरूपयितुं प्रयत्नः क्रियते ॥

वेदकालात् परं राज्यतन्त्रविषये बहवो ग्रन्था राज्यतन्त्रनिरूपणार्थं प्रणीताः । तेषाम् अर्थशास्त्रं नीतिशास्त्रं धर्मशास्त्रम् इति च व्यवहारो दृश्यते । राज्यतन्त्रनिरूपणमेव तेषां प्रथमोद्देशः । तत्र च राज्यतन्त्रनीतिसंबद्धा विषया विस्तरेण प्रतिपादिताः । पाश्चात्त्यदेशोत्पन्नाः "फुलाटो, अरिस्टोटल्" प्रभृतयो राज्यतन्त्रसम्बद्धान् विषयान् विचारपूर्वकं निरणैषुः । वेदा अपि एतादृशा ग्रन्था इति न मन्तव्यम् ।

वेदमन्त्रा भगवत्प्रार्थनां प्रति प्रवृत्ताः । ब्राह्मणभागाश्च कर्मतत्त्वप्रतिपादकाः । अथापि भगवत्प्रार्थनाकाले प्रार्थनीयांशाविष्करणकाले राज्यनीतिसम्बद्धान् विषयांस्ते संकल्पयन्ति । तथोदहरणतया रूपकतया वा राज्यनीतिसम्बद्धा विषया अपि ब्राह्मणभागेषु आयान्ति ॥ तथा कर्मतत्त्वनिरूपणपरे भागे राज्यनीतिसम्बद्धा विषयाश्च प्रतिपाद्यन्ते । अतो यथा वार्थशास्त्राणाम् राज्यतन्त्रविषय ऐदम्पर्यं नैवं वेदानाम् । परं तु मन्त्रभागेषु ब्राह्मणभागेषु च राज्यनीतिसम्बद्धा विषया विशकलिततया प्रतिपाद्यन्ते । एतादृशाभिप्रायाणां संमेलनेन समग्रविमर्शनेन च राज्यनीतितन्त्रस्वरूपं तदधीना व्यवहाराश्च स्पष्टं प्रतीयन्ते । इदमत्रास्माभिर्मनसा भाव्यम्—यत्, क्वचिदेव स्थलेषु राज्यनीतिसम्बद्धा विषयाः साक्षात् प्रतीयन्ते । अन्येषु स्थलेषु पुनर्मुखान्तरेणैव राज्यनीतिव्यवहारप्रस्तावः । परं तु अन्यमतग्रन्थापेक्षया वेदेषु राजनीतिव्यवहारा बाहुल्येन वर्तन्त इति । प्रथमं तावदिदं विचारणीयं भवति, यत् मतग्रन्थात्मकेषु वेदेषु कथं वा राज्यतन्त्रतत्त्वानां तदनुसारिव्यवहाराणां च प्रवेशः समजनि इति । अत्र द्वेधा समाहितिः- ऐतिहासिकपद्धत्यनुसारेण, तथा वैदिकमतानुसारेण च । ऐतिहासिकपद्धत्यनुसारेणैवं भवति— महर्षयो मन्त्रकृतो राज्ञा साकं भारतदेशं प्रत्यागताः । आर्या ये भारतभूमिं प्रविष्टास्ते तत्र तत्र युद्धं कुर्वन्त आसन् । ब्राह्मणमन्त्रद्रष्टारस्तेषां विजयार्थं दैवप्रार्थनामकुर्वन् । किं च, यदा ते भारतदेशं प्रविष्टाः तदा नूनं समुदायं सृष्टवन्तः । समुदायरक्षणार्थं राज्यतन्त्रव्यवहारमपि असृजन् । राज्यतन्त्रव्यवहाररक्षणार्थं बहूनि कर्माण्यपि कल्पितानि । तथा तत्र राज्यतन्त्रस्य जनाधीनत्वाज्जनानां राज्यतन्त्रे स्थानमपि कल्पितम् । जनतन्त्रस्थाने राजनाम्नः स्थानस्यैव मुख्यत्वं यद्यप्यङ्गीकृतम् तथापि राज्ञः स्थितिर्जनायत्ता इति बहूनां जनानामभिप्रायज्ञानं सर्वत्र सर्वदा कर्तुं न शक्यत इति च कृत्वा जनाभिप्रायज्ञानार्थं जनतन्त्रस्थानानि कल्पितानि । तेषां सभा-समिति-इत्यादिनामधेयानि । यदा च राज्यतन्त्रे राज्ञां प्रतिष्ठा सञ्जाता तदैतादृशानां जनतन्त्रस्थानानामुच्छित्तिः सञ्जाता । तत्स्थाने राज्ञैव केचित् पुरुषाः मन्त्रित्वेन परिकल्पिता इति ॥

वैदिकमतानुसारेणैवं दृश्यते । वेदस्य कृत्स्नस्यापि जनोपकारकरणमेवोद्देशः । जनानामुपकारश्चैहिकामुष्मिकविषयेष्वपेक्षितः । ऐहिकविषये राज्यतन्त्रतत्त्वमपि अन्तर्भावितम् । सामुदायिकार्थिकराज्यतन्त्रव्यवहारेषु वेदो जनानामुपदेशं करोति । तत्तद्व्यवहारेषु अप्राप्तस्यार्थस्य प्राप्त्यर्थं प्राप्तस्य अर्थस्य रक्षणार्थं च कर्माणि विहितानि । यतो राज्यतन्त्रं लोकविषयेषु प्रधानतया वर्तते, अत एव कृत्स्नस्य लोकतन्त्रस्य तदधीनत्वात् प्राधान्येन राज्यतन्त्रप्रस्तावो मन्त्रेषु ब्राह्मणेषु च तत्र तत्रागतः । राज्यतन्त्रव्यवहारसिद्ध्यर्थं च बह्व्यः प्रार्थना वर्तन्ते । तथा ब्राह्मणेषु च बहूनि कर्माणि राज्यतन्त्रव्यवहारसिद्ध्यर्थतया विहितानि इति, तत्र च

राज्यतन्त्रव्यवहारसंबद्धा बहवो व्यवहाराः प्रतिपादिताः । तेषां परिशीलनमावश्यकं भवति । राज्यतन्त्रस्य क्रमशः परिणामं वयमङ्गीकुर्मः । तथापि वेदेषु दृश्यमान-राज्यतन्त्रस्य सम्पूर्णत्वमङ्गीकर्तव्यं भवति । एतावत्कालपर्यन्तं राज्यतन्त्रतत्त्वदर्शिभिर्ये ये विषया उद्घाटितास्ते सर्वेऽपि वेदेषु वर्तन्ते । राज्यतन्त्रतत्त्वस्य मूलभूता बहवः सार्वकालीना अंशास्तत्र तत्र प्रतिपादिताः । तेषां परिशीलनेन अस्माभिर्वैदकालीन-राज्यतन्त्रस्वरूपं ज्ञातुं शक्यते । केचनांशा मूलभूता राज्यतन्त्रे, अपरे च तन्मूलभूता व्यवहाराः । यद्यपि व्यवहाराणां तदधीनस्थानानां च तस्मिंस्तस्मिन् काल उत्पत्तिर्विनाशश्च दृष्टः, तथापि मूलभूतस्य व्यवहारस्य सार्वकालीनत्वमङ्गीकर्तव्यं भवति । अस्मिन् ग्रन्थे मूलभूतानामंशानां तथा तदनुरोधिव्यवहाराणां च विवरणं क्रियते ॥

॥ राज्यतन्त्रानुसारिणी समुदायव्यवस्था ॥

वैदिकसम्प्रदाये ऋग्वेदस्य प्राथम्यमङ्गीकृतम् । तथाधुनिकैरपि ऋग्वेदस्य प्राधान्यमभ्युपगम्यते । तादृशऋग्वेदे मन्त्रेषु श्रूयमाणसामुदायिकव्यवहारः प्रथमं परिशीलनीयो भवति । कृत्स्नस्यापि ऋग्वेदस्य एकग्रन्थत्वाङ्गीकरणपूर्वकं तत्र श्रूयमाणसामुदायिकव्यवहाराणां विमर्शः क्रियते । ऋग्वेदे जनसमुदायवाचकानि बहूनि पदानि सन्ति प्रयुक्तानि । तत्र तृत्सु भारत-अनुद्रुह्यु-इत्यादीनि पदानि तत्कालीनजनसमुदायनामवाचकतया प्रयुक्तानि । तथा पञ्चजना इति प्रयोगोऽपि दृश्यते । पञ्चविधानां जनसमुदायानां प्रतिपादनमनेन क्रियते । तथा चत्वारो वर्णाः—ब्राह्मणक्षत्रियविट्शूद्रा अपि ऋग्वेद उक्ताः । दशमे मण्डले पुरुषसूक्त एव चतुर्णामपि वर्णानां प्रस्तावो वर्तते । शूद्रशब्दस्य चैकवारमेव तत्र प्रयोगः । ऋग्वेदकाल एव चातुर्वर्ण्यं, तत्प्रयुक्ता व्यवहारा आसन् वा न वेत्यत्र पाश्चात्येष्वभिप्रायभेदो दृश्यते । "मोक्षमुल्लर्" प्रभृतयः ऋग्वेदे चातुर्वर्ण्यस्य प्रस्तावो नास्तीत्येव वदन्ति ॥ "मार्टिन् हौक" प्रभृतयः चातुर्वर्ण्यस्य प्रस्तावं पश्यन्ति । परं तु जनसमुदायवाचकतया प्रसिद्धेषु व्यवहारेषु ब्रह्मक्षत्रविडिति व्यवहारः मुख्यतया वर्तते । अयं च व्यवहारोऽसकृदावृत्तः । तथा सर्वमण्डलसाधारणश्च । एतादृशो ब्रह्मक्षत्रविडिति जनसमुदायविभागः ऋग्वेदे आरब्धः अन्यवेदस्थमन्त्रब्राह्मणेष्वपि अनुवृत्तो दृश्यते । सुप्रसिद्धोऽयं व्यवहारो ब्राह्मणभागेषु समादृतः । एतादृशव्यवहारस्य सर्ववेदसाधारणत्वात् अत्र किं मूलमिति विवेचनीयं भवति । नात्र जातितत्त्वं मूलं भवितुमर्हति ; चतुर्णां जातिवाचकपदानां मध्ये त्रयाणामेव दर्शनात् . ब्रह्मक्षत्रविडिति व्यवहारस्य ब्राह्मण-क्षत्रिय-वैश्य इति व्यवहारापेक्षया किञ्चिदिव विलक्षणत्वात् सर्वमन्त्रब्राह्मणपरिशीलनेनेदं निर्णीतं भवति । ब्रह्मक्षत्रविट् इति तत्त्वत्रयं परस्परसम्बद्धम् । तत्र क्षत्र इति पदं पालकशक्तिपरम् । विडिति पदं च पाल्यमानतत्त्वपरम् । ब्रह्मपदं च पाल्यपालकयोरुभयोरपि उपकारकशक्तिविशेषपरम्—अतश्च प्रजास्त्रिधा विभक्ताः । पाल्यमानाः पालकाः उभयोरुपकारका इति । एतेषां मध्ये परस्परभेदश्च स्पष्ट एव । पाल्यमानाः प्रजा बहुलाः । पालकास्तदुपकारकाश्चाल्पीयांसः । पश्चात्कालीनजातितत्त्वस्यैतदेव मूलम् । प्रजानां पाल्यपालकत्वेन विभागो राज्यतन्त्रतत्त्वमूलक एव । एतादृशसमुदायविभागाधीनाः बहवो व्यवहारा वेदेषु श्रूयन्ते । तत्र तत्र राज्यतन्त्रतत्त्वांशाश्चोच्यन्ते । यतः क्षत्रतत्त्वप्रतिष्ठिताः सर्वेऽपि व्यवहाराः, अतो वैदिकराज्यतन्त्रे क्षत्रतत्त्वस्यान्यादृशं प्राधान्यं दृश्यते । क्षत्रतत्त्वस्योत्पत्तिः, तत्स्वरूपं, तत्कार्यं, तत्प्रयोजनं च विस्तरेण प्रतिपाद्यते ॥

॥ राज्यतन्त्रतत्त्वप्रतिपादकं पारिभाषिकं पदं क्षत्रम् ॥

क्षत्रशब्दः पारिभाषिकः (Political Power) राज्यतन्त्रतत्त्वप्रतिपादकः । क्षत्रशब्दस्य राज्यतन्त्रतत्त्वप्रतिपादकत्वात् तादृशाधिकारवतः पुरुषस्य क्षत्रिय इति नाम सम्पन्नम् । राज्यतन्त्रमिति व्यवहारो यद्यपि राजानमङ्गीकृत्य प्रवृत्तः । क्षत्रमिति व्यवहारस्तु न तथा ; राजतत्त्वमनन्तर्भाव्यापि तस्य प्रवृत्तेः । राजा राज्यमिति व्यवहारादपि "क्षत्र इति" व्यवहारः प्राचीनः ; जनतन्त्र, राजविषयराजतन्त्रोभयसाधारणः ॥

॥ क्षत्रम् ॥

क्षत्रतत्त्वस्य लौकिकविषयेषु प्राधान्यं सर्वमन्त्रब्राह्मणभागसाधारणम् । क्षत्रानुवर्तित्वमन्येषां तत्र तत्र बहुधा निरूपितम् । क्षत्रतत्त्वसम्बन्धेनैव क्षत्रियजातिरप्युत्पन्ना । क्षत्रियादन्ये त्रयोऽपि वर्णास्तदधीनाः । राजापि क्षत्रियः । क्षत्रतत्त्वमूलकमेव राजतत्त्वम् । ("त्रयो वा अन्ये राजन्यात्पुरुषा ब्राह्मणो वैश्यः शूद्रः, तानेवास्मा अनुकां करोति" तै. सं. 2 5·10 ।) क्षत्रतत्त्वस्योत्पत्तिरपि क्वचित् प्रतिपाद्यते । "भद्रं पश्यन्त उपसेदुरग्रे । तपो दीक्षामृषयः सुवर्विदः । ततः क्षत्रं बलमोजश्च जातम् । तदस्मै देवा अभिसन्नमन्तु" (तै.सं 5.7.4.3) । अयमेव च मन्त्रोऽथर्वसंहितायामपि पठ्यते किञ्चिद्विकृतः । अस्मिन् मन्त्रेऽयमर्थः प्रतिपाद्यते । "संस्कृतेः प्रारम्भकाले लोकक्षेमं मनसि निधाय महर्षयो जनसमुदायकार्यनिर्वाहाय क्षत्रतत्त्वं कल्पितवन्तः । ते च महर्षयो दिव्यज्ञानवन्तः । तेषां तपोबलमासीत् । एतादृशतत्त्वदर्शनार्थं दीक्षामपि ते प्रविष्टाः । क्षत्रतत्त्वरक्षणार्थं बलमपि ते सृष्टवन्त इति । लोके हि मनुष्याः स्वस्वव्यवहारे स्वकुटुम्बव्यवहारे च व्यापृताः । समुदायरक्षणार्थं किमपि नासीत् । परं तु तत्तत्कुटुम्बव्यवहारविलक्षणः समुदायव्यवहारोऽपि लोके वर्तते । तादृशव्यवहारनिर्वाहार्थं किमपि तत्त्वं कल्पयितव्यमभूत् । तदर्थं ते क्षत्रतत्त्वं सृष्टवन्तः" । इति एतादृशतत्त्वं जनसमुदायादेवोत्पादितम् । अतश्च जनाः स्वसमुदायकार्यनिर्वाहाय स्वेभ्य एवोत्पन्नं क्षत्रतत्त्वमङ्गीकृत्य तस्योत्कृष्टं स्थानमपि दत्तवन्तः । जनास्तत् पूजयन्ति; तन्मानयन्ति च । मन्त्रेषु क्षत्रतत्त्वस्य प्रस्तावोऽस्ति । क्वचिद्देवताया बलमपि क्षत्रशब्देन प्रतिपादितम् । क्षत्रतत्त्वस्य रक्षणार्थं प्रार्थनापि वर्तते । ऋङ्मन्त्रेषु एवं क्षत्रतत्त्वं निर्दिष्टम् । "न हि ते क्षत्रं न सहः न मन्युं वयश्चनामी पतयन्त आपुः" (1-24-6) । अत्र वरुणस्य बलं क्षत्रशब्देनोक्तम् । वरुणश्चान्यत्र राजत्वेन स्तुतः । "उपक्षत्रं वृञ्जीत हन्ति राजभिः भयेचित् सुक्षितिं दधे । नास्य वर्ता न तरुता महाधनेनार्भे अस्ति वज्रिणः" (1-40·8) । अत्र ब्रह्मणस्पतेः क्षत्रं वर्ण्यते । "असमं क्षत्रं असमा मनीषा" (1·54-8) ॥ इन्द्रस्य निःसमं क्षत्रमुच्यते । "महि क्षत्रं जनाषाडिन्द्रतव्यम्" (1-54-11) इन्द्रस्य क्षत्रं महत् जनाभिभविता प्रवृद्धम् । अथैनोः क्षत्रमकुतश्च नाधृषे (1-136-7) ॥ मित्रावरुणयोः क्षत्रप्रधृष्यम्" । तयोः क्षत्रमतिशयिततेजोयुक्तम् । "घृतेन नो मधुना क्षत्रमुक्षतम् । अस्माकं ब्रह्म पृतनासु जिन्वतम्" । (1-157-2) अश्विनौ प्रार्थ्येते । क्षत्रब्रह्मतत्त्वयोरुभयोरपि प्रातर्थना घृतेन

मधुना च क्षत्रस्य वृद्धिरप्युच्यते । तथा ब्रह्मतत्त्वस्य प्रीणनमप्युच्यते । अत्र लोकव्यवहारस्थ ब्रह्मक्षत्रयोरेव प्रार्थना । "ते नो गृणानो महिनी महिश्रवः । क्षत्रं द्यावापृथिवी धासतो बृहत् । येनाभिकृष्टीस्तत नाम विश्वहा" (1·160-5) द्यावापृथिव्योः क्षत्रं वर्ण्यते । तत् बृहत् । सर्वेष्वपि पुत्रादिरूपप्रजाविस्तारस्य कारणत्वं च । "क्षत्रं नो अश्वो बनतां हविष्मान्" (1-162·22) ॥ अत्राश्वमेधेऽश्वः प्रार्थ्यते । क्षत्रं वनताम् इति लौकिकस्य क्षत्रस्य प्रार्थना । अश्वमेधश्च राजतत्त्वेन सम्बद्धः । क्षत्रं राजाना प्रतिबोदधाथे" । (3-38-5) ॥ अत्रेन्द्रावरुणयोः क्षत्रमुच्यते । तावत्र राजत्वेनापि विशेषितौ । त्वं महान् इन्द्र तुभ्यं हक्षाअनुक्षत्रं मंहनामन्युत द्यौः । (4.17.1) ॥

इन्द्रस्य क्षत्रं प्रस्तुतम् । क्षत्रतत्त्वस्यान्यानुमतिरत्र सूच्यते "द्यौर्नक्षत्रं 'अभिभूतिपुष्यात्' (21-1) ॥ इन्द्रस्य क्षत्रं द्यौरिति स्तूयते । इन्द्राग्नी शतदाग्नि अश्वमेधेधसुवीर्यम् । क्षत्रं धारयन्तं बृहत् दिवि सूर्य इवाजरम्" (5.27·6) ॥ अश्वमेधनाम्ने राज्ञः क्षत्रं दिवि सूर्यमिव धारयन्ततम् इति इन्द्राग्नी प्रार्थ्येते । (अत्र लौकिकस्य क्षत्रस्य प्रार्थना) ॥ "सहस्रसामाग्निवेशिं गृहीषे शत्रि—, तस्मिन् क्षत्रममिवत् त्वेषमस्तु" (5-34-9) ॥ अत्र शत्रि-नाम्नो राज्ञः क्षत्रस्य प्रार्थना । तस्मिन् क्षत्रे बलं दीप्तिश्च प्रार्थ्यते । "राजानाक्षत्रमाह्रुणीयमाना सहस्रस्थूणं विभ्रथः सह द्वौ" (5-62-6) ॥ मित्रवरुणायो राजत्वेन वर्णितयोः क्षत्रं प्रस्तुतम् । क्षत्रनिवेशस्थानमपि सहस्रस्थूणमिति वर्णितम् । "युवन्नो येषु वरुणक्षत्रं बृहच्च बिभ्रथः" (5-64-6) ॥ अत्रापि मित्रावरुणयोः क्षत्रं बृहत् इति वर्णितम् । "ता हि क्षत्रमविहुतम्" (5-66-2) "वर्षिष्ठं क्षत्रम्" (5-67-1) "महि वां क्षत्रं देवेषु" (5-68-3) त्रिष्वपि स्थलेषु मित्रावरुणयोः क्षत्रम् अहिंस्यं वरिष्ठं महत् इति प्रतिपाद्यते । "अस्माकमग्ने मघवत्सु धारयानामी क्षत्रमरं सुवीर्यम्" (6-8-6) ॥ अत्राग्निः प्रार्थ्यते । अजरम् अनपहार्यं सुवीर्यं ददातु इति । अत्र लौकिकक्षत्रं प्रस्तुतम् । "अनुक्षत्रम्" (6-25-8) ॥ अत्रापि लौकिकस्य क्षत्रस्य प्रार्थना । "उत द्यावापृथिवी क्षत्रमुरुबृहद्रोदसी" (6-50-3) ॥ अत्रापि लौकिकक्षत्रमुच्यते । "क्षत्रं देवासो" अदधुः सजोषाः (6-67-5) ॥ ता हि क्षत्रं धारयेते" (6-67-6) ॥ अत्र मित्रावरुणयोः "क्षत्रम् । दुणाशं अजरं दवेोयु" (7-18-25) ॥ मरुतः प्रार्थ्यन्ते, सुदासः क्षत्रम् अवि नाशि अजरमस्तु । राजा राष्ट्राणां पेशो नदीनाम् अनुत्तमस्मै क्षत्रं विश्वायु" (7-34-11) ॥ वरुणस्य क्षत्रं स्तुतम् । राजशब्दोऽपि श्रुतः । "महिक्षत्राय पौंस्यायनः" (7-30-1) "क्षत्राय त्वमसि" (8-37-6) "अन्नाप्यं वरुणो मित्रो अर्यमा क्षत्रं राजा न आशत" (7·66-11) ॥ अन्यैरप्राप्यक्षात्रं राजवेननिरूपितानां मित्रादीनां प्रार्थ्यते । "धृतव्रता क्षत्रिया क्षत्रमाशतुः" (8-25-8) ॥ मित्रावरुणयोः क्षत्रमुच्यते । "क्षत्रं जिन्वतमुत जिन्वतं" (8-35-17) ॥ अत्र लौकिकस्य क्षत्रस्य प्रार्थना ।

अत्र ब्रह्म जिन्वतम् इति ब्रह्मशक्तेः प्रस्तावोऽस्ति । "इन्द्रक्षत्रमभिवाममोजः" (10-180-3) । "इन्द्रस्य क्षत्रं क्षत्रश्रीः उक्ता"(1-15-5-6-26-8)"न हि क्षत्रस्य"(5-44-10)बहुवचनान्तेन क्षत्रप्रयोगोऽप्यस्ति "अस्मे क्षत्राणि धारयेरनुद्यून्" (4-4-8) । "तव क्षत्राणि वर्धयन्" (8-29-33) "इन्द्र क्षत्राणि वर्धयन्" (8-37 7)। "क्षत्राय त्वं श्रावसे त्वम्" (1-113-6) । क्षत्राय उषा उच्छतीत्युच्यते । "उत क्षत्राय रोदसी समञ्जन्" (3-38 3) अत्र लौकिकक्षत्रस्य प्रार्थना । "देवाश्चित्ते असुर्याय पूर्वे न क्षत्राय ममिरे महांसि" (7-21-7) "महे क्षत्राय शवसे" (7-28-3) "सर्वत्रापि इन्द्रस्य क्षत्रम् । त्रसे दस्य वं महे क्षत्राय जिन्वथः" (8-22-7) ॥ अत्र राज्ञो लौकिकस्य क्षत्रस्य प्रस्तावः । "अस्मे क्षत्राय" (10-18-9) ॥ अत्र क्षत्रियसम्बन्धः ।

यजुःसंहितायां क्षत्रविषयप्रार्थना सर्वपृष्ठनामकेष्टेर्याज्यापुरोनुवाक्यासु दृश्यते ॥ "अग्निर्देवो दुष्टरीतुरदाभ्य इदं क्षत्रं रक्षतु पात्वमस्मान् । इन्द्राधिपतिः पिपृता दतो नो महि क्षत्रं विश्वतो धार ये दम् ॥ बृहत्साम क्षत्रभृत् । धर्त्रीं दिशां क्षत्रमिदं दाधार । अस्मै राष्ट्राय महि शर्म यच्छतम् । इदं क्षत्रं दुष्टारमस्त्वोजो नाधृष्टम् । इदं क्षत्रं मित्रवत् आर्द्रदानु इति । मित्रः क्षत्रं क्षत्रपतिः । क्षत्रमस्मिन् यज्ञे यजमानाय ददातु स्वाहा" "क्षत्राणां क्षत्रपतिरसि क्षत्राणां क्षत्रभृत्तमो वयोधाः । क्षत्रे राष्ट्रे च जागृहि । क्षत्राणामेवैनं क्षत्रपतिं करोति" (तै.ब्रा.) इति ।

अथर्ववेदे अधोनिर्दिष्टेषु स्थलेषु क्षत्रशब्दस्य निर्देशो दृश्यते । यथा "ब्रह्म च क्षत्रं च नबिभीतो न रिष्यतः । एवा मे प्राणमाबिभेः" (2-15-3) ॥ "मयि क्षत्रं पर्णमणे मयि धारयतात् रयिम्"(3-5 2) ॥ "संशितं क्षत्रमजरमस्तु जिष्णुः" (3-19-1) ॥ "एषां क्षत्रमजरमस्तु जिष्णु" (3-19-5) ॥ "उत पुत्रः पितरं क्षत्रमीळे" (5 1 8) ॥ "निर्वै क्षत्रं नयति हन्ति वर्चः (5-18-4) ॥ "अस्य क्षत्रं श्रियं महीं वृष्टिरिव वर्धया तृणम्" (6-5-4) ॥ "अस्मे क्षत्रमग्नीषोमौ अस्मै धारयतं रयिम्" (6-54-2) ॥ "स्वधास्तु मित्रावरुणा विपश्चिता प्रजावत्क्षत्रं मधुनेह पिन्वतम्" (6-97-2) ॥ 'त्वं दैवीर्विश इडाः विराजा युष्मत् क्षत्रमजरं तेऽस्तु" (6-98-4) ॥ इन्द्र क्षत्रम् अभिवाममोजो जायथा वृषभचर्षणीनाम्" (7-89-2) ॥ "केन सत् क्षत्रमुच्यते" (10-2-22) ॥ "ब्रह्म सःक्षत्रमुच्यते" (10-2-23) ॥ "स मे राष्ट्रं च क्षत्रं च पशूनामोजश्च मे दयत्" (10-3-12) ॥ "अतो वै ब्रह्म च क्षत्रं चोदतिष्ठताम्" (15-10-2) ॥ तथा "क्षत्राय नाव्रश्चते तथा राष्ट्राय नापृश्च्यते" (15-10-2) ॥ "बृहस्पतिमेव ब्रह्म प्राविशत् । "इन्द्रं क्षत्रम्" (15-10 5) ॥ "अयं वाग्निर्ब्रह्मासावादित्यः क्षत्रम्" (15-10-7) ॥ "ऐनतिन्द्रियं गच्छति इन्द्रियवान् भवति य आदित्यं क्षत्रं दिवं इन्द्रं वेद" (151011) ॥ "शिवानग्नीनत्सुषदो हवामहे मयि क्षत्रं वर्च आदत्त देवीः" (16 1-13) ॥

पूर्वनिर्दिष्टेषु स्थलेषु क्षत्रतत्त्वस्य प्रार्थना वर्तते । सामान्यतः क्षत्रस्य प्रार्थना क्षत्रतत्त्वस्याजरत्वं जिष्णुत्वं च प्रार्थ्यते । तथात्र ब्रह्मगवीनाशे क्षत्रनाशश्च उक्तः (5-18-4) प्रजावत्त्वं च प्रर्थ्यते ॥

प्रथमं क्षत्रशब्दो राज्यतन्त्रस्य मूलभूते बले अधिकारे वा प्रयुक्तः । पश्चादधिकारवति पुरुषे प्रयोगः उत्पन्नः क्षत्रियशब्दश्चैतादृशः । अयं क्षत्रशब्दः पश्चात्काले जातिवाचकतया प्रयुक्तोऽपि ऋङ्मन्त्रेषु बहुलं राज्यतन्त्रानुसारेणाधिकारवति पुरुष एव प्रयुक्तः । वैदिककोशानुसारेण पुनरेवं ऋग्वेदे क्षत्रशब्दोऽधिकारबलपरतया प्रयुक्तः । पश्चात्काले परमधिकारवत्पुरुषपरतया प्रयुक्तः । तदनुसारेण क्षत्रशब्दस्य ऋग्वेदेऽर्थोऽन्यः, वेदान्तरेष्वन्यः । वयं तु न भेदं पश्यामः । यत् ऋग्वेदे यथा वा क्षत्रशब्दस्य बलपरतया प्रयोगः तथाऽधिकारवत्पुरुषपरतयापि प्रयोगो दृश्यते । जातिपरतया प्रयोगोऽस्ति वा न वेति विचारान्तरम् ॥

किंच "वर्मन् क्षत्रस्य" (तै. सं. 3-3-9) इति क्षत्रस्योच्चं स्थानं दत्तं क्षत्रस्यानितरसाधारणमुख्यत्वं च प्रतिपादितम् । "तस्मात् क्षत्रात् परं नास्ति" (बृ. उप.) ॥ छान्दोग्योपनिषदि क्षत्रविद्यायाः प्रस्तावो वर्तते । उपनिषत्काल एव राज्यतन्त्रप्रतिपादकशास्त्रस्य सत्ता सुस्पष्टं प्रतिपादिता । नारदः स्वेनाधीतविद्यानां मध्ये क्षत्रविद्यामपि वदति हि । वैदिककोशकारा अपि क्षत्रविद्याशब्दस्य (Science of the Ruling Class) सइन्स् आफ़ दि रूलिङ्ग् क्लास इति वदन्ति । परं त्वत्रायं प्रश्नः समायाति । केषां क्षत्राधिकार इति तत्र क्षत्रधर्मस्यैकत्वेऽपि तादृशाधिकारः क्षत्रियाणां बहूनामप्यासीत् । तथापि तेषांमध्ये अधिकारवान् पुरुष एक एव । बहूनामधिकारवत्त्वे परस्परकलहस्य संभावनया सामुदायिकक्षेमोच्छेदप्रसंगात् । आधुनिके जनप्रधानराज्यतन्त्रेऽपि जनाधिपतिनाम्ना प्रधानमन्त्रिनाम्ना च प्रसिद्ध एव अधिकारसत्वात् । अन्ये पुनः तत्सदृशास्तदुपकारका एव । एवमपि प्राचीनतमे कालेऽपि क्षत्राधिकारवत्त्वमेकस्यैव । अन्ये पुनस्तदुपकारमेवाकुर्वन् । तं च राजशब्देन व्यवहृतवन्तः । अन्ये पुनः क्षत्रियास्तूपकारका एव । क्षत्रतत्त्वस्यैकाश्रयत्वनिर्बन्धो ब्राह्मणेषु कृतः । एकस्थं तत् क्षत्रं करोतीति (शत. ब्रा.) । अतश्च क्षत्रियशब्दोऽपि एकस्मिन्नेव राजनि सार्थकः । अन्येषु क्षत्रियेष्वौपचारिकः । युद्धकाले समाधानकाले वा इतरे राज्ञ उपकारकाः । सर्वथा क्षत्रशब्दो राज्यतन्त्रतत्त्वानुसार्यधिकारपर इति अत्र न कोऽपि सन्देहः । इतः परं ब्रह्मक्षत्रविडाख्यराज्यतन्त्रस्यप्रधानं तत्त्वम्, त्रयाणां स्वरूपम्, परस्परसम्बन्धं च विमृशामः ॥

॥ राज्यतन्त्रतत्त्वानुसारि तत्त्वत्रयम् ॥

॥ ब्रह्म क्षत्रं विशः ॥

साक्षाद्राजतन्त्रतत्त्ववाचि क्षत्रपदं कथं वेदेषु तत्र तत्र प्रयुक्तमिति निरूपितमधस्तात् । इतः परं राज्यतन्त्रतत्त्वमूलभूतब्रह्मक्षत्रविडात्मकतत्त्वत्रयस्वरूपं तेषामन्योन्यसम्बन्धं च विमृशामः । ब्रह्मक्षत्रविडात्मकतत्त्वत्रये त्रयाणामपि प्राधान्यं परस्पराधीनसत्त्वं च तत्र तत्र मन्त्रब्राह्मणवाक्येषु बहुधा निरूपितम् । तत्र ब्रह्मशक्तिः सर्वथा आलौकिकी । तादृश्याः शक्तेरलौकिकविधया क्षत्रविडुभयोपकारत्वात् प्राधान्यम् । अथापि तस्या अपि विडधीनत्वं सुस्पष्टमेव । यतो विशामेव मध्ये कस्यचिद् ब्रह्मशक्त्याधारत्वम् अङ्गीक्रियते । तथा उपकारकरणकाले प्रजाभिः सह संसृज्यैवोपकारकरणस्य सम्भावितत्वात् । तथा ब्रह्मशक्तेः सकाशादेव क्षत्रतत्त्वस्य विट्तत्त्वस्य चोत्पत्तिरपि श्रूयते । 'ब्रह्मणः क्षत्रं निर्मितम्' (तै. ब्रा. 2-8-8-4) 'ब्रह्मणो हि क्षत्रं जायते' (शत. ब्रा.) । तथा क्षत्रतत्त्वस्य प्रजासंकेतायत्तोत्पत्तिकत्वात् विश उत्पत्तिः सम्भाव्यते । 'विशो हि क्षत्रं जायते' (शत. ब्रा.) "विशो वा इदं विवर्तम्" (जै. ब्रा.) ॥ अथापि क्षत्रतत्त्वरूपं विडपेक्षयोत्कृष्टम् । प्रजासु अन्यादृशोऽस्याधिकारसम्बन्धः । तथापि ब्रह्मशक्त्यपेक्षया निकृष्टमेव क्षत्रं । ब्रह्मशक्तेः क्षत्रं क्षत्रस्योपर्यप्यधिकाराङ्गीकारात् , तथोभयोरपि ब्रह्मक्षत्रयोर्विशामुपर्यधिकारो वर्तते । क्षत्रतत्त्वस्य लौकिकविधयाधिकारः । ब्रह्मतत्त्वस्य पुनरलौकिकविधयाधिकारः । उभयानुवर्तित्वं च विशामावश्यकम् । विशां क्षत्रानुवर्तित्वमात्मरक्षणार्थम् अवश्यं भवति । क्षत्रधर्मानुवृत्त्यभावे रक्षकाभावेन विट्तत्त्वस्यैवोच्छेदप्रसङ्गात् । तदेतत् ब्रह्मक्षत्रविडाख्यं तत्त्वत्रयं स्वरूपतो विभिन्नं सत् परस्परसंश्लिष्टं राज्यतन्त्रतत्त्वस्य मूलं भवति । "तदेतत् ब्रह्म क्षत्रं विट्" (शत. ब्रा.) । ब्रह्मक्षत्रविट्तत्त्वसम्बन्धानां बहूनामंशानां तत्र तत्र मन्त्रब्राह्मणभागेषु दर्शनात् तानत्र संगृह्य विवरणपुरस्सरं प्रदर्शयामः । अस्मिन्विषये मन्त्रभागापेक्षया ब्राह्मणभागा एव नितरामुपकारं कुर्वन्तीत्यपि बोद्धव्यम् । अत्र प्रथमं क्षत्रविशोः स्वरूपप्रतिपादकानि तयोः परस्परं सम्बन्धप्रतिपादकानि वेदवाक्यान्युदाहरिष्यामः ॥

क्षत्रतत्त्वस्योत्पत्तिर्विड्भ्य एव । यद्यपि तादृशक्षत्रतत्त्वम् ऋषीणां दीक्षातपोबलादुत्पन्नमिति गम्यते । अत एव ब्रह्मशक्तिसकाशादुत्पत्तिरिति वादोऽपि सङ्गच्छते । अथापि क्षत्रशक्तेः तत्तत्काल उत्पत्तिः स्थितिश्च विडायत्ता एव । तस्मिंस्तस्मिन् काले

यदि प्रजाः स्वरक्षणार्थं क्षत्रतत्त्वं नाङ्गीकुर्युस्तदा क्षत्रतत्त्वस्योत्पत्तिः स्थितिश्च न सम्भाव्यते ॥ तदेतदुपपादितम् । (1) (शत. ब्रा. 12-7-3-8) ॥ "क्षत्रं वै वयः विट्सु" एषुरा ह वा पयः पुनाति विश एव तत् क्षत्रं जनयति । विशो हि क्षत्रं जायते । अन्यत्रापि विशां सर्वतत्त्वोत्पादकत्वं मनसि निधाय "विड्वै जनित्रम्" (तै. सं. 5-3-3-4) इत्युच्यते । अन्यत्रापि "विशामेवैनमेतत् सर्वमर्थं करोति" (शत. ब्रा. 5-3-4-11) ॥ "उभे ब्रह्म च क्षत्रं च विशि प्रतिष्ठिते" (शत. ब्रा. 11-2-7-16) ॥ (2) "तथा ब्रह्म क्षत्रं पवते तेज इन्द्रियं ॥ मन्त्रव्याख्यानावसरे "ब्रह्मणो हि क्षत्रं जायते" (शत. ब्रा. 12-7-3-12) इत्युच्यते । अत्र अलौकिकविधया ब्रह्मशक्तिसकाशादुत्पत्तिं प्रतिपादयति ॥

(3) पाल्यमानाः प्रजा बह्वय एव । पालकशक्तिः परमेका । क्षत्रमेकस्थमेव कार्यकरं भवति । "विशि तद् भूमानं दधाति" (शत. ब्रा. 6-6-1-8) ॥ एकस्थं तत् क्षत्रम् एकस्थां श्रियं करोति ॥

यद्यपि विड्भ्य एव क्षत्रमुत्पन्नम्, अथापि विडपेक्षयोत्कृष्टत्वं क्षत्रतत्त्वस्याङ्गीकृतम् । (4) "क्षत्रमेव तद्विश उत्तरां करोति" (शत. ब्रा. 2-5-2-6) । "क्षत्रमेव विश्यध्यूहति" (शत. ब्रा. 3-7-4-7) ॥ "विशामेवैकमेतत्पतिं करोति" (शत. ब्रा. 5-3-4-10) ॥ "स वा उपरि जुहूं सादयति । अध उत्तराः स्रुचः । क्षत्रमेवैतद्विश उत्तरां करोति । तस्मादुपर्यासीनं क्षत्रियम् अधस्तादिमाः प्रजा उपासते" (शत. ब्रा. 1-3-4-5) ॥ (5) क्षत्रतत्त्वेऽधिकारवत्त्वाधिकाररक्षणार्थं वीर्यओजआदिकं तत्र आवश्यकं भवति । स्वबलेनैव क्षत्रं विशोऽधरीकरोति । जनेषु केचिदेव विद्वांसः । ते च स्वयमेव स्वसृष्टस्य क्षत्रस्य नमन्ति । समुदायरक्षणार्थं क्षत्रं ते मानयन्ति । परं तु नैतत्सर्वजनसाधारणम् । साधारणा हि जना न विवेकिनः । ते न स्वयं क्षत्राय नमेयुः । परं तु क्षत्रबलस्यैव नमेयुः । अतः क्षत्रस्य-बलादिकं मावश्यकम् । "ओजसैवास्मै वीर्येण विशं पुरस्तात् परिगृह्णाति । अनपक्रामुका अस्माद्विड्भवति (शत. ब्रा. 6.10) ॥ "ओजसैव वीर्येण विशं क्षत्रायोपाहरति" (काठ. सं. 29-9) "ओजसा एतद्विशं क्षत्राय परिगृह्णाति" (मैत्रा. सं. 6.7.8) ॥ "क्षत्रं विशो वीर्यवत्तरं करोति, क्षत्राय तद्विशमधस्तात् उपनिषादिनीं करोति" (शत. ब्रा. 9-4-3-3) ॥ "वीर्यमेवैतत् क्षत्रे धत्तः । अवीर्यमेवैतद्विशं कुरुतः" (शत. ब्रा. 2-5-2-36) ॥ वस्तुतस्तु क्षत्रस्य बलं प्रजाभ्य एव आगच्छति । स्वतः क्षत्रस्य बलं नास्ति । "ओजसैव वीर्यं विश आदाय क्षत्रायापि दधदि" (काठ. सं. 21-10) ॥ यद्यपि विड्भ्य एव क्षत्रतत्त्वमुत्पन्नम् । यदि क्षत्रतत्त्वं बलवत् न स्यात् । तदा सृष्टस्य तत्त्वस्य हानिर्भवेत् । प्रजानामधरीकरणं बलवतैव क्षत्रतत्त्वेन न

सुशकम् । अतश्च क्षत्रतत्त्वे बलाधानमावश्यकम् । क्षत्रतत्त्वमुदासीनीकृत्य यदा प्रजाः प्रत्युत्थिता भवेयुः तदा प्रजाबलेनैवाधरीकार्या भवेयुः, बलवत्क्षत्रस्य शक्तिं दृष्ट्वैव जना विनीता भवेयुः । अतः क्षत्रशक्तेर्बलमावश्यकमेव इत्ययमर्थोऽत्रसूच्यते ॥

(6) एककार्यकरणस्यैकाग्र्यं मनस आवश्यकम् । सामुदायिकव्यवहारेऽपि इदं समानम् । अथापि समुदाये बहूनां जनानां सत्त्वात् नानामनकत्त्वमवर्जनीयमेव । एकेनोक्तम् अपरो नाङ्गीकुर्यात् । नानामनोभिजनैः कार्यकरणं न शक्यते । अतो जनाः स्वसमुदाय-रक्षणाय क्षत्रतत्त्वं सृष्ट्वा एकेनैव पुरुषेणैकाग्रमनसा स्वसमुदायकार्यनिर्वाहं कारितवन्तः । इदमपि प्रतिपादितम्—"विशं तत् क्षत्रं वीर्यवत्तरं करोति, पृथग्वादिनीं नानाचेतसम्" (शत. ब्रा. 9-3-1-13-15) ॥

(7) यद्यपि क्षत्रे ओजोवीर्यादिकं वर्तते, तेनैव जना अपि क्षत्राय नमन्ति । वस्तुतस्तु क्षत्रस्य वास्तविकं बलं विडेव । यदि च क्षत्रं जना निराकुर्युस्तदा क्षत्रेण किमपि कर्तुं न शक्यते, तस्योच्छित्तिरेव भवेत् । वीर्यओजआदीनां सत्त्वं क्षत्रस्य प्रजाबलसत्त्व एव सार्थकं भवति । प्रजाबलाभावे क्षत्रस्योजआदयो निष्फला भवेयुः ॥ (8) अतः "विशौजाः" इति विशेषणं क्षत्रधर्मानुवर्तिनो राज्ञो दीयते ॥ (9) यथा वा क्षत्रतत्त्वस्य प्रजापेक्षयाधिकबलत्वं, एवं विशां वीर्यवत्त्वं चोच्यते । यदि क्षत्रं विशश्च समबलं भवेत्, तदा सर्वदा जनसमुदाये शान्तिरक्षणमेव न भवेत् । स्वापेक्षया बलिनं क्षत्रं जना न सहेरन् । अत एव कस्मिंश्चित् ब्राह्मणवाक्ये क्षत्रादन्यत्र सामान्यजनेषु आयुधवत्त्वं निषिद्धं दृश्यते । ततः क्षत्रापेक्षया विशो दुर्बलीकृता इत्युच्यते । क्षत्रस्यायुधबलवत्त्वं, न विशाम् । यदि च विशोऽपि सायुधाः स्ववीर्यं प्रकाशयेयुः तदा क्षत्रतत्त्वस्य नाश एव । तदा तादृशतत्त्वस्यावश्यकतैव नभवेत् । अतः क्षत्रापेक्षया विशां दुर्बलत्वं उक्तम् । "अवीर्यमेवैतत् विशं कुरुतः" (शत. ब्रा. 2-5-2-36×1-3-2-15) "अगर्भा मारुती विशमेव निरिन्द्रियामकः" (तै. ब्रा. 1-8-3-3) ॥

विड्भिः क्षत्रस्यानुवर्तनं कार्यम् । यदि च विशः स्वसृष्टमपि क्षत्रं नानुवर्तेरन् तर्हि क्षत्रतत्त्वमेवोच्छिद्येत । अन्ततो गत्वा मानुषसंस्कृतेरेवोच्छित्तिर्भवेत् । मनुष्या विशः स्वस्व-कार्ये व्यग्राः स्वाभिलषितार्थं प्राप्तुमेव प्रयत्नं कुर्युः । अनेनोद्यमेनान्यस्य किं भवेदिति विचारं न कुर्युः । यदि चैवं सर्वेऽपि जनाः स्वाभिलषितार्थसम्पादनायैव प्रयतेरन् तदा जनसमुदाय-तत्त्वस्यैव नाशेन सर्वे मृगनिभा भवेयुः । क्षत्रं पुनः प्रत्येकजनसंरक्षण इव समुदायतत्त्व-रक्षणेऽपि जागरूकम् । नास्य क्षत्रस्य स्वकीयमभिलाषान्तरं विद्यते । अतश्च क्षत्रेण क्रियमाण-

व्यवहारः प्रत्येकयोगक्षेमरक्षणवत् समुदायक्षेमार्थमपि भवति । अतश्च क्षत्रतत्त्वानुवर्तनं समुदायक्षेमार्थमपि भवति । अत्रेदमवधेयम्—सामुदायिकव्यवहारो मनुष्यजातेर्मूलभूतं तत्त्वम् । यदि च समुदायविषयिणी बुद्धिस्तिरस्कृता भवेत् तदा समुदायतत्त्वमेव तिरोहितं भवेत् । यद्यपि समुदायतत्त्वं न स्वभावसिद्धं काल्पनिकं साङ्केतिकम्, अथाप्यस्य मनुष्यसंस्कृतिमूलभूतत्वात् सूक्ष्मेक्षिकया तस्य रक्षणमावश्यकं भवति । समुदाययोगक्षेमसमालोचनकाले प्रत्येकजनाभिलाषाणां विस्मरणम्, अथ वा त्यागश्चार्थसिद्धो भवति । तादृशपक्वदशायामेव क्षत्रतत्त्वं सुस्थिरं भवति । स्वस्वाभिलाषां किञ्चिदिव परित्यज्य क्षत्रानुवर्तनेन समुदायरक्षणमवश्यं कर्तव्यम् । विड्भिः क्षत्रानुवर्तनं कर्तव्यमिति बहुषु स्थलेषु प्रतिपादितम् । "क्षत्रायैव तद्विशं कृतानुकरां अनुवर्त्मानं करोति" (शत. ब्रा. 11-2-3-17) "विशमेवास्मा अनुवर्त्मानं करोति" । (तै. सं. 5-4-7-8) "विशमेवास्माऽनुनियुनक्ति अनपक्रामुका अस्मा विड् भवति" (पञ्चविंशब्राह्मणं 8-11-6-10) "विशमनु नियुनक्ति" (मै. सं.) क्षत्रेण यत्कर्तव्यतया निर्णीयते तदनुवर्तनं विड्भिः कार्यम् । क्षत्रेण यदारब्धं तदादर्तव्यम् । "पश्चादन्ववसायिनीमेवास्मै विशं करोति" (तै. सं. 2-1-3) ॥

(11) क्षत्रस्य सर्वजनयोगक्षेमार्थत्वात् तेन विवादो जनैर्न कार्यः । निर्विवादं क्षत्रोक्ताङ्गीकारेण क्षत्रतत्त्वं सुरक्षितं भवति । असकृद्विवादकरणे क्षत्रस्य शैथिल्यमेव भवति । विड्भिः क्षत्रेण विवादो न कार्यः । "विशमविवादिनीं करोति । विशमेवैतत् संमुखं क्षत्रियमभ्यविवादिनीं करोति" (शत. ब्रा. 3-7-4-3) ॥

(12) यदि च क्षत्रं स्वविरुद्धं किमपि कुर्यात् तदा क्षत्रमुदास्य स्वयमेव स्वरक्षणार्थं किमपि न कर्तव्यम् । स्वापेक्षितं सम्पादयितुं स्वविषये क्षत्रेण कृतं दुष्कृतं शमयितुं च क्षत्रं प्रत्येव विशा गन्तव्यम् । स्वाभीष्टं क्षत्रायैव निवेदनीयम् । तच्च निवेदनमुपांश्वेव कर्तव्यम् । अनेन निवेदनेन यथान्येषामपि जनानां क्षत्रेऽविश्वासो न भवेत् तथा कर्तव्यम् । यदि चोपांशुनिवेदनं निष्फलं भवेत् तदा स्वप्रयत्नस्य वैफल्यमाशङ्क्य स्वयमेव स्वकार्यरक्षणकरणं नानुमतम् । परं चोच्चैर्वा क्षत्राय स्वाभीष्टनिवेदनं कर्तव्यम् । "उपांशूच्चैश्च क्षत्रायाचक्षते" (शत. ब्रा. 11-2-7-15) ॥

(13) क्षत्रतत्त्वं प्रति प्रत्युद्यमश्च न कार्यः । क्षत्रं तावत् धर्मतत्त्वपुरस्कारेणैव निर्वाहं करोति । धर्मश्चानादिपरम्परासिद्धः, अथ वा धर्मशास्त्रैर्निर्णीतो वा । तच्च तत्त्वमनुष्ठानकाले तत्तत्कालानुसारेण विषयानुसारेण च व्याख्याय क्रियते । कदाचित् यदि स निर्णयः प्रत्येकजनाभिलाषविरुद्धमपि भवति, तदा बाधितो जनः स्वाभिलाषापूर्तये

क्षत्रनिर्णयाक्षेपाय प्रत्युद्यमं कुर्यात् । एवं प्रत्युद्यमकरणमनर्थावहमित्युच्यते । यद्येकस्यैकं विरुध्यत इति प्रत्युद्यमः क्रियते तदान्यस्य बाधकाले सोऽपि प्रत्युद्यमं कुर्यात् । अन्ततः क्षत्रतत्त्वस्योच्छित्तिः स्यात् । समुदाययोगक्षेमनिर्वाहकाले कदाचित् प्रत्येकयोगक्षेमस्य बाधो भवेत् । एवं तदा समुदायक्षेमं मनसि निधाय प्रत्येकासौकर्यं क्षन्तव्यमेव । स्वाभिलाषाव्याहतिः संजाता इति क्षत्रं प्रति प्रत्युद्यमो न कार्यः । अयमर्थो मुखान्तरेण ब्राह्मणे एवं प्रतिपादितः । अश्वमेधब्राह्मणे एवं पठ्यते । (शत. ब्रा. 12-2-2-15) ॥ अश्वमेधयागे अश्वस्य अन्येषां पशूनां च याज्यापुरोनुवाक्यादय एकविधा वा भिन्ना वा इति विवादे, ये विभिन्नमेव याज्यादिकं कर्तव्यमिति वदन्ति तेषां मतनिरसनकाले तथाविधकरणेऽनिष्टमावेदयति ब्राह्मणमेवं "क्षत्रं वा अश्वो विडितरे पशवः प्रति प्रतिर्नीहते प्रत्युद्यामिनीं क्षत्राय विशं करोति" इति । अश्वयाज्यापुरोनुवाक्यानुरूपं यद्यन्यपशूनां याज्यापुरोनुवाक्यादिकं क्रियते, तदा अश्वस्य क्षत्रत्वात्, अन्यपशूनां च विट्सदृशत्वात्, विशः क्षत्राय प्रत्युद्यमकारिणो विपरीता भवेयुरित्यनिष्टमापाद्यते । एकविधयाज्यापुरोनुवाक्यकरणेन विशः क्षत्रानुसरिणो भवेयुरित्युच्यते । अतश्च क्षत्रं प्रति प्रत्युद्यमोऽनिष्टावहः । क्षत्रं च विड्भिर्मानयितव्यम् । क्षत्रस्य प्रजार्थमुत्पन्नत्वेऽपि प्रजाभिः क्षत्रं मानयितव्यम्; सर्वरक्षकत्वेनोत्कृष्टत्वात् । अत एव राजानमुपर्यासीनमिमाः प्रजा अधस्तादुपासते; क्षत्राधिकारवान् हि राजा । उपर्यासीना अपि जना राजानं दृष्ट्वा प्रत्यवरोहन्ति । "तस्मादुपर्यासीनं क्षत्रियमधस्तात् इमाः प्रजा उपासते । क्षत्रमेवैतद्विश उत्तरं करोति" (शत. ब्रा. 1-3-4-15) ॥ "तस्मात्क्षत्रियमधस्तात् इमाः प्रजा विशः प्रत्यवरोहन्ति" (3-9-3-6×2-5-2-8) ॥

उग्रं क्षत्रं प्रजा न सहसा क्षत्राय नमेयुः । यतः क्षत्रशक्तिः प्रजासमुदायशक्तिरूपैव । तथा क्षत्रशक्तिः प्रजाधीनस्थितिमत्यपि । परं च यदि प्रजाः क्षत्राय न नमेयुः तदा क्षत्रशक्त्या किमपि न कर्तुं शक्यते । न हि सर्वाः प्रजाः सान्त्वनेनैव संग्राह्याः । केचिदविनीता अपि सन्ति । विनयाधानार्थमुग्रेण क्षत्रेण भवितव्यम् । "उग्रं राष्ट्रमव्यथमसत्" (ऐत. ब्रा. 8-1) । सामभेददानदण्डेषु क्षत्रं दण्डनीतिप्रधानं कदाचित् विशां घातुकमपि भवति । "तस्माद्राष्ट्रं विशं घातुकम्" (तै. ब्रा. 3-8-7-3) ॥ (अत्र राष्ट्रशब्दः क्षत्रशब्दश्च समानार्थकः) क्षत्रतत्त्वं स्वात्मरक्षणार्थं प्रजा उपजीवति । स्वसृष्टक्षत्रतत्त्वरक्षणाय विशः स्वसम्पादितेभ्यो धनादिभ्यः क्षत्राय किञ्चिद्दत्त्वा पोषयन्ति । क्षत्रस्य प्रत्येकं स्वं नास्ति । क्षत्रम् अत्ता, विशोऽद्याः । क्षत्रविशोः अत्तृ-अन्नभावो अर्थतत्त्वानुसारी सम्बन्धः । "अन्नं वै क्षत्रियस्य विट्" (शत. ब्रा. 3-3-2-8) ॥ "सर्वस्यां तद्विशि क्षत्रमत्तारं दधाति" (शत. ब्रा. 7-1-1) ॥ सर्वैरपि विड्भिः क्षत्रपोषणाय दातव्यम् । क्षत्रं वा इन्द्रो विशो विश्वे देवाः । अन्नाद्यमेवास्मै एतत्पुरस्तात् करोति" (शत. ब्रा. 3-9-1-16) ॥

अत्ता एकः; अद्यमपरिमितम् विशः। क्षत्रतत्त्वरक्षणाय बलिं ददति। यदि चात्तारोऽपि बहवः स्युः तदा अन्नं परिमितमेव भवति। अन्नेन न किमप्युपकृतं भवेत्। एकस्य राज्यस्यैकं क्षत्रतत्त्वम्। करदानादिभिः तत्पोषकाः प्रजा बहवः, अत्तारमेवैतत् परिमिततरं करोति। "अद्यमेवैतत् अपरिमिततरं करोति" (शत. ब्रा. 1-3-2-12) ॥ "विश एवैनमन्नाद्यं निरूहति" (मै. सं. 6-6 2) ॥ यतोऽपरिमितस्यान्नस्यात्ता एकः। अत एव क्षत्रेण बलवता वीर्यवता च भवितव्यम्। अत्तारमेवैतत् परिमिततरं कनीयांसं कुर्वन् तस्मिन् वीर्यं बलं दधाति। "अद्यमेवैतत् अपरिमिततरं भूयांसं कुर्वन् तमवीर्यमबलीयांसं करोति" (शत. ब्रा. 1-2-3-14) ॥

क्षत्रेण क्रियमाणं सर्वमपि सर्वदा सर्वेषामपि तृप्तये भवतीति प्रतिपादयितुं न शक्यते। कदाचिदप्रियमपि क्रियते क्षत्रेण। तादृशसमये क्षत्रेण क्रियमाणं प्रजाभिः सोढव्यमेव, विमुखीभिर्न भवितव्यम्। विड्भिः सर्वदा क्षत्राय संमुखैरेव भवितव्यम्; न विवादः कार्यः। "क्षत्रं वै सोमः, विशो ग्रावाणः। विशमेवैतत् संमुखं कृत्वा क्षत्रियमभ्यविवादिनीं करोति" (शत. ब्रा. 3-9-3-3) ॥ दण्डधरत्वं क्षत्रस्य साक्षादेव प्रतिपादितम्। "क्षत्रं वा इन्द्रो वशो मरुतः क्षत्रं वै विशो निषिद्धा" (शत. ब्रा. 2-5-2-27) ॥ एतादृशमुख्यत्वस्य क्षत्रे सत्त्वेऽपि क्षत्रतत्त्वस्य स्थितिः प्रजाधीना एव। अयमर्थः बहुषु स्थलेषु प्रतिपादितः। तन्निरूपयामः—यथा क्षत्रतत्त्वस्यैकस्थत्वं स्वरूपं तथा बहुत्वं विशां स्वरूपम्। "भूम वै विट्। विशि तद्भूमानं दधाति" (शत. 6-6-1-8) "विशः खलु वै राजन्यो भद्रो भवति" (मै. सं. 1-6-5) ॥ क्षत्रस्य क्षेमो विडधीनः, विड्भिरननुसृतं राज्यमभद्रमेव। "राज्ञे समनमत् विशे समनुमत्। यथा राजा विशा समनत्" (तै. सं. 7-5-21-2) ॥ अत्र विशां क्षत्रतत्त्वमूलकराजतत्त्वस्य च परस्परैक्यं प्रतिपाद्यते। परस्परैकमत्येन भद्रं भवतीत्युच्यते ॥

क्षत्रस्य महिमा विडायत्ता। विडभावे क्षत्रमेम न सिध्येत्। "विशैव तत्क्षत्रं परिबृंहति। तदिदं क्षत्रमुभयतो विशं परिबृढम्" (शत. ब्रा. 3-9-1-18) ॥ "विशि राजा प्रतिष्ठितः" (तै. ब्रा. 2-6-5 4) ॥ तस्माद्राजा विशा पर्यूढः (तै. आ. 5-4-9) ॥ क्षत्रविशोः परस्परसंश्लेष आवश्यकः। क्षत्राभावे विट् न स्यात्। विशामभावे क्षत्रमपि न स्यात्। उभयोरपि लक्षणयोः स्वस्वस्वरूपमनपहाय व्यतिषङ्गः कार्यः। क्षत्रं च तत् विशं च करोति" (शात. ब्रा. 6-6-1-7) ॥ "विशैवैनं क्षत्रेण व्यतिषजति" (तै. ब्रा. 2-7-17-2) ॥ "विशैवैनं पर्यूहति" (तै. आ. 5-3-8) (तै. सं. 2-1-9)" विशं चैवास्मै राष्ट्रं च समीची दधाति" (तै. ब्रा. 3-9) ॥ लोकविषये क्षत्रतत्त्वस्य प्रधानत्वात्

ब्रह्मशक्तिरपि क्षत्रस्य नमति । "तस्माद् ब्राह्मणश्च वैश्यश्च क्षत्रियमधस्तादुपासते" (जै. ब्रा.) ॥ (विशं वा एतन्मध्यतः प्रविशति) । "क्षत्रेणैव विशमुभयतः परिगृह्णाति" (का. सं. 11-1) ॥ "क्षत्रमेव विशो मध्यमेषां करोति" (काठ. सं. 21-10) ॥

क्षत्रतत्त्वानुसारिणा राज्ञा विशां प्रीतिसम्पादनमावश्यकम् । यद्यपि क्षत्रतत्त्वं दण्डनीतेः प्रणेतृ, अथापि विट्प्रियत्वमावश्यकम् । "तस्माद्वा एष विशां प्रियः, विशो हि मध्यतोऽभ्यषिच्यते" (तै. ब्रा. 1-8-9-4) ॥

क्षत्रतत्त्वस्यायुधानि ऐतरेयब्राह्मणे प्रतिपादितानि । "अथैतानि क्षत्रस्यायुधानि यदश्वरथः कवच इषधन्वन् इति" (7-19) ॥

क्षत्रविशोः परस्परसम्बन्धविषये क्षत्रानुवर्तित्वे विशाम, विडनुवर्तित्वे क्षत्रस्य च बहूक्तम् । परन्तूभावपि अन्योन्यमर्यादामतिलङ्घ्यान्याक्रमणाय असकृत् प्रयतेते सर्वलोकेतिहासेषु इदमेव तदा तदा दृष्टम् । यदा च प्रजाः क्षत्रानुवर्तनं न कुर्वन्ति तदा कलहो भवति । तथा यदा क्षत्रशक्तिः प्रजा उदास्य यथेष्टं कर्तुं प्रयतते तदापि कलहो भवति । अत उभाभ्यामपि स्वधर्माचरणं कर्तव्यम् । परं तु कदाचित् एवमपि भवति । क्षत्रतत्त्वं स्वमर्यादामतिलङ्घ्य यदा कार्यं करोति तदा अशक्ताः सत्त्वः क्षत्रातिलङ्घनेन संभाव्यमानमनर्थम् जानन्त एव चरन्ति तदा प्रजानामुद्बोधनमावश्यकम् । तथा कदाचिज्जनाः स्वमर्यदामतिलङ्घ्य क्षत्रशक्तिमुदासीनीकृत्य स्वकार्यं कुर्वन्ति । क्षत्रशक्तिश्चासङ्ख्यातानां जनानां पुरस्तात् किमपि कर्तुमशक्ता यदा दुर्बला भवति तदा क्षत्रियशक्तेर्बलाधानमावश्यकं भवति । अत उभाभ्यामपि सर्वदा जागरूकाभ्यां भवितव्यम् । अन्यतरदौर्बल्यं महतेऽनर्थाय कल्पेत । अत उभयोर्मध्ये यद्दुर्बलं भवति तस्य बलसम्पादनमप्यावश्यकम् । अन्यतरौदासीन्यपरिहाराय कदाचित्सङ्घर्षोऽप्यावश्यको भवति । एतदर्थे कर्माणि विहितानि । स्तोत्रशस्त्रेषु कल्पभेदोऽपि विहितः । तानत्र प्रदर्शयामः ॥

"विशैव क्षत्रं हन्ति । ओज एव वीर्यं विश आदाय क्षत्राय क्षत्रायापि दधाति" (काठ. सं. 21-10) ॥ "ओजसैव वीर्येण विशं क्षत्रायापोहति । क्षत्रमेव प्रजास्पर्धि यातयति" (काठ. 29-9) ॥

अत्र दुर्बलस्य क्षत्रस्य विड्भ्यो बालर्थं कर्म । "विशमेव क्षत्रादोजीयसीकरोति" (काठ. सं. 29-8) ॥ अत्र दुर्बलानां प्रजानां बलाधानार्थं कर्म विहितम् ॥

"यः कामयेत क्षत्राय च विशे च संमदं दध्यामिति ऐन्द्रस्यावद्यान् ब्रूयात् इन्द्रायानुब्रूहीत्याश्राव्य ब्रूयात् मरुतो यजेति मारुतस्यावद्यान् ब्रूयात् मरुद्भ्योऽनुब्रूहीत्याश्राव्य ब्रूयात् इन्द्रं यजेति स्व एवैभ्यो भागधेये समदं दधाती"ति । अत्र विहितेन कल्पेन क्षत्रस्य विशा संघर्षः सूच्यते । तथा तत्रैव "यः कामयेत कल्पेरन्निति यथादेवतमवदाय यथादैवतं यजेत् (तै. सं. 2-2-10-2)" ॥ इति क्षत्रविशोः स्वस्वमर्यादायां स्थापनार्थमपि कर्म विहितम् अयमेव कल्पो मैत्रायणीसंहितायामपि श्रूयते (2-1-9) ॥

एतावता प्रबन्धेन क्षत्रस्य, विशः, तयोः परस्परसम्बन्धेषु यद्दृष्टं, तन्निरूपितम् । इतःपरं ब्रह्मतत्त्वसम्बन्धिविषयान् विमृशामः ॥

॥ ब्रह्म ॥

ब्रह्मशब्दोऽयं प्राचीनतमे वैदिकशब्देषु । अयं च शब्द उपनिषत्सु परमार्थतत्त्व-विषयतयापि प्रयुक्तः । परं त्वस्य शब्दस्य राज्यतन्त्ररीत्यातीवमुख्यत्वं दृश्यते । राज्यतन्त्र-प्रधानतत्त्वत्रयेष्वयं मुख्यतमः । अस्य तत्त्वरीत्या ब्रह्माख्यशक्तिपरत्वमेव । अधिकाररीत्या ब्रह्माख्याधिकारवान् पुरुषोऽर्थः । एतच्च स्थानं विट्क्षत्रयोरुभयोरप्युपेकारकं अलौकिकविधया अलौकिकविधया च । "तेजसैव ब्रह्मणोभयतो राष्ट्रं परिगृह्णति" (तै. सं. 2-1-2) ॥ एतच्च क्षत्रशक्त्या साक्षात्संबद्धम्, तद्द्वारा विशामुपकारकम् । ब्रह्मक्षत्रयोगो वैदिक-राज्यतन्त्रस्य मुख्यांशः । ऐतरेयब्राह्मणे "ब्रह्मसमृद्धं क्षत्रं न व्यथते न रिष्यति" इति सुस्पष्टमुक्तम् । अयं च ब्रह्मक्षत्रयोगो धर्मशास्त्रेष्वपि निरूपितः । "नाब्रह्म वर्धते क्षत्रं नाक्षत्रं ब्रह्म चैधते" इति मनुस्मृतौ दृश्यते । संमेलितयोर्ब्रह्मक्षत्रयोः क्षेमप्रार्थना बहुषु स्थलेषु दृश्यते । "स इदं ब्रह्म क्षत्रं पातु" "तादं ब्रह्म क्षत्रं पान्तु" इति ॥ (यजुःसंहितासु वाज. सं. 18-38 तै. सं. 3-4-7-1 मै. सं. 2-12-27 काठ. स. 18-14 कापिष्ठलकठ. सं. 29-37) श्रूयमाणराष्ट्रभृन्मन्त्रेषु प्रार्थना वर्तते । निविन्मन्त्रेषु च "प्रेदम् ब्रह्म प्रेदं क्षत्रम्" इति ब्रह्मक्षत्रमिति प्रार्थना वर्तते । व्याख्यातं चैतत् ब्राह्मणेनैवं प्रेदं ब्रह्म प्रेदं क्षत्रमिति (एकमेव) समस्येत् ब्रह्मक्षत्रयोः "संश्रित्यैतस्मात् ब्रह्म च क्षत्रं च संश्रिते" इति (ऐत. ब्राह्म. 3-11) ॥ तथाग्रयणग्रहग्रहणकाले वाग्विसर्गानन्तरं पठ्यमानमन्त्रेषु "अस्मै ब्रह्मणे पवते अस्मै क्षत्राय पवते" इत्युक्त्वा "ब्रह्मणे क्षत्राय चाह" इति ब्राह्मणेन व्याख्यातम् (शत. 4-3-2-13) ॥ ब्रह्मक्षत्रयोगविषय इतिहासोऽपि ब्राह्मणेषु श्रूयते शतपथब्राह्मणे मैत्रावरुणग्रहब्राह्मणे एवमितिहासः पठ्यते । "ब्रह्मैव मित्रः, क्षत्रं वरुणः, अभिगन्तैव ब्रह्म, कर्ता क्षत्रियः, ते हैते अग्रे नानैवासतुः । ब्रह्म च क्षत्रं च । ततः शशाकैव ब्रह्ममित्रऋते क्षत्राद्वरुणात् स्थातुं न क्षत्रं वरुणः ऋते ब्रह्मणो मित्रात् यद्धि किं च वरुणः कर्म चक्रे अप्रसूतं ब्रह्मा मित्रेण न हैवास्मै तत्समानृधे । स क्षत्रं वरुणो ब्रह्ममित्रमुपामन्त्रयाञ्चक्रे । उपमावर्तस्व । संसृजावहे । पुरस्त्वा करवै । त्वत्प्रसूतं कर्म करवा इति । तथेति तौ समसृजेताम् । तत एष मैत्रावरुणग्रहोऽभवत् । सो एव पुरोधा । तस्माद् ब्राह्मणः सर्वस्यैव क्षत्रियस्य पुरोधां कामयेत संह्येता सृजेते सुकृतं च दुष्कृतं च । नो एव क्षत्रियः सर्वमिव ब्राह्मणं पुरो दधीत संह्येतौ सृजेते सुकृतं च दुष्कृतं च । स यत् ततो वरुणः कर्म चक्रे प्रसूतम् । ब्रह्मणा मित्रेण संहास्मै तदा नृधे । तत्तदवकॢप्तमेव । यद् ब्राह्मणो राजन्योन्यात् । यद्युराजानं लभेत समृद्धम् । तदेतद्धत्वे

588 BVBSSMV

वानवक्लृप्तं यत् क्षत्रियो अब्राह्मणो भवति । यद्ध किञ्च कर्म कुरुते प्रसूतम्। ब्रह्मणा मित्रेण न हैस्मै तत् समृध्यते । तस्मादु क्षत्रियेण कर्म करिष्यमाणेनोपसर्तव्य एव ब्राह्मणः । सं ह वास्मै तत् ब्रह्म प्रसूतं कर्म ऋध्यते" (शत. 4-1-4-1) ॥ अनेनेतिहासेन ब्रह्मक्षत्रयोगः सुस्पष्टं प्रतिपादितः । तत्र ब्रह्मशक्तेः श्रूयमाणमभिगन्तृत्वमवधानार्हम् । तथा क्षत्रियस्य श्रूयमाणं कर्तृत्वमपि । तत्राभिगन्तृत्वं न कर्तृत्वम् । अपि तु समालोचनाय क्षत्रेण ब्रह्मशक्तिं प्रति गमनमेत्र इति गम्यते । क्षत्रिय एव कर्मकर्तृत्वेन कर्ता भवति । पुरोहितवरणार्थं श्रूयमाणमन्त्रेणापि ब्रह्मक्षत्रयोः संबन्धः सुसंश्लिष्ट इति ज्ञायते । तत्र ह्येवं पठ्यते— "भूर्भुवस्सुवरोम् अमोहमस्मि । स त्वं सत्वमस्यमोहाम् । द्यौरहं पृथिवी त्वम् । सामाहम् ऋक्त्वम् । ताविह संवहावहै । पुराण्यस्मा महाभयात् । तनूरसि तन्वं मे पाहि" । इति । अत्र श्रूयमाणः परस्परसम्बन्धो विवाहदम्पत्योः सम्बन्धप्रतिपादकमन्त्रवत् वर्तते । यद्यपि ब्रह्मक्षत्रे विभिन्नतत्त्वे, अथापि तयोः अत्यन्तैक्यमेव कार्यकरमिति अन्यत्रोक्तम् । "अथेन्द्राग्नी असृज्येतां ब्रह्म च क्षत्रं च । अग्निर्वै ब्रह्म इन्द्रः क्षत्रम् । तौ सृष्टौ नानावास्ताम् । तावब्रूताम् । न वा इत्थं सन्तौ शक्ष्याव प्रजां प्रजनयितुम् । एकमुभावसावेति । तदेतद्ब्रह्म च क्षत्रं च" इति विवाहमन्त्रेषु यथावांसमयाव इति एकीभाव उक्तः । एवमेवात्रात्येकीभावः प्रतिपादितः । "एकीभूतौ ब्रह्मक्षत्रावेव विशो रक्षतः" (शत-4.1.5) ॥

ब्रह्मक्षत्रतत्त्वयोर्मध्ये ब्रह्मशक्तेः प्राधान्यं वर्तते । "तत्पुरस्तात्कृत्वा क्षत्रेण कार्यं क्रियते । ब्रह्मानुवर्तित्वं क्षत्रस्यावश्यकम् । ("ब्रह्मणे क्षत्रमनुवर्त्मानं करोति") । ब्रह्मतत्त्वस्य पुरतात् करणम् इतिहासेनापि विवृतम् । ऐतरेयब्राह्मणे एवमितिहासः पठ्यते । "प्रजापतिर्यज्ञमसृजत । यज्ञं सृष्टमनुब्रह्मक्षत्रे असृज्येताम् । ब्रह्मक्षत्रे अनुद्वय्यः प्रजाहुतातादश्चाहुतादश्च । ब्रह्मैवानुहुतादः । क्षत्रमन्वहुतादः एते प्रजाहुतादः । यद् ब्राह्मणाः । अथैता अहुतादो यद्राजन्यो वैश्यः शूद्रः । ताभ्यो यज्ञ उदक्रामत् । तं ब्रह्मक्षत्रे अन्वैताम् । यद्वेव ब्रह्मण आयुधानि ब्रह्मान्वैत् । यानि क्षत्रस्य तैः क्षत्रम् । एतानि वै ब्रह्मण आयुधानि । यद्यज्ञायुधानि । अथैतानि क्षत्रस्यायुधानि । यदश्वरथः कवच इषुधन्व इति । तं क्षत्रमन्वाप्यन्यवर्तत । आयुधेभ्यो ह्यस्य विजमानः । चरान्दी ऐत् । अथैनं ब्रह्मा न्वैत् । तदाप्नोत् । तमाप्त्वा पुरस्तान्निरुध्यातिष्ठत् । स आप्तः परस्तान्निरुद्धस्तिष्ठन् ज्ञात्वा स्वान्यायुधानि ब्रह्मोपावर्तत । तस्माद्धा वे वर्हि यज्ञो ब्रह्मण्येव ब्राह्मणेषु प्रतिष्ठितः । अथैनत् क्षत्रमन्वागच्छत् । तदब्रवीत् उपमास्मिन्यज्ञे ह्वयस्वेति । तन्गयेत्यब्रवीत् । तद्वै निधाय स्वान्यायुधानि ब्रह्मण एवायुधैर्ब्रह्मणो रूपेण ब्रह्म भूत्वा यज्ञमुपावर्तस्वेति । तथेति तत् क्षत्रं निधाय स्वान्यायुधानि ब्रह्मण एवायुधैः ब्रह्म भूत्वा यज्ञमुपावर्तत" इति । अत्र क्षत्रापेक्षया ब्रह्मतत्त्वस्य प्राधान्यं प्रतिपादितम् । यद्यपि ब्रह्मतत्त्वं क्षत्रतत्त्ववत् प्रजार्थमेव ; अथापि । ब्रह्मतत्त्वस्य लौकिकविषयेऽधिकारो

VMSSSVB

नानुमतः । न नेतृत्वमपि । न राज्याधिकारोऽपि । "न वै ब्राह्मणे राष्ट्रं रमते" (3-9-14-3) ॥ "क्षत्रं रमते" (शत. ब्रा. 13-1-6-3) ॥ यथा वा क्षत्रं क्षत्रिये प्रतिष्ठितम् एवं ब्रह्मशक्तिर्ब्राह्मणे प्रतिष्ठिता" "ब्रह्म ब्राह्मण आत्मना" ॥ (तै. ब्रा. 2-8-8-8) ॥ ब्रह्म च क्षत्रं च सम्भूयैव समुदायस्य नेतृत्वं वहतः । ब्रह्मालौकिकविधया नेता भवति । क्षत्रं च लौकिकविधया । एतदभिप्रायकवाक्यान्युदाहरिष्यामः ॥ "ब्रह्मणा च क्षत्रेण चोभयतो राष्ट्रं परिगृहीतं भवति" (तै. ब्रा. 3-9-14-3) ॥ ब्रह्मणा च क्षत्रेण चोभयतः श्रीः परिगृहीता भवति" (तै. ब्रा. 3-9-14-2) ॥ (शत. 13-1-5-3) ॥ अत्र राष्ट्रस्य श्रियश्च परिगृहीतत्वं प्रतिपाद्यते । 'ब्रह्मणा च क्षत्रेण चोभाभ्यां समिन्धे" (जै. ब्रा.) ॥ "ब्रह्म वा अग्निः । क्षत्रमिन्द्रः । ते उभे संरभ्य सयुजौ कृत्वा" (शत. 10-4-1-9) ॥

उभौ सम्भूय प्रजानां भारं वहतः । चातुर्मास्यान्तर्गते वरुणप्रघासयागे उत्तरस्यां वेद्याम् अन्यानि हवींषि सादयति, दक्षिणायां मारुतीम् इति कश्चन कल्पो विहितः । तत्र मरुतां विट्सदृशत्वात् मारुत्यामिक्षायाः पृथक् सादनं विवृण्वद्ब्राह्मणम् "अपधुरमेवैना युनन्ति । अतो ओज एवासामपहरति । तस्माद्ब्राह्मणश्च क्षत्रं च विशाऽन्यतोपक्रमणीः" इति वदति । यतो ब्रह्म च क्षत्रं च प्रजानां कार्यं निर्वहतः । अत एव प्रजा अपधुरा भवन्ति । विशां बलं ब्रह्मक्षत्राभ्यामपहृतमिति सूच्यते । प्रजानां स्वभाववर्णनमपि तत्र क्रियते । ब्रह्मक्षत्रतत्त्वयोः संहितशक्तिरूपत्वात् उभावपि प्रतार्यान्यग्रामम् अन्यद्राज्यं व गन्तुं प्रजाः प्रयतन्ते ॥

यद्यपि ब्रह्मतत्त्वमुत्कृष्टम्, अथापि लोकव्यवहारे तस्य स्थितिः क्षत्राधीना । "तस्माद्ब्राह्मणो राजानमनुवशम्" (शत. ब्रा. 4-4-2-1) ॥ यथा वा लोकविषये क्षत्रियस्य प्रधानत्वात् तदनुसारित्वमितरेषां वर्णानाम्, एवमलौकिकविषये ब्रह्मशक्तियुक्तस्य ब्राह्मणस्य प्रधानत्वात् इतरेषां क्षत्रियादीनां तदनुसारित्वमावश्यकम् । तस्माद्ब्राह्मणमायान्तमितरेऽनुयान्ति । प्रजानां व्यवहारस्य लौकिकस्यालौकिकस्य वा ब्रह्मक्षत्राधीनत्वात् तावुभावेव सर्वमित्युच्यते । "सर्वं वा एतत् क्षत्रियो वा पुरोहितो वा" (शत. ब्रा. 6-6 3-10) ॥

ब्रह्मतत्त्वस्य क्षत्रापेक्षया उत्कृष्टत्वात् क्षत्रापेक्षया ब्रह्मतत्त्वस्य मानादिषु पूर्वत्वमुच्यते ॥ "ब्रह्म खलु वै क्षत्रात् पूवम्" (ऐत. ब्रा. 8-1) ॥ उभयोः क्षत्रब्रह्मतत्त्वयोः प्रजानां योगक्षमरक्षेणविषये जागरूकत्वस्यावश्यंभावात् अस्मिन्विषये परस्पराश्रयत्वमुच्यते । "ब्रह्मणि खलु वै क्षत्रं प्रतिष्ठितम्, क्षत्रे ब्रह्म" (ऐत-ब्रा-8-1) ॥ परस्परोपकारेण परस्परतीक्ष्णीकरणमप्युच्यते । तीक्ष्णीकरणत्वं स्वकार्येऽप्याशुत्वमेव । व्यग्रेण हि कार्यकरणं शक्यते; न त्वव्यग्रेण । ब्रह्म क्षत्रं बोधयति स्वकर्तव्यविषये । तथा क्षत्रमपि ब्रह्म बोधयति । एतादृश-

परस्परबोधनमुक्तम् । "ब्रह्मणैव क्षत्रं संश्यति । क्षत्रेण ब्रह्म" (5-1-10-2) ॥ "ब्रह्मक्षत्रयोः संश्रित्यै, तस्मात् ब्रह्म च क्षत्रं च संश्रिते" (ऐत. ब्रा. 3-11) ॥ ब्रह्मणैव क्षत्रं दाधार, क्षत्रेण ब्रह्म, तथा हास्मात् राष्ट्रमनवकामि भवति" (जै. ब्रा. 1-182) ॥ तादृशब्रह्मक्षत्रं परस्परोपकारेणमेव राष्ट्रं स्थिरं भवति इत्युच्यते ॥

ब्रह्मशक्तिपरिगृहीतमेव क्षत्रं प्रजानां क्षेमाय भवति । "ब्रह्मणैव तदुभयतः क्षत्रं परिगृह्णाति" (जै. ब्रा.) "ब्रह्मैव तत् क्षत्रे प्रतिष्ठापयति । क्षत्रमेव तद् ब्रह्म तत्प्रतिष्ठापयति । उभयं ब्रह्म च क्षत्रं चावरुन्धे" (जै. ब्रा.) । परस्पराश्रयत्वमत्र स्पष्टम् ॥

"ब्रह्मण एव क्षत्रमनुवर्त्मानं करोति" । ब्रह्मानुवर्तित्वं क्षत्रस्य प्रतिपाद्यते । न क्षत्रतत्त्वमात्रस्य । अपि तु विशामपि ब्रह्मानुवर्तित्वमावश्यकम् । "ब्रह्मणे क्षत्रं च विशं चानुगे करोति" (पञ्चविंशब्रा. 15 5) "क्षत्रं ब्रह्मणा ओतं प्रोतमिव मिश्रितम् । ब्रह्मणा क्षत्रं सञ्चविचैति" (मै. सं. 3-1-9) ॥

यदा क्षत्रं स्वकार्यकरणे स्वाशक्तिं जानाति तदा ब्रह्मतत्त्वस्य मुख्यत्वं निश्चिनोति । कंचिद्ब्राह्मणं प्रजारक्षणसाहाय्यं कर्तुं पुरोहितत्वेन करोति । (काठ-सं 34-17) ॥

क्षत्रशक्तिषु यत्पुरोहितशक्तेर्ब्रह्मशक्तेर्वा मुख्यत्वं जानाति, तदेव क्षत्रमितरक्षत्रापेक्षया श्रेष्ठम् । ब्रह्मशक्त्यननुगृहीतं क्षत्रं प्रजारक्षणाय न प्रभवति । "तस्माद् ब्रह्म पुरोहितं क्षत्रमन्यानि क्षत्राणि" (काठ. सं. 19-10) ॥

यदा च प्रजाः क्षत्रातिलङ्घिनः क्षत्रम् उदास्य रक्षकाभावात् शैथिल्यं प्राप्तम्, तदा क्षत्रबलापेक्षया ब्रह्मशक्तेरुत्कृष्टत्वात् तेन प्रजानां ब्रह्मशक्तावन्तर्भावेन शैथिल्यनिवारणं क्रियते । ब्रह्मन्नेव विशं विनाशयति दृढिम्ने अशिथिलत्वाय" (मै. सं. 2-2-3) ॥

ब्रह्ममुख एव राष्ट्रे प्रजाः क्षत्राय नमन्ति । क्षत्रानुवर्त्मानस्तत्रैव प्रजा भवन्ति । अतश्च क्षत्रवत् ब्रह्मशक्तिरपि वैदिकराज्यतन्त्रे मुख्या भवति ॥

ब्रह्मक्षत्रसहयोगविषये वेदविमर्शकेष्वतिप्रसिद्धेन आनन्दकुमारस्वामिमहाशयेन कश्चन ग्रन्थोऽपि कृतः ॥ (Spiritual and Temporal Power in the Indian theory of Government) तत्र बहूनां मन्त्रब्राह्मणवाक्यानां साहाय्येन ब्रह्मक्षत्रतत्त्वं सुस्पष्टं प्रतिपादितम् ॥

॥ जनतन्त्रतत्त्वं तदीयं स्थानं च ॥

जनतन्त्रशब्देन आधुनिकैः 'डिमाक्रसी'शब्देन यत्तत्त्वं प्रतिपाद्यते तदेवास्माभिरपि गृह्यते। जनैरेव जनानामर्थे जनानां व्यवहारकरणं जनतन्त्रवाच्यम्, नात्र राजतत्त्वस्यावसरः॥ अस्य चार्थो निर्णीतः आधुनिकैः पूर्वोक्तरीत्या राज्यतन्त्रसंबन्धितत्त्वपरिशीलनेन। जनप्रधानता च मुख्यांशः। अयमर्थो राज्यतन्त्रविमर्शकैः ऐकमत्येनाङ्गीकृतः। यत्र जनैरेव स्वार्थं जनसम्बन्धितया राज्यतन्त्रव्यवहारः क्रियते, तदेव 'डिमाक्रसी'शब्दवाच्यमिति निर्णीतम्। अयमंशो राजप्रधानराजतन्त्रतत्त्वस्य प्रतिपक्षभूतः, यतो राजप्रधानराज्यतन्त्रे राज्ञः प्राधान्यं जनानामप्राधान्यं च। राजा तावत् पारम्पर्यक्रमागतो वा भवतु। अथ वा स्वबलेनैवाधिपत्यं प्राप्तो वा भवतु। तत्र जनानां न प्राधान्यम्। राजा तत्र यथेच्छं कर्तुं शक्तः। जनाः तदङ्गीकुर्वन्तु वा न वा। परं तु जनतन्त्रे न एतादृशी परिस्थितिः। सर्वथा जनानामेव प्राधान्यम्। राजाख्यस्थानस्यात्रकाशो न वर्तते। इदं चावश्यं ज्ञातव्यम्। यत् जनतन्त्रानुसारेण जनेभ्य एव पालकस्याधिकाराविर्भावः। अतः पालकं स्थानं स्वार्थं स्वयमेव सृष्टं जनैः। तच्च स्थानं स्वीयमेव। परं तु इदं च तत्त्वं मूलभूतमेव। परं तु एतादृशाभिप्रायस्य कथं वा रूपनिष्पत्तिर्भवतीति अत्र महानभिप्रायभेदो वर्तते। जनतन्त्रानुसारिराज्यतन्त्रेषु अस्याभिप्रायस्य बहूनि मुखानि दृश्यन्ते। जनाः सम्भूय स्वकार्यनिर्वाहार्थमेकमुद्धरन्ति॥ स च यावज्जनाभिप्रायानुकूल्यम् अधिकारस्थाने तिष्ठति। तच्च यावज्जन्मभावि वा भवतु। किञ्चिद्वर्षपरिमितं वा भवतु। सर्वथा तस्य स्थितिर्जनायत्ता। किं च सर्वैरपि जनैः संभूय सर्वथा विवादकरणं निर्णयकरणं चाशक्यमिति मत्वा सर्वेऽपि जनाः स्वप्रतिनिधित्वेन कांश्चिन्नियोजयन्ति। त एव जनानामभिप्रायं निर्णयन्ति। एतादृशाः प्रतिनिधयः संभूय एकं कस्मिंश्चित् अध्यक्षस्थाने नियोजयन्ति। स एव कार्यनिर्वाहकः। तस्य कार्यनिर्वाहसाहाय्यार्थमाधिकारिकपुरुषा अपि नियुक्ता भवेयुः। एतादृशराज्यतन्त्रमेव जनतन्त्रानुसारीति सर्वैरप्युद्घुष्यते। परं तु प्राचीनमध्यमाधुनिककालीनचरित्रविमर्शनेन एतदेव भवति— यत् जनतन्त्रतत्त्वानुसारिभिर्बहवो मार्गा आदृता इति। ग्रीक्देशे (सिटिस्टेट) इति यत् तत्त्वमासीत् तत्र यद्यपि जनाः स्वप्रतिनिधिं नियोजितवन्तः समित्याम्। अथापि नात्र सर्वेषां जनानां प्राधान्यमभूत्। दासभूतानां जनानां प्रतिनिधिनियोजने नाधिकार आसीत्। तथा इदानीं वर्तमाने राज्यतन्त्रे च सर्वैरपि उद्घुष्यते। अहमेव जनतन्त्रानुसारीति। परन्तु इदानीं वर्तमानजनतन्त्रतत्त्वं विभिन्नमुखं दृश्यते। अमेरिकादेशे जनाः स्वप्रतिनिधिम्

एलक्षनूद्वारा नियोजयन्ति । तत्र प्रतिनिधयः स्वकार्यनिर्वाहं किमपि न नियोजयन्ति । परं तु जना एव राज्यकार्यनिर्वाहार्थं जनाधिपतिम् अथ वा राष्ट्रपतिं नियोजयन्ति । इदं च जनतन्त्रतत्त्वस्यैकं मुखम् । अत्र राष्ट्रपतेः स्वकार्यनिर्वाहविषये सर्वथा प्राधान्यं जनप्रतिनिधिसभाया जनाभिप्रायाविष्करणमेव कार्यम् । अत्र च सर्वमपि कार्यजातं जनाधिपतिनैव स्वेन स्वनियुक्तपुरुषद्वारा च क्रियत इति संकेतः । परं तु न वयं जानीमः किमर्थं राष्ट्रपतिः किमर्थं जनप्रतिनिधिसभा इति; उभयोर्विरोधे कस्य प्राधान्यमिति च । उभयोरपि जनप्रतिनिधित्वात्, अन्यतरस्य प्राधान्यप्रतिपादकं दुःशकमेव । तथा ब्रिटन् देशे जनाः स्वकार्यनिर्वाहार्थम् एलक्षनद्वारा स्वप्रतिनिधीन् वरयन्ति । तत्र च तत्कार्यनिर्वाहार्थं मन्त्रिसभा अपि निर्मिता । जनप्रतिनिधिभ्य एव मन्त्रिणोऽपि समुद्धृताः । प्रतिनिधिसभया तदा तदा यन्निर्णीयते तदेव मन्त्रिसभया च क्रियते । यावत्प्रतिनिधिसभानुकूल्यं मन्त्रिसभा प्रचलति । प्रतिकूलायां प्रतिनिधिसभायां मन्त्रिसभा बहिर्गच्छति । परं त्वत्र कश्चन राजा वर्तते । स तावत् जनैर्न वृतः । मन्त्रिसभा पुनर्जनैरेव वृता । मन्त्रिणः स्वकार्यकरणकाले राजादेशं पुरस्कृत्य कार्यं कुर्म इति वदन्ति । इदं च जनतन्त्रतत्त्वस्यान्यन्मुखम् ।

फ्रैंस् देश एव आधुनिककाले शुद्धं जनतन्त्रं वर्तत इति प्रथा । जनेभ्य एव जन परिपालनं कुर्वन्तीति । इदं तत्त्व तत्रैवोत्पन्नमिति वदन्ति । तत्र जनप्रतिनिधयः स्वकार्यनिर्वाहार्थं मन्त्रिसभां नियोजयन्ति । परं तु राष्ट्रपतिमपि ते साक्षान्नियोजयन्ति । अथापि मन्त्रिसभा जनप्रतिनिधिभ्य एवोत्तरदायिनी । जनाधिपतिश्च मन्त्रिसभाद्वारैव कार्यजातं करोति । तथा सोवियद्रष्यादेशेऽपि प्रतिनिधिसभा जनैर्नियोजिता भवति । तथा मन्त्रिसभा अपि । परं तु जनाधिपतिनियोजनं प्रतिनिधिसभयैव क्रियते । अतश्च ज्ञायते जनतन्त्रतत्त्व बहुमुखमिति । परंतु जनाभिप्रायप्राधान्यमेव जनतन्त्रस्य मुख्यतया वर्तते । यद्यपि वेदेषु तत्र तत्र राजानः श्रूयन्ते, अथापि जनानामभिप्रायस्यैव वेदराज्यतन्त्रे प्राधान्यं वर्तत इति निश्चीयते । जनतन्त्रतत्त्वमूलभूता अंशा वैदिकराज्यतन्त्रे सुरक्षिता एव दृश्यन्ते । इदमपि जनतन्त्रतत्त्वस्यान्यन्मुखान्तरम् । यथा वा वैदिकराज्यतन्त्रतत्त्वरीत्या प्रजाभ्य एव राज्ञोऽधिकार आयाति । अतश्च राजापेक्षया प्रजा एव प्रधानाः । राजस्थानं च स्वरक्षणार्थं जनैरेव कल्पितम् केषुचित् स्थलेषु राज्ञः साक्षात् प्रजाभिः संवरणमपि दृश्यते । तत्रापि जनाभिप्रायाविष्करणार्थं समासमित्यादयः सन्ति । यत्र पुना राज्ञो वरणं न दृश्यते अपि तु परम्परयागतः, तत्रापि राज्ञः सभासमित्यादिद्वारा प्रजाभिप्रायं निर्णीय तदनुसारेण कार्यकरणमावश्यकम् । राज्ञः स्थितिः समासमित्यायत्तैव । अतो वैदिकराज्यतन्त्रतत्त्वमपि जनप्रधानमेव । तत्र जनतन्त्रं मुखान्तरेण वर्तत इत्यङ्गीकार्यमेव । तत्र सभासमित्यादय एव प्रधानभूताः । तादृशस्थानानि जनतन्त्रतत्त्वमूलकान्येव एतेषां विवरणमुपरिष्टाद्भविष्यति ॥

॥ जनतन्त्रानुसारिस्थानसभ्याः ॥

वैदिकराज्यतन्त्रे जनानामभिप्रायस्य प्राधान्यं सुव्यक्तमेव । जनाश्च स्वाभिप्रायं सभासमितिद्वारा प्रकटीकृतवन्त इत्यपि निर्विवादम् । अथापि सभायां अथ वा समित्यां कथं वा जनानां प्रातिनिध्यं अभूदिति विचारणीयं भवति । यदा वा जना अल्पीयांसोऽभूवन् राज्यं चाल्पीयोऽभवत् तदा सर्वेषां जनानां सम्मेलनं स्वाभिप्रायाविष्करणं च सुकरमभूत् । यदा जनवृद्धिरभूत्, तदा न सर्वेषां सम्मेलनं संभवति । प्राचीनतमे काले जनाः कृषिमेकमेव स्वजीवनार्थमादृतवन्तः । परं तु क्रमशोऽन्या अन्या वृत्तयोऽपि जनैरङ्गीकृताः । अतश्च गच्छता कालेन कृषिव्यतिरिक्ता अन्ये बहवो विषयाः तादृशस्थानेषु विचारिता इति प्रतीयते । यदा जनानां संख्या अतीव प्रवृद्धा तदा सभायां के आगताः के नागता इति चिन्तनीयं भवति । यद्यप्यस्मिन्विषये ऋक्संहितायाम् अथर्वसंहितायां च साधकं किमपि प्रमाणं नास्ति, अथापि तयोः संहितयोरेव प्रयुज्यमानगणशब्दः किञ्चिदिवात्रोपकरोति । ततो ज्ञायते ऋग्वेदकालेऽपि राज्यतन्त्ररीत्या व्यवहारार्थं जना गणशो विभक्ता इति । गणपतिरपि राज्यतन्त्रे संबद्ध एव । यथा ऋग्वेद एव ब्रह्मक्षत्रविट्भाग उक्तः, तथा विशोऽपि गणशो विभक्ता इत्यपि वक्तुं शक्यते । यद्यपि विशां गणशो विभागे ऋग्वेदो न साक्षात् प्रमाणं भवति ; अथापि अस्मिन्विषये ब्राह्मणभागा बहूपकुर्वन्ति । विश एव गणशो विभक्ता इति ब्रह्मणेषु बहुवारं निरूपितम् । "गणश एवास्मै विशं करोति । गणश एव विशम् अनुवर्त्मानं करोती"ति । ऋग्वेददेवतासु मरुतो गणशो विभक्ताः सप्त सप्त विभक्ताः प्रतिगणं गणपतिपरपि एकोऽस्ति । एवं मरुतां परिगणनं मानुषविट्परिगणनप्रयुक्तमेव । अस्तु वा विपरीतम् । अथापि विशो गणश एव विभक्ता इत्यत्र न कोऽपि सन्देहः । कश्च गणपतिः ? सजात इति ब्रूमः । "सजातैरेवैनं गणवन्तं करोति" इति प्रतिपादनात् । सजाताश्च संभूय जनाभिप्रायं आविष्कृतवन्तः । "सजातानेवास्मै अनुकान् करोति" इति दर्शनात् । यथा वा राज्ञः सजातैः सम्बन्ध एवं ग्रामिणोऽपि सजातैस्सम्बन्धो दृश्यते । "सजातान् प्रयच्छति ग्राम्येव भवति" इति दर्शनात् । अयं च ग्रामी ग्रामिण्यपेक्षया भिन्नो वा स एव वा इति न निश्चेतुं शक्यते । परं तु यजुर्ब्राह्मणेषु ग्रामीशब्द एव प्रयुक्तः । अयं च ग्रामी सजातैः समृद्धः । तैत्तिरीयब्राह्मणे श्रूयमाणब्राह्मणवाक्यानुसरणे इदं ज्ञायते । यत् ग्रामी ग्रामणी चैक इति । यतः सजातसम्बन्धं ग्रामिणो वदन्ति कानिचिद्वाक्यानि । कानिचित् पुनः सजातसम्बन्धं ग्रामण्ये वदति "तस्माद् ग्रामणीः सजातैः पर्यूढः" इति । परं तु केन कारणेन

ग्रामणीपदं परित्यज्य ग्रामिपदमादतामिति न ज्ञायते । ग्रामणीपदं तावत् ग्रामनेतृत्वपरम् । अत्र च कस्यचित् पुरुषस्य प्राधान्यं भवति । जनानां पुनरप्राधान्यम् । ग्रामिपदे पुनर्जनानां प्राधान्यं दृश्यते । यतो ग्रामिणीपदेन कस्यचित् प्राधान्यं सूच्यते । ग्रामीपदेन ग्रामाधीनस्थितित्वं कस्ययित् । अस्य विचारोऽन्यत्र ग्रामः स जातश्चेत्यत्र कृतः । परं तु ग्रामीग्रामणी व्यवहारस्य विट्सु गणशो विभागस्य च ब्राह्मणेषु बहुलमुपलम्भात् ऋग्वेदकालानन्तरमेव तादृशव्यवहारा राज्यतन्त्रे परिणता इत्यपि वक्तुं शक्यते । ब्राह्मणेषु यथा वा सजातानुवृत्तिप्राप्त्यर्थं ग्रामीप्राप्त्यर्थं च प्रजानां गणशो विभागप्रतिष्ठार्थं च कर्माणि विहितानि, नैवं सभासमितिप्रतिष्ठार्थं कर्माणि दृश्यन्ते । अत एवमपि वक्तुं शक्यते । जनतन्त्रतत्त्वानुसारिस्थानानि ऋङ्मन्त्रकाले अथर्वमन्त्रकालेऽपि संकुचितान्येवासन् । साक्षादेव जनास्तत्र सङ्गता असन् । ब्राह्मणरीत्या कर्मतत्त्वेषु विस्तृतेषु कालेषु पुनर्जनसमुदायस्य सुतरामभिवृद्धत्वात् प्रजानां गणशो विभागः सजातद्वारा राज्ञां जनानां च सम्बन्ध उत्पन्नः । तथा एकस्मिन्नेव राज्ये बहूनां ग्रामानां सत्त्वात् प्रतिग्रामं ग्रामण्यः सभा । तत्रापि सजातद्वारा प्रजानां ग्राम्येण वा ग्रामिणा सम्बन्ध इति वक्तुं शक्यते । यथा वा राजसभा मन्त्रब्राह्मणेषु प्रसिद्धा तथा ग्रामसभा अपि प्रसिद्धा वर्तते । इदमप्यवश्यं ज्ञातव्यम् —यत् एकस्मिन्नेव काले ग्रामसभाया राज्यसभायाश्च सत्तादर्शनात् अनयोर्भिन्नमेव कार्यजातमिति । किं च, उपनिषत्सु सभासमित्यादिषु तत्त्वविचारः कृत इति प्रतीयते । तेन तत्काले तादृशीनांसभानां वेदान्तविचारमात्रपरत्वमङ्गीकृतव्यं भवति । अथ वा सामुदायिकविचारसमाप्त्यनन्तरम् एतादृशा विषया विचारिता इति अभ्युपगन्तव्यं भवति । यजुर्मन्त्रेषु ब्राह्मणेषु च सभाया द्यूनसम्बन्धः प्रसिद्ध एव । पञ्चस्वग्निषु एकस्य सभ्याग्निरिति व्यवहरणं वर्तते । प्रतिगृहं च सभ्याग्निर्वर्तते । सभ्याग्निश्च सभायामेव कृतः । अतो ज्ञायते प्रतिगृहं सभा आसीदिति । तस्यां च सभायां गृहागतजनैः संभाषणादिकं क्रियते । तत्राधिदेवनमपि कृतमिति ज्ञायते अधिदेवनेन सजातानां अवरोधो भवति "अधिदेवने जुहोति । अधिदेवन एवास्मै सजातानवरुन्धेत एनमवरुद्धा उपतिष्ठन्ते") इदं च द्यूतकरणं गृहग्रामराज्यसभासाधारणमेव । समुदायविषयविवादानन्तरं तत्रैव द्यूनमपि कृतमिति वैदिककोशकारा अप्यभिप्रयन्ति । द्यूनकरणेन नास्याः सभाया राज्यतन्त्ररीत्या संभाव्यमानं मुख्यत्वं हीयते ॥

सभायां समित्यां सम्बद्धस्य पुरुषस्य "सामितेय." "सभ्याः" "आमन्त्रणीयः" इति नाम निर्दिश्यते । परं तु तादृशसभ्यत्वादिकं सर्वजनसाधारणं वा अथ वा विशिष्टाना केषाञ्चिदेव वेति निर्णेतव्यम् । अत्र ऊह एवास्माकं शरणम् । आधुनिकाश्चरित्रशास्त्रविमर्शका अपि नात्र ऐकमत्यं प्रकाशयन्ति । अस्मिन् विषये अस्माकमभिप्रायस्त्वेवम्—

संस्कृतिप्रारम्भकाले जनसंख्याया अल्पत्वात् तत्तज्जातिसभानां प्रसिद्धत्वात् सर्वेषामेव सभ्यत्वम् । जनसंख्या यदात्यन्तमभिवृद्धा तदा तदा जनैरङ्गीकृतानां प्रतिनिधीनामेव सभ्यत्वम् । समितिश्च सार्वजनीना सभा सभायां च राज्ञो विशिष्टानां केषाञ्चन समागमः ॥

जना विशो ग्रामा इत्यादीनि पदानि जनवाचकतया प्रयुक्तानि । एतेषां पदानां विभिन्नार्थपरत्वं स्पष्टमेव । अत्र जनशब्दः साधारणजनपरः । विट्शब्दः पुनर्यत्र जनाः शाश्वतं स्थिताः तादृशार्थपरः । तथा ग्रामशब्दस्यापि इतस्ततो गच्छन्तो जना इत्यर्थः । इतस्ततः सञ्चरन्तो जना अन्यैर्जनैः साकं संघर्षं प्राप्तवन्तो भवन्ति । यतस्सचरन्तो जनाः स्वरक्षणार्थं सायुधा एव गच्छन्ति । अयं च ग्रामशब्दो गच्छता कालेन केवलयोद्धृपरतया व्याख्यातः । संग्रामशब्दार्थाश्च युद्धं इत्यपि व्याख्यातम् । गणशो विभक्ता जना ग्राम्यवादिद्वारा स्वकार्यनिर्वाहं कृतवन्तः । तत्तद्ग्रामे ग्रामी वर्तते । सजाताश्च ग्रामिणः सभासदस्ते गणानां प्रतिनिधयः । ग्राम्यवादिनः कार्यं ग्रामनिर्वाह एव । परं तु सर्वग्रामसजाता राज्ञ उपकारकाः । तद्द्वारैव राज्ञो विशा सम्बन्धः । सजाता गणेभ्यः कथम् उद्धृता इति ज्ञातुं न शक्यते । अथापि गणप्रतिनिधीनां सजातानामेव मुख्यत्वं राजतन्त्रे । यद्यपि गणतन्त्र इति साक्षाद्व्यवहारो मन्त्रेषु ब्राह्मणेषु वा न विद्यते, अथापि राज्यतन्त्रव्यवहार-सम्बन्धेन तत्र तत्र गणशब्दप्रयोगात् इदं च राज्यतन्त्रं गणतन्त्रमिति ज्ञायते । गणतन्त्रेण सहैव राज्ञा स्थित्यवगमात् वैदिकराज्ये राजस्थानं च गणतन्त्रस्य मुखान्तरमित्यपि वक्तुं शक्यते ॥

वैदिकजनसमुदायराज्यतन्त्रे राजतत्त्वं कथमुदपद्यत ? इत्यत्राप्यभिप्रायभेदोऽस्ति । जिह्मर्-महाशयाः कुटुम्बदृष्टान्तेन (Patriarchal) राजतत्त्वमुत्पन्नमिति वदन्ति । वैदिक-कोशकर्तारस्तु यथा ग्रीक्जर्मन्जनसमुदायेनान्यदेशाक्रमणकाले राजतत्त्वमुत्पादितम् , एवमेव भारतदेशाक्रमणकाले ऋङ्मन्त्रकालीनजनै राजतत्त्वमुत्पादितमिति वदन्ति । उभयमपि न संगच्छते । ऋङ्मन्त्रकालीना जना भारतदेशस्यागन्तुका इत्यत्र ऋङ्मन्त्रेषु प्रमाणलेशोऽपि न दृश्यते । ऋङ्मन्त्रेषु च परिदृश्यमानसंस्कृतेर्न प्राचीनतमत्वम् , अथवापरिणतत्वं वा दृश्यते । तत्र परिणतसंस्कृतेरेव दर्शनात् ऋङ्मन्त्रकालात् पूर्वं राजतत्त्वस्य कथमुत्पत्ति-रभूदिति ऋङ्मन्त्रेभ्यो ज्ञातुं दुःशकत्वात् , ऋङ्मन्त्रेषु परिणतमेव राजतत्त्वं दृश्यत इति सर्वैरङ्गीकार्यमेव ॥

॥ जनतन्त्रस्थानानि ॥

एकत्र जनाः सम्भूय स्थित्वा स्वसमुदायसंबद्धानां विषयाणां विचारं कृतवन्तः। वैदिकराज्यतन्त्रतत्त्वरीत्या एतेषां मुख्यत्वमपि निर्श्चीयते । राज्ञः स्थितिरपि एतदायत्ता एव। यदि जनतन्त्रस्थानानि प्रतिकूलानि भवेयुः, तदा राज्ञ उद्वासनं भवति। राजा च सभानुकूल-काले सम्भैर्यत् निर्णीयते तत्करोति । ततश्चायं कार्यनिर्वाहकोऽधिकारपुरुषः । स्वकार्य-निर्वाहार्थं चाधिकारपुरुषान् नियुनक्ति । तेषां साहाय्येन राज्यनिर्वाहं च करोति। तादृशजनतन्त्रस्थानानां सभा-समिति-विदथ-सङ्गति-आमन्त्रण-परिषत्-संसत्-संग्राम-इत्येतानि बहूनि नामानि सन्ति । जनतन्त्रतन्त्रमूलस्थानान्येते परं त्वेतेषां मध्ये सभासमित्योः प्रार्थनाप्रतिपादकं सूक्तद्वयं वर्तते । एकम् ऋग्वेदे, अपरं चाथर्ववेदे, तथा विदथस्य यद्यपि साक्षात्प्रार्थनाप्रतिपादकं मन्त्रजातं नास्ति, अथापि विदथस्य प्रस्तावः ऋग्वेदमन्त्रेषु बहुवारं क्रियते । संग्रामसंगत्याख्यानां स्थानानां अथर्ववेदेष्वेव प्रस्तावो वर्तते । आमन्त्रणाख्यं स्थानम् अथर्ववेदे प्रस्तुतम् । परं तु कापिष्ठलकठसंहितायां कठसंहितायां च तत्स्वरूपविवरणं कृतम् । तथा परिषदाख्यं स्थानम् उपनिषत्सु प्रसिद्धम् । स्त्रीणां संसदः प्रस्तावः "सत्नीसंसादं" इति तैत्तिरीयसंहितायां (2-5-1-5) वर्तते । संसदः प्रस्तावोऽन्यत्रापि ऋग्वेदे (4-1-8,8-92-20,8-94-15,7-54-3, 1-94-1,7-4-3) दृश्यते । एतेषां मध्ये सभासमितिसंगतिसंसत्संग्रामइत्यादिषु नामधेयेषु समित्युपसर्गो दृश्यते । अस्यैकीभावार्थत्वेन जना एकीभूयं यत्र निर्णय कुर्वन्ति तादृशस्थानानि एतानि इत्यूहितुं शक्यते। अत्र सर्वेषां प्राधान्यम् । नात्रोच्चनीचभाव इत्ययमर्थः प्रतीयते । सभाशब्दव्याख्यानव्याजेन कश्चन श्लोक उद्धृतः ।

"न सा सभा यत्र न याति चैको
न सा सभा यत्र न विभाति चैकः ।
सभा तु सैवास्ति यथार्थनामा
परस्परं यत्र विभान्ति सर्वे ॥" इति ॥

अतश्च राज्यतन्त्ररीत्या मुख्येषु सार्वजनीनजनानां समानत्वमेवाङ्गीकृतम् इति निर्श्चीयते । विदथविषये नैवं ज्ञायते । आमन्त्रणपरिषद्विषयेऽपि न कापि सूचना दृश्यते । परं त्वेतानि स्थानानि परस्परवादप्रतिवादकरणार्थं निर्दिष्टानि स्थानानि इति

निश्चयस्यावकाशो वर्तते । मन्त्रलिङ्गेषु तथा दर्शनात् । अतश्च जना एकस्मिन् स्थाने स्थित्वा स्वसामुदायिकव्यवहारान् विचार्य निर्णीतवन्तः । इदमेव विचारितम्, इदं न इति निश्चायकप्रमाणाभावात् समुदायसम्बन्धिनः सर्वेऽपि विषया विचारिता इत्येव निश्चेतव्यं भवति । ऐतिहासिकपद्धत्या विमर्शने इदं भवति । किं च प्राचीनतमे हि काले सामुदायिकव्यवहारो जनसमुदायार्थान् सर्वानपि विषयानन्तर्भावयत्येव । तस्मिन् काले हि सामुदायिकार्थसम्बन्धिराज्यतन्त्रसम्बन्धिव्यवहाराणां परस्परभेदो न सुस्पष्टतया आसीदिति गम्यते । सर्वेषां व्यवहाराणामपि सामुदायिकत्वेनैव व्यवहार आसीत् । तत्र कालक्रमेणैव सुस्पष्टो भेदः समजनि । अतः प्राचीनतमे काले जनतन्त्रस्थानेषु किं विचारितम्, किं न विचारितमिति विविच्य प्रतिपादनं दुःशकमेव । विचारितविषयाणां सूचनमेव मन्त्रेभ्यो लभ्यते । तादृशविषयाणां विमर्शनेन सर्वोऽपि विषयोऽत्र विचारार्थमानीत इति निर्णेतुं शक्यते । यद्यप्येतादृश्यः सभा अन्यदेशीयचरित्रेष्वप्यासन् इति प्रतीयते (Traibal council) एतादृशीनां सभानां जातिसभा इति तत्र व्यवहारश्च वर्तते । परं तु अत्र च युद्धविषयविचार एव कृत इति ऊहितुमवकाशोऽस्ति । नात्र समुदायसम्बन्धिनः सर्वेऽपि विषया विचारिताः । नायं नियमो वेदेषु प्रतिपाद्यमानसभासु संभवति । अत्र जनसमुदायसम्बन्धिनः सर्वेऽपि विषया विचारिता इति हि प्रतीयते । अन्यदेशीयजातीयसभानां योद्धृसभात्वं युद्धविषयनिर्णयार्थं प्रवृत्तत्वमेव वा सम्भवति । इदमेव वैलक्षण्यं वैदिकराज्यतन्त्रानुसारिसभायाः, यदत्र सामुदायिकाः सर्वेऽपि विषया विचारिता इति ॥

किमिति बहुभिर्नामभिः एतानि स्थानानि सूच्यन्ते? एतेषां स्थानानां समकालिकत्वं वा भिन्नकालिकत्वं वा इत्यत्र प्रमाणं न दृश्यते । सभासमित्योः परम् एककालिकत्वे समप्रधानत्वे च अथर्ववेदः प्रमाणं भवति । यतः सभासमिती उभावपि प्रजापतेर्दुहितृत्वेन प्रतिपादितौ । "सभा च मा समितिश्चावतां प्रजापतेर्दुहितरौ संविदाते" इति वेदेषु जनतन्त्रस्थानानां सत्ता ऐतिहासिकशास्त्राचार्येण जयस्वाल्महाशयेन "हिन्दुपालिटि"-नामकग्रन्थे सम्यङ् निरूपितम् ॥

परं त्वन्ये विद्वांसो बहव एतदाक्षिप्तवन्तः । ते नाङ्गीकुर्वन्ति तादृशजनतन्त्रस्थानानां विद्यमानत्वं वेदकाले । भटनामकर्महाशयः (R. A. S. 1935) जयस्वाल्-सिद्धान्तस्य प्रधानः प्रतिपक्षी । परं तु जयस्वाल्प्रतिपक्षिणः सर्वेऽपि महता प्रयासेन प्रतिपादनं कृत्वा अन्ततो गत्वा तादृशस्थानानां जनतन्त्रमूलकत्वमङ्गीकुर्वन्त्येव । पाश्चात्येषु बहवः स्वकीयसंस्कृतवाङ्मयेतिहासप्रतिपादकग्रन्थेषु वेदकालीनपरिस्थितिं निरुपितवन्तः । तत्र वेदकाले जनतन्त्रस्थानानि आसन् इति

सूचनमपि तैर्न कृतम् । यद्यपि वेदकालीनजनतन्त्रस्थानानि नैतत्कालीनजनतन्त्र-स्थानसदृशानि । अस्मिन् काले यावन्तो विषया वर्तन्ते विवादार्थम्, न तावन्तस्तदासन् विषयाः । तथा यथा वाऽस्मिन् काले महता आडम्बरेणैतादृशस्थानानाम् "एलक्षन्" (संवरणम्) भवति नैवं तदा । परं त्वेतादृशस्थानानां जनतन्त्रतत्त्वस्य मूलकत्वं तदानीमपि, इदानीमपि समानमेव । एतादृशसमित्यायत्तत्वं राज्यतन्त्रस्यापि समानमेव । परं तु वैदिकेतिहासविमर्शकाः सभासमितिस्वरूपविषये तत्कार्यविषये च नैकमत्यं प्रदर्शयन्ति । अत्र च बहुविधा अभिप्राया वर्तन्ते । वैदिककोशकर्तारौ सभासमित्यो-रूभयोराप्येकत्वमभिप्रेतः । लुड्विक्महाशयाः सभायां ब्राह्मणा धनिनश्च सभ्या अभूवन्निति वदन्ति । जिम्मर्महाशयः सभां ग्रामसभामभिप्रैति । यत्र च ग्रामणीरध्यक्षो भवति । "हिल्लिब्रन्ट्" महाशयोऽपि उभयोः समित्योरेकत्वमेवाभिप्रैति । "फरकिन्स्" महाशाय एतादृशीषु सभासु राजानो धनिनश्च संगताः परस्परं विवादं अकुर्वन् । अन्येऽपि जनाः तदङ्गीकारं प्रदर्शितवन्तः इति वदति । जयस्वाल्महाशयानां मतानुसारेण (H.P.P.Page 1·18) समितिः सर्वेषां जनानां संमेलनस्थानम् । तत्र च राज्ञः संवरणं भवति । सभापि शाश्वतं स्थानं समितिपराधीनम् । सभायां विशिष्टानां केषाञ्चित् सभ्यत्वम् । न तत् सार्वजनीनम् । सभया एव कार्यजातं सर्वं निरुह्यते । तथा विदथनामकस्थानमपि धर्मकार्याय कॢप्तं स्थानमिति वदति । "अल्टेकर्महाशयः (State and Goverment in Ancient India, p. 94-100) समितिः ग्रामसभा । तत्र चाऽन्यविषयैः साकं राज्यतन्त्रव्यवहारोऽपि विवादितः । अथापि समितिः केन्द्रस्थाने वर्तत इति वदति । अभिनवाचन्द्रहासमहाशयाः (Rigvedic Culture, pp. 328-29) सभा च शाश्वतं स्थानं तत्र तत्र कल्पितम् । समितिश्च सर्वजनसम्मेलनस्थानम् । उभयोरपि स्थानयोरैकमत्येनैव निर्णयः क्रियत इति वदन्ति । बण्डोपाध्यायमहाशयाः (Development of Indian Polity, p. 118) अपि तथैवाभिप्रयन्ति । बिण्डेमहाशयः (The Riligion and Philosophy of Atharva Veda, p. 79) एवमभिप्रैति—वृद्धानां संमेलनं सभा इति कथ्यते, यैश्च धर्मनिर्णयः क्रियते । समितिश्च सर्वेषां जनानां समाहारः । युद्धकाले समाधानकाले च एतत् भवति । गोशालमहाशयः (p. 26-27) सभा सार्वजनिकी समितिः । तस्याश्च नीतिनिर्णय-विषयेऽधिकारः । समितौ राज्ञो वरणार्थं कल्पिता इति वदति । "ट्यूटानिक्" जनानां समितिं दृष्टान्तेन ऋग्वेदकालेऽपि सार्वजनिकसमितेरस्तित्वमङ्गीकरोति । समितिर्मतकार्यार्था । विदुषां तत्र समाहारो राज्ञो वरणं पुनर्वरणं च समितेः प्रयोजनम् । सभा चोत्तमकुलोत्पन्नानां सम्मेलनस्थानम् इति वदति । पीटर्सबर्ग्" कोशानुसारेण सभा च गृहान्तर्गतस्थलमेव ।

"ब्लूंफील्ड्" अभिप्रायोऽपि तदनुवादकः। "गृफीत्" महाशयः समितिः कार्यसभा इति वदति। परं तु कर्मसम्बन्धिमतसम्बन्धिविषयार्थं प्रवृत्ता इति वदति। "फद्नागर्" महाशयः (J. A, R. S. 1935) समितिः मतवादिनां सम्मेलनमिति वदति। अन्ततो गत्वा ब्राह्मणानामेव संघटनमिति तस्याभिप्रायः। तत् वादप्रतिवादस्थानम्। परं तु राजापि तत्र वृतः। पुनर्वृतश्च। एलकूषन् शब्देन जनानामङ्गीकार एव उच्यते; नान्यत्किमपि। सभा उत्तमकुलोत्पन्नानां समाहारः। लौकिकविषयेऽपि तत्र वादः कृत इति वदति। अत्र च सभासमितिविषयेऽस्माकं हस्ते केचन मन्त्रा एव वर्तन्ते। परन्तूभयोः कार्यजातविषये किञ्चिदेव स्पष्टता दृश्यते। सभा समितिश्च एका इति वादः सर्वथा नाङ्गीकार्यः; यत उभयोरपि पार्थक्यं स्पष्टं प्रतीयते। तथा समितीः राजवरणार्थं कृप्ता इत्यूहस्यावकाशोऽस्ति। तदा समितेः सार्वजनीनत्वमेवावश्यं भावि। यतः "विशस्त्वा सर्वा वाञ्छन्तु" इति सर्वैर्जनैः संभूय वरणं प्रतिपाद्यते। अतश्च यदि समित्या राजवरणं कार्यं तदा तस्याः सार्वजनीनत्वमवश्यं भावि। राजापि समित्यामागच्छति। तथा सभायाः कार्यं वादप्रतिवादपूर्वं विचारो निर्णयश्च। परं तु के सभ्या इत्यत्रोह एव शरणमस्माकम्। सभासमित्याख्यसंङ्घटनाद्वयं जनतन्त्रस्थानानुसारि इत्यत्र विप्रतिपत्तेरवकाशो नास्ति। यद्यपि कुत्रचित् सभाशब्दो गृहे वर्तमानस्थानविशेषे प्रयुक्तः। तत्र च सभ्याग्निः इति अग्नेरपि स्थानं वर्तते। प्रतिगृहं च सभा-स्थानस्यास्तित्वमङ्गीकार्यमेव। अथापि जनसमुदाये विवादे उत्सुकानां जनानां संमेलनं चासीदिति अङ्गीकारोऽप्यवश्यं भावी। जनसङ्घटने च कस्मिन् कस्मिन् विषये प्रवृत्तिरासीदिति यद्यपि न स्पष्टं प्रतीयते परं त्वेतादृशानां राज्यतन्त्रसम्बन्धो निर्बाध एव। जनाः संभूय सामुदायिकविषयविचारमेवाकुर्वन् इति वादोऽप्यप्रधृष्य एव समित्यायत्तां राज्ञः स्थितिं वदता वेदभागेन "नास्मै समितिः कल्पते, ध्रुवाय ते समितिः कल्पताम्" अथर्व. सं. एतत् प्रतीयते। इदं चावश्यं ज्ञातव्यम्—वेदेषु तत्र तत्र विादसामर्थ्यसम्पादनाय बहूनि कर्माणि विहितानि। तैत्तिरीयसंहितायां सप्तमे काण्डे पञ्चरात्रम् इति किञ्चन कर्म विहितम्। वाक्पटुत्वसम्पादनमेवास्य प्रयोजनम् "वाचः प्रवदिता स्याम्" इति। तथा द्वितीयकाण्डे सारस्वती मेषी विधानप्रकरणे "य ईश्वरो वाचो वदितोस्सन् वाचं न वदेत्" इति प्रतिपाद्यते। अथर्ववेदेऽपि बहूनि कर्माणि सभायां प्रवक्तृत्वसम्पादनाय विहितानि। "ये संग्रामाः समितयः तेषु चारु वदेमहि (अथर्वसं. 12-1-56)। सभासु अवक्तॄणां पराजयाय मन्त्रा विहिताः; कर्माणि च विहितानि। ऋग्वेदे च सभाविजयप्राप्त्य-नन्तरं मित्राणामभिनन्दनं प्रतिपादितम्। वाक्पूर्वव्यवहारो वैदिकसमुदाये बहुलमासीदिति स्पष्टं वेदवाक्येभ्यः प्रतीयते। सभासु यथा जनसमुदायव्यवहाराः कृताः तथा तत्त्वविचारोऽपि

कृत इति निःसंशयं ज्ञायते । परिषदां प्रस्ताव उपनिषत्सु क्रियते । यदा च सभासमिती द्वे अपि स्थाने आस्तां तदा वैलक्षण्यसम्पादनमावश्यकं भवति । समितिः सर्वजनसाधारणी । सभा परं विशिष्टपुरुषाणां केषाञ्चित् सम्मेलनमिति वक्तव्यं भवति । एवमेव केचिदाधुनिक-विमर्शका अपि वदन्ति । यथा तथा वा भवतु । कस्मिंश्चित्काले सभासमिती उभे अत्यास्ताम् इत्यत्र न संशयलेशोऽपि । बहुवचनान्त(सभाभ्यः)प्रयोगात् प्रतिग्रामं सभा आसीदिति च गम्यते ॥

॥ समितिः ॥

समितिशब्दवाच्या जनानां सङ्घटना ऋग्वेदकालेऽपि आसीदिति ज्ञायते । ऋग्वेदेऽथर्ववेदे च समितेः प्रस्तावो वर्तते । राजा समितिं प्रत्यागच्छति इति सूच्यते । (ऋक्सं. 9-92-6) "राजा न सत्यस्समितीरियानः" । "समितिं गच्छन् राजेव सत्य" (ऋक्सं. 10-97-6) इत्युच्यते । यदोषधयः संगच्छन्ते राजानस्समिताविव" । अत्रापि राज्ञां समितिसम्बन्धः स्पष्टं प्रतिपाद्यते । अथर्ववेदे सर्वा विशः संमनसः सध्रीचीः ध्रुवायते समितिः कल्प्यतामियम् (6-88-3) "नास्मै समितिः कल्पते (अथर्वसं. 5-19-15) इत्युक्तम् । एतयोः स्थलयोरन्वयव्यतिरेकमुखेन राज्ञां स्थितिः समित्यायत्ता इति प्रतिपाद्यते । केषुचित् स्थलेषु सभासमित्योरुभयोर्मुख्यत्वं प्रतिपाद्यते । 'सभा च मा समितिश्चावताम्" "प्रजापतेर्दुहितरौ संविदाने" (अथर्वसं. 7-12-1) । अत्र सभासमित्योरुभयोरत्यैकमत्यमावश्यकमिति प्रतिपाद्यते, संविदानौ इति प्रयोगात् ये ग्रामायदरण्यं याः सभा अधिभूम्याम् । ये संग्रामाः समितयः तेषु चारुवदेमहि । तत्रैवान्यत्रोक्तम् । अथर्ववेदे, व्रात्यकाण्डे, व्रात्यमहिमवर्णनावसरे, विशां समितिसभयोश्च सम्बन्धः प्रतिपादितः । स विशोऽनुव्यचलत् । तं सभा च समितिश्च सेना च सुराश्च अनुव्यचलत् इति । अत्र विड्भ्यः (प्रजाभ्यः) एव सभा च समितिश्चोत्पन्ना इति प्रतिपाद्यते । विराड्वर्णनावसरे "सोदक्रामत् । सा सभायां न्यक्रामत् । यन्त्यस्यं सभां सभ्यो भवति । य एवं वेद ।" "सोदक्रामत् । सा समितौ न्यक्रामत् । यन्त्यस्य समितिं सामित्यो भवति । य एवं वेद ।" (अथर्वसं. 8-10--8-11) यतः सभासमित्योरुभयोरप्येकत्र निर्देशः क्रियते, अतो ज्ञायते सभा समितिश्च वैदिकराज्यतन्त्रे मुख्यभूते इति । समितेः कार्यविषयेऽभ्यूह- एवास्माकं शरणम् । अत्र चेदं जनसम्मेलनं सार्वजनीनमित्यपिपरं वक्तुं शक्यते । जनाः सम्भूय परस्परसमोलोचनपूर्वकं स्वकार्यजातं निर्णीतवन्त इति परं निश्चिनुमः । दैव्याः समितेः प्रस्तावोऽपि वर्तते । (अथर्वसं. 10-11-8) "यदग्न एषा समितिर्भवति देवी" । समितेश्च राज्यतन्त्रसम्बन्धः स्पष्टमेव । ऋग्वेदे समितौ वक्तव्या इयं प्रार्थना दृश्यते—"संगच्छध्वं संवदध्वम्, सं वो मनांसि जानतां देवा भागं यथापूर्वे सञ्जानाना" उपासत । समानो मन्त्रः समितिः समानी । समानं मनः सहचित्तमेषाम् । समानं मन्त्रमभिमन्त्रये वः । समानेन वो हविषा जुहोमि । समानी व आकूतिः समाना हृदयानि वः । समानमस्तु वो मनः । यथा वः सुसहा सति" । एतेषां मन्त्राणां

विनियोगो लैङ्गिक इति सायणेनाप्युक्तम्। इमे एव मन्त्राः तैत्तिरीयब्राह्मणेऽपि पठिताः। तेषां पुनः उपहोमेषु विनियोग इति लैङ्गिकविनियोग एव तत्राप्यादृतः। परं तु 'संज्ञानेनवो हविषा यजाम' इति दर्शनात् संज्ञानीनामेष्टयां विनियोगश्च उपहोमत्वेन कृतः। परं तु मन्त्रस्वरूपपर्यालोचनया एवमभ्यूहि तुं शक्यते। यत् राज्ञैव इमे मन्त्राः समितिप्रारम्भकाले प्रयोक्तव्या इति। अत्र प्रथमेन सङ्गच्छध्वम् इति भागेन कार्यकारणकाले ऐकमत्यं प्रार्थ्यते। संवदध्वमिति वाक्पूर्वकव्यवहारकाले एकमत्यं प्रापितम्। सँ वो मनाँसि जानताम् इति चिन्तायामप्यैकमत्यं प्रार्थ्यते। तथा च प्रथमेन भागेन मनोवाक्कायात्मककरणत्रयेऽपि ऐकमत्यं प्रार्थ्यते। प्रथममन्त्रस्योत्तरार्धं तु दृष्टान्तप्रदर्शकः। "यथा देवाः सञ्जानाना उपासते, एवमेव युष्माभिरपि ऐकमत्येन भवितव्यम्" इत्युच्यते। द्वितीयमन्त्रे च, समानो मन्त्र इति मन्त्रालोचने ऐक्यं तथा समितौ ऐकमत्यं च प्रार्थ्यते। चित्तमनसोः समानत्वं च प्रार्थ्यते। समरणकाले विचारकाले च ऐकमत्यं प्रार्थ्यते। समानं मन्त्रमभिमन्त्रये व इति मन्त्रेण मन्त्रालोचनकालेऽपि ऐकमत्यं प्रर्थ्यते। समनन्तरे मन्त्रे युष्माकं संकल्पः समानोऽस्तु, हृदयानि च समानमस्तु, साहित्यं च शोभनमस्तु इति प्रार्थ्यते। अत्र किं देवान् प्रति इयं प्रार्थना उत मनुष्यान् प्रति इत्यत्र विवादस्यावकाशोऽस्ति। परं तु मनुष्यान् प्रति आवेदने परं स्वारस्यं पश्यामः। चतुर्थमन्त्रस्य ऋत्विग्यजमानपरत्वं सायणेनाभ्यङ्गीकृतम्। तथा द्वितीयमन्त्रस्यापि ऋत्विक्परत्वं मुखान्तरेणाङ्गीकृतं दृश्यते। समानेन वा हविषा जुहोमि इति सर्वेषां समानमेव जुहोमि इति प्रार्थ्यते। अत्र समितिपदस्य सत्त्वात् मन्त्रः समितिप्रार्थनार्थ इति ज्ञायते। तैत्तिरीयब्राह्मणे पठ्यमानेषु मन्त्रेषु समानं मन्त्रमभिमन्त्रये वः इत्यस्य स्थाने समानं केतो अभिसंभरध्वम् इति पठ्यते। सायणेन च सहवासस्थानमभिलक्ष्य प्रयतध्वमिति व्याख्यातम्। समानेन वो हविषा इत्यस्य स्थाने संज्ञानवो हविषा इति वर्तते। अत्र समानं केतो अभिसंरभध्वम् इति केतशब्दो ध्वजपर इति वक्तुं शक्यते। उकारान्तस्याकारान्तस्य वा शब्दस्य ध्वजपरत्वेन विरोधं पश्यामः। उभयत्र प्रज्ञापकार्थस्य सत्त्वात्। केतुशब्दस्य ध्वजपरत्वेन ब्राह्मणेऽपि व्याख्यानं कृतम्। अश्वमेधयागे ध्वजोच्छ्रायणार्थमेकं कर्म विहितम्। तत्र च 'केतुं कृण्वन्नकेतवे' इत्ययं मन्त्रः प्रयुक्तः। ध्वजोच्छ्रायणे विनियुक्तस्य केतुशब्दस्यापि ध्वजपरत्वमेव न्याय्यम्। 'केतुं कृण्वन्न केतवे इति ध्वजं प्रतिमुञ्चति इति ब्राह्मणमपि वदति। अतश्च केतुशब्दस्य ध्वज एवार्थः। लौकिलप्रयोगे ध्वजपरत्वं केतुशब्दस्य सुस्पष्टमेव। उत्तरत्र चैतादृशकर्मणः फलं प्रतिपादयत् ब्राह्मणवाक्यं 'यश एवैनं राज्ञो गमयति इति' वदति। अयं भावः—अश्वमेधयागकर्तुः ध्वजोच्छ्रायणेनान्येषां राज्ञामपि यशः स आदत्त इति। एवमेव अकारान्तपदेनापि ध्वजस्यैव ग्रहणं युक्तं पश्यामः। एवं ध्वजमुद्दिश्य भवद्भिः संरम्भः कार्य इत्ययमर्थो लभ्यते। सयणाभिप्रायानुसारेण निवासस्थानमभिलक्ष्य भवद्भिः संरम्भः कार्य इत्येवमर्थः

प्रतीयते । ज्ञापकश्च ध्वज एव । ऋग्वेदे दशमे मण्डले 'ऋषभं मा समानानाम्' इति पञ्चर्चं सूक्तं पठयते । अस्य च प्रयाणकाले जपे विनियोगः सूत्रकारैः प्रतिपादितः। आ.गृ. 2-6-13- । मन्त्रस्त्वेवम् :—

ऋषभं मा समानानां सपत्नानां विषा सहिम् ।
हन्तारं शत्रूणां कृधि विराजं गोपतिं गवाम् ।
अहमपि सपत्न हेन्द्र इवादिष्टो अक्षतः ।
अधस्सपत्नो मे पदोरिमे सर्वे अभिष्ठिताः ।
अत्रैव वोपि न ह्याभ्युभे अग्नी इव ज्यायां ।
वाचस्पते निषेधा नान्यथा मदधरं वदान् ।
अभिभूरहमागमं विश्वकर्मेण धाम्ना ।
आवश्चित्तभावो व्रतमावोहं समितिं ददे ।

योगक्षेमं व अदायाहं भूयासमुत्तम आवो मूर्धानमक्रमीत् ।
अधस्पदान्म उद्वहत मण्डूका इवोदकान्मण्डूका उदकादिव ॥

यद्यपीदं सूक्तं प्रयाणकाले जप्यत्वेनोक्तम्। परं तु प्रार्थना एवं दृश्यते । "समानानां मध्ये ऋषभं मां कुरु शत्रूणामभिभवितारं मां कुरु। शत्रूणां हन्तारं च कुरु। विराजं गोपतिं मां कुरु। अहं सपत्नानां हन्ता। इन्द्र इव अरिष्टः अक्षतश्च । इमे सपत्नाः सर्वेऽपि मम पादयोः अधस्तात् आक्रान्ता भवन्तु । यस्मिन् देशे सपत्नाः सन्ति तस्मिंश्च देशे तान् बध्नामि । हे वाचस्पते ! यथा वा ते मत्तो निकृष्टतरं वदन्ति तथा कुरु। अहम् अभिभविता सर्वकर्मक्षमेण धाम्ना आगतवानस्मि। अतः सभ्यानां मन आददे। तथा व्रतं श्च आददे। समितिं च आददे। युष्माकं योगक्षेममादाय अहमुत्तमो भूयासम्। अन्येषां मूर्धानम् आक्रमिषम् । मम पादस्याधस्तात् वर्तमाना यूयं मण्डूका इव उद्वदत" इत्ययमर्थः प्रतिपाद्यते। अत्र च कश्चिद्वादे विजयमिच्छन् इमं मन्त्रं पठति इत्यत्र न संशयः । स्वस्योत्कर्षमितरस्यापकर्षं चात्र प्रार्थयते। यथा मदधरं वदान् इति अन्यस्य निकृष्टतरवाक्त्वं च प्रार्थयते । शत्रवः स्वपादयोः अधस्तात् स्थित्वा किमपि मण्डूकवत् आलपन्तु इति वदति । चतुर्थे मन्त्रे समितिसम्बन्धः सुस्पष्टः। स चैवं वदति। अहमत्रागतः शत्रूणामभिभावकेन सर्वकर्मक्षमेण तेजसा सहित इति स्वोत्कर्षं वदति। युष्माकं चित्तं व्रतं च आदद इति सभ्यानां चित्तावर्जनं व्रतावर्जनं च वदति। समितिमादद इति च समितेः तच्चित्तानुसारित्वकरणमपि स वदति । अन्येषां मन्त्राणां समितिसम्बन्धः सुस्पष्ट एव । समितेः स्वचित्तानुकारित्वकरणार्थम् इयं प्रार्थना । सर्वथा समितिः सर्वेषां जनानां सङ्घटनात्मिका । तत्र सर्वे जनाः साक्षात् वा प्रतिनिधिद्वारा वा समागताः। सर्वजनसम्बन्धिव्यवहाराश्चात्र विचार्य निर्णीताः। वादप्रतिवादश्च महानभूत्।

समित्यामुपद्रष्टृत्वेन राजा आगच्छति। साक्षादेव स जनानामभिप्रायं जानाति। समित्या यत् निर्णीतं तद्राज्ञा क्रियते। समित्यनुवर्तनं राज्ञा सर्वथा कार्यम्। प्रतिग्रामं समितयः, राज्ञो वरणं, पुनर्वरणं च समितेः कार्यम्। समित्यां कः अध्यक्षः अधिपतिर्वा अभूत् इति न स्पष्टं ज्ञायते, यतो राजापि अत्र आगच्छति तेनैव समित्यध्यक्षेण भवितव्यम् इति मन्यामहे॥

जनतन्त्रतत्त्वसम्बन्धिनां स्थानानां मध्ये सभासमिती द्वे अपि अत्यन्तं प्रसिद्धे। तत्र सभायाः प्रस्तावोऽष्टवारम् ऋग्वेदे श्रुतः। तथा समितिरपि सप्तवारं श्रुता। तथा अथर्ववेदे सभा षोडशवारं, समितिश्च त्रयोदशवारं श्रुते। ऋग्वेदे समितिसम्बन्धप्रार्थनापि वर्तते। (10-191) तथा अथर्ववेदे सभाविषयिणी प्रार्थना वर्तते। (7-12) ऋग्वेदाथर्ववेदयोः एते स्थाने राज्यतन्त्रस्य मुख्यभूते आस्ताम्। यजुर्मन्त्रकाले ब्राह्मणकाले च यद्यप्येतादृशयोः स्थानयोः प्रस्तावोऽत्यन्तं विरलः। अथापि जनतन्त्रतत्त्वसंबन्धो न विनष्टः। राजा तदा तदा सभां संकलितवान्। तद्द्वारा जनाभिप्रायं च ज्ञातवान्। काम्येषु यागेषु सभारक्षणार्थं वा समितिरक्षणार्थं वा न कोऽपि यागो विहितः। परं तु राज्ञो जनाभिप्रायानुसारित्वे आवश्यकता तत्र तत्र प्रतिपादिता॥

अथापि सूक्ष्मेक्षिकतया विमर्शे एवं भवति—ब्राह्मणेषु सभासमितिस्थाने नात्यन्तमुत्सन्ने। परं तु तत्र सभानाम्ना समितिनाम्ना च व्यवहारो वर्तते। तत्र परस्परविवाद आसीदित्यपि ज्ञायते। अथापि राज्यतन्त्रतत्त्वसम्बन्धः कियानासीदिति न निर्णेतुं पार्यते, यतो नैकमपि कर्म साक्षात् सभासमितिसम्बद्धं वर्तते। ब्राह्मणेषु सभासमित्यादिस्थाने सजातानां प्रस्तावोऽसकृद् भवति। सजाताख्यं स्थानं राज्ञा सम्बद्धम्। त एते सजाताः सभासमित्यादिभिः सम्बद्धा वर्तन्ते वा न वेति निश्चित्य वक्तुं न शक्यते। अस्मद्विमर्शानुसारेण एवं भवति—सजाता जनानां प्रतिनिधय एव। सभासमितिसम्बद्धा राज्ञः स्थितिस्तादायत्ता एव। सभासमितिस्थानयोः कर्मसम्बन्धिविचाराः तथा ब्रह्मविचाराश्च प्रवृत्ता इति ज्ञायते। परिषद् संसद् इति नूतनं नाम च दत्तम्। "पाञ्चालानां परिषदाजगाम। समितिमेयाय। सर्वांसंसदमुपासीदत" इत्येतादृशप्रतिपादनं तत्र तत्र दृश्यते। अत्र जैमिनीयब्राह्मणं अवधानार्हम्, तत्र एवं पठते—"अथ ह हेत्स्वाशया आह्लौकयो महावृषो राजापुत्रं दीक्षयाञ्चकार। तस्यहसोमशुष्मः सात्ययज्ञः उद्गीथायो आस। तमुद्ध महावृषाणां दूता आसन्नुः। आगच्छ समितिर्वा समितिविषये मैत्रायणीयसंहितायां केचन मन्त्राः पठिताः। इमे च मन्त्राः संज्ञानीनामकेष्ट्या याज्यापुरोनुवाक्यत्वेनोपक्लृप्ता इति प्रतिभाति। अत्र चान्तिमौ मन्त्रौ किञ्चिद्विकृतौ ऋग्वेदमन्त्रसदृशौ। अपरे च मन्त्रा अत्यन्तमपूर्वाः। तानत्र विलिखामः—

"संज्ञानं नो दिवा पशोः संज्ञानं नक्तमर्वतः। संज्ञानं नः स्वेभ्यः।
संज्ञानमरणेभ्यः संज्ञानमश्विना युवमिहास्मभ्यं नियच्छतम्॥ १॥

समिन्द्र रांया समिषा रभेमहि सं॒वाजैः पुरुश्चन्द्रैरभिद्युभिः ।
संदेव्या प्रमत्या वीर शुष्मया गो अग्रयाश्वत्यारभेमहि ॥ २ ॥

इन्द्रवायू सुसंदशा सुहवेह हवामहे ।
यथा नः सर्वा इज्जः संगमे सुमना असत् ॥ ३ ॥

सं॒वो मनाँसि सं॒व्रता समाकूतीरनं॒सत ।
अमी ये विव्रताः स्थ तान्वः संनमयामसि ॥ ४ ॥

समाना वा आकूतानि समना हृदयानि वः ।
समानमस्तु वो मनो यथा वः सुसहा सति ॥ ५ ॥

समानो मन्त्रः समितिः समानी समानं॒ व्रतं॒सह चित्तमेषाम् ।
समानं क्रतुमभिमन्त्रयध्वं॒ समानेन वो हविषा जुहोमि ॥ ६ ॥

सङ्गच्छध्वं॒ संजानीध्वं॒ सं॒ वो मनां॒सि जानताम् ।
देवा भागं॒ यथा पूर्वे संजानाना उपासते" ॥ ७ ॥

अत्र प्रथमे मन्त्रे केवलमैकमत्यप्रार्थना वर्तते । तृतीये मन्त्रे पुनः संगमस्य प्रस्तावोऽस्ति । अत्र ह्येवं प्रार्थ्यते—"यथा नः सर्वा इज्जनः संगमे सुमना असत्" इति । अत्र जन इति श्रवणात् सर्वजनसाधारणोऽयं सङ्गव इति प्रतिभाति । अयं च संगमः समितिरेव । समित्याश्च राज्यतन्त्रसंबन्धः सुस्पष्टः । सर्वेषां जनानां संगमे सौमनस्यं प्रार्थ्यते । चतुर्थे मन्त्रे मनसां व्रतानाम् आकूतीनां चैक्यं प्रार्थ्यते । समनन्तरे मन्त्रे विव्रतानां संवननं प्रार्थ्यते । ये च विपरीतव्रतवन्तः तेषामैकमत्यसम्पादनाय संवननमावश्यकं खलु । अन्त्या मन्त्राः प्रायः ऋग्वेदवदेव । "समानं क्रतुमभिमन्त्रयध्वम्" इत्ययमंशो विमर्शनार्हः । क्रतुशब्दस्य चिन्तापरत्वादैकमत्येन चिन्तनं प्रार्थ्यते । इदं हि परमाश्चर्यावहम्—यत् एतादृशमन्त्रा मैत्रायणीसंहितायामेव दृश्यन्ते ॥

इयमिति । तं ह प्रधावयन् उवाच । उद्गातरेतत्ते पुत्रं परिददानीति (जै.ब्रा-1-235) अत्र पुत्रयज्ञमेध्ये पिता राजा दूतैराहूतः समितिं जगाम इत्युच्यते । सा च महावृषाणां समिती राज्यतन्त्रसंबद्धैव । दैवी संसत् इति मानुषसंसदः सूचनं वर्तते । (जै. ब्रा. 1-275) (तै. सं. 7-4-3-2) । राज्ञः सभासम्बन्धः (जै. ब्रा. 2-113) । अन्यत्रापि संदृश्यते । योधनिरीजे शैब्यो राजा तं ह सभायामवेविष्ठा विवेद । सहत देवो दा वृणानः उवाच स्थविरयज्ञो वा न किलायमास इति ॥

॥ सभा ॥

समितिवत् सभा च जनतन्त्रस्थानम् । अत्रापि राज्यतन्त्रविचारः कृत इति ज्ञायते । सभायाः समासदश्च तत्र तत्र प्रस्तावः कृतः । शतरुद्रीये 'सभाभ्यः सभापतिभ्यश्च वो नमः' इति बह्वीनां सभानां बहूनां च सभाध्यक्षाणां प्रस्तावोऽस्ति (तै. सं. 4-5-3-2) (V. S. 14-24) (कठ. सं. 17-13) (मैत्रा. सं. 2-9-4-1)) ॥ सभापाल इति कश्चन श्रूयते । तस्य च कार्यं सभारक्षणमेव । "अजस्रं त्वां सभापालाः" । (तै. ब्रा. 3-7 4-1) पुरुषमेध-प्रकरणे तैत्तिरीयसंहितायां वाजसनेयसंहितायां च सभाचर इति प्रस्तावोऽस्ति । "धर्माय सभाचरम्" (वा. सं. 30-6) (तै. ब्रा. 3-4-21) इति । अयं च सभां प्रति गन्ता । ब्राह्मणे "धर्माय सभाचरम्" इति धर्मसम्बन्धेन प्रतिपादनात् । अयं च सभाचरो न द्यूतकारी । धर्मनिर्णयार्थं प्रवृत्तसभां प्रति गन्तैव अत्र प्रतिपाद्यते । किमयं सभाचरः सभायां प्रधानभूतः? उत, अन्यवत् अयमप्येक इति न ज्ञायते । सभाचरस्य धर्मसम्बन्धेन ज्ञायते यत् अयं धर्मनिर्णयार्थं प्रवृत्त इति । तैत्तिरीयब्राह्मणे 'कृताय सभाविनम्' (3-4-14) इति सभाविनश्च प्रस्तावोऽस्ति । सभासद इति सभायां ये वर्तन्ते तेऽपि प्रस्तुताः । "ये च सभ्याः सभासदः" (तै. ब्रा. (1-2-1-26) (कठ. सं. 8-7) इति, "सभासभ्य उपहरन्ति" (मै. सं. 1-6-11) "तान् सभा सभ्य उपहरेत्" । (अथ. ब्रा. 8-21-16) । अत्र राज्ञो मरुत्तस्य सभायां विश्वे देवाः सभासद आसन् इति प्रतिपाद्यते । अनेन ज्ञायते सभया राज्ञश्च सम्बन्धोऽस्ति । अथर्ववेदे च यमस्य सभासदः प्रस्तावोऽस्ति । 'यद्राजानो विभजन्त इष्टापूर्तस्य षोडशम् । यमस्यामी सभासदः' इति । अत्र राज्ञामेव सभासत्त्वं प्रतिपाद्यते । 'राजानः सभासदः' । (अथ. सं. 7-12-2) इति दर्शनात् । सभासूक्तेऽपि सभासदां प्रस्तावोऽस्ति । "ये ते के च सभासदः "(अथ. सं. 19-55-5) । "सभ्यः सभां मे पाहि । ये च सभ्याः सभासदः" । इति अथर्ववेदेऽपि अन्येषु स्थलेषु सभाप्रस्तावोऽस्ति । "सभा च समितिश्च" (7-12-1) । "तं सभा च समितिश्च" (अथ. सं. 15-2-9) । "यास्सभा अधिभूम्या" (अथ. सं. 12-1-56) । "यन्त्यस्य सभां सभ्यो भवति" (अथ. सं. 8-10-8-9) । "सभायाश्च समितिश्च प्रियं धाम भवति । सोदक्रामत् । सा सभायां न्यक्रामत्" (अथ. सं. 5-9-3-1) ॥ "यां ते चक्रुः सभायां यां चक्रुरधिदेवते" (अथ. सं. 5-31-6) । अत्र अधिदेवापेक्षया भिन्ना सभा इति ज्ञायते । "अहं वदामि नेत्त्वं सभायामिदं मा वद" (अथ. सं. 7-38-4) । अत्र काचन स्त्री भर्तारं वदति । अत्र गृहे यद्यपेक्षितं तद्वदामि, सभायां परं त्वं वद इति । अनेन

सभा सार्वजनीना इति वादप्रतिवादनार्थं परिकल्पिता इति च ज्ञायते । "बृहद्वो वय इत्युच्यते सभासु" (अथ. सं. 4-21-6) । "विद्म ते सभा नरिष्ठा नाम वा असि" (अथ. सं. 7-13-2) "यस्सभेयो वितथ्यः । सुत्वा यज्वा च पूरुषः" (अथ. सं. 20-128-1) । इति च ऋग्वेदेऽपि सभाप्रस्तावो वर्तते । कस्मिंश्चिन्मन्त्रे कस्यचिदागमनं सभां प्रति सम्यग्वर्ण्यते । 'अश्वी रथी सुरूपः चन्द्रः सभामुपयाति' (8-4-9) इति प्रतिपाद्यते । यस्येन्द्रेण सख्यं वर्तते, स सभां याति इत्युच्यते । अक्षसूक्तेऽपि (10-34-6) सभायां देवनार्थमागतेऽपि 'तन्वा शोशुचान' इत्युच्यते । अनेनालङ्कृता एव सभ्याः सभां गच्छेयुः इति ज्ञायते । सभायां, वाचः ऐकमत्यम् अवश्यं भावि (1-167-3) 'संवाक्' इति प्रतिपाद्यते (4-5-2) । यज्ञसभा-प्रस्तावोऽस्ति 'यज्ञः-स भावान्' इति । सभायां कश्चन वादं करोति । स च विजयं प्राप्तः । तं दृष्ट्वा तत्सखायः सर्वेऽभिनन्दन्ति । "सर्वे नन्दन्ति यशसागतेन सभा साहेन सख्या सखायः । सभेयो विप्रः स्वमत्या धनानि बिभ्रति" (ऋक्. सं. 2-24-13) इत्युच्यते । अत्र सभार्हत्वं प्राज्ञावत एव इति प्रतिपाद्यते । अन्यत्रापि सभेयस्य पुत्रस्य प्रार्थना वर्तते "सभेयो युवा" इति । व्याख्यातं चैतद्ब्राह्मणेन । यः पूर्ववयसि वर्तते स एव सभेय इति । "यो वै पूर्ववयसी । स सभेयो युवा" (तै. ब्रा. 3-8-12-1) "एष मे सभेयो युवा । यः प्रथमवयसी" (शत. ब्रा. 12-1-8-1) सभाविषये एकं सूक्तं अथर्ववेदे पठ्यते यद्ग्रामे यदरण्ये, यत् सभायां यदिन्द्रिये यद्ग्रामेयदरण्ये, यत्सभायां यदिन्द्रिये यदेनश्चकृमावयम् । तस्यावयजनमसि एनश्चकृमावयं सभायां कृतस्य एनसः परिहारार्थं प्रार्थनापि वर्तते । (तै. ब्रा. 1-8-3) (मै. सं. 1-10-2) । अस्यां सभायां कृतेन एनसा महानपराधो भवेत् इति भवति । सभायां चारुवदनम् आवश्यकम् ।

> सभा च मा समितिश्चावतां प्रजापतेः दुहितरौ संविदाने ।
> येनासंगच्छा उपमा स शिक्षाच्चारु वदानि पितरस्संगतेषु ॥

> विद्म ते सभे नाम नरिष्ठा नाम वा असि ।
> ये ते के च सभासदस्ते मे सन्तु स वाचसः ।
> एषामहं समासीनानां वचो विज्ञानमाददे ।
> अस्याः सर्वस्याः संसदो मामिन्द्र भागिनं कुरु ।
> यद्वो मनः परागतं यद्बद्धमिह वे ह वा ।
> तद्व आवर्तयामसि मयि वो रमतां मनः ॥

अत्र च इमे अंशाः प्रतिपाद्यन्ते । सभासमिती उभे अपि मुख्यतमे । तयोरैकमत्य-मावश्यकम् । तथा तादृशेषु संगतेषु चारुवदन मावश्यकम् । सभाया नरिष्ठ इति नाम । यतः सभाय निर्णीतांशस्य न नाशोऽस्ति । अतो नरिष्ठेति नाम । नरिष्ठा परैः अनभिभाव्या बहवः संभूय

यत् भकं वाक्यं वदेयुः तद्धि परैर्न अतिलङ्घ्यम् । अतोऽनतिलङ्घ्यवाक्यत्वात् नरिष्ठेति । सायणोऽपि एवमाह—बहूनां निर्णयस्यानभिभवनीयत्वं सोऽपि वदति । सभासद्भिः साकं सवाक्त्वं प्रार्थ्यते । सभायां मुख्यत्वप्राप्त्यर्थं सभासीनानां वचो विज्ञानं च आदद इति प्रार्थिता । वदति सभायां सर्वस्यामपि श्रैष्ठ्यं प्रार्थ्यते । अन्तिमो मन्त्रश्चारुतमः । अत्र च परागतानाम् इह वा तत्र वा बद्धानां सभ्यमनसां आवर्तनं च प्रार्थ्यते । आगतानां सभासदां मनसो वक्तरि रमणं च प्रार्थ्यते । अस्यां च सभायां के सभ्याः? इति न वयं जानीमः । अस्यां सभायां देवनं च कृतमिति ज्ञायते । (ऋ. सं. 1-34-6) 'सभामेति कितवः पृच्छमानः'' इति द्यूतार्थम् आगतस्य प्रस्तावोऽस्ति । यजुःसंहितासु ब्राह्मणेषु च सभाया द्यूतसम्बन्धः स्पष्टः । न तावतास्य द्यूतार्थत्वं शङ्कनीयम् । यतः सार्वजनीनव्यवहारविचारार्थमेव इयं सभा वर्तत इति बहुभ्यो मन्त्रेभ्यो ज्ञायते । यदा विचारो नासीत् तदात्र द्यूतं कृतम् इति वक्तुं शक्यते । सभास्थाणुः इति मुख्यस्य द्यूतकारस्य प्रस्तावोऽस्ति । लुड्विक्महाशयो ब्राह्मणा धनवन्तश्च सभासद आसन् इति वदति । सभेयस्य पुत्रस्य प्रार्थना ब्राह्मणमात्रविषया इति स मन्यते । तथा रत्न्या सह सभायाः सम्बन्धसत्त्वात् (ऋक् सं. 1·91·20) । सभा ब्राह्मणानां धनवतां च सङ्घटनमिति वदन्ति । परं त्विदं न संगच्छते । सभेयस्य पुत्रस्य प्रार्थना न ब्राह्मणमात्रसम्बन्धि दृश्यते । तथा रत्न्या सह सभायाः सम्बन्ध प्रदर्शनं निर्मूलमेव । अस्मिन् मन्त्रे यज्ञस्यैव विशेषणत्वात् न सभायाः रत्न्या सम्बन्धः । अश्वमेधमन्त्रे सभेयस्य प्रार्थना सर्वजनसाधारणी दृश्यते । नात्र जातिविषयस्य धनवतो वा प्रस्तावः । वाक्सामर्थ्यमात्रं तत्रापेक्षितमिति मन्त्रेभ्यो ज्ञायते । गृहेष्वपि सभास्थानमासीत् इति सभ्याग्निविधानेन ज्ञायते । गृहस्य कश्चन भागः सभात्वेन कल्पितः । तत्र समागतैः पुरुषैः गृहस्वामी वादप्रतिवादं करोति । जिम्मर्महाशयः, सभा, ग्रामसभा, इति वदति । ग्रामणीश्च तस्या अध्यक्ष इति वदति । हिल्लिब्रण्ड्महाशयाः सुजातानामेव सभायां सम्बन्ध इति वदति । तदपि न संगच्छते; सभासंबन्धिमन्त्रे ब्राह्मणवाक्येषु वा सुजातानां सम्बन्धाभावात् । यथा वा राज्ञः सम्बन्धः समित्या तथा सभया सम्बन्धोऽस्तीति ज्ञायते । राज्ञा सम्बन्धः कथम् इति परं न ज्ञायते । शतपथब्राह्मणे च ''अस्य राजानः समागता आगच्छन्ति । पूर्वो राज्ञो अभिवदति । भद्रो हि भवति'' इति प्रतिपाद्यते । अनेन राजानोऽपि सभागन्तार इति ज्ञायते । (समुदितम् इति ब्रह्मविदां सङ्घ उच्यते । तत्र हि कर्मदेवताविषये विचाराः कृताः । एतादृशस्य समुदितस्य प्रस्तावो जैमिनीयब्राह्मणेऽस्ति) । एकस्मिन् स्थले ''जीवलश्चकारीरादिः । इन्द्रद्युम्नश्च भाल्लवेयः तैहारुणेराचार्यस्थिसभाग आजग्मतुः'' (जै. ब्रा. 1·271) । अत्र सभागस्य प्रस्तावः । ऋग्वेदे ''चन्द्रो याति सभामुप'' इति साडम्बरं सभां प्रति आगच्छतः प्रतिपादनात् राजैव स इत्यपि ज्ञायते । अपरुद्धस्य राज्ञः पुनः स्थापनार्थं विहिते

कर्मणि ग्राम्यवादिनः सभाया वा तस्य विध्वंसनं मैत्रायणीयसंहितायां प्रतिपाद्यमानं राज्ञः सभासम्बन्धं वदत्येव (मै. सं. 2-2-1-1) । उपनिषत्सु च राज्ञां समितिः परिषश्च प्रस्ताविता । "स्त्रियः सभां न गच्छन्ति" । "तस्मात् पुमांसः सभां यन्ति । न स्त्रियः" इति मैत्रायणीय-संहितायां (4-7-14) प्रतिपादनात्, कस्यचित् कर्मणः करणेन संभाव्यमानमरिष्टं वदत् ब्राह्मणं "स्त्रियः सभामीयुः, न पुंसः" । (मै. सं. 4-7-4) इति वदति । यतः सभायां राज्यतन्त्रसम्बन्धिव्यवहारा विचारिताः । अत एव स्त्रियः तत्र न गच्छन्ति इति वैदिक-कोशकर्तारो मन्यन्ते । सभाप्रस्तावः प्रायः सर्वेषु वेदेषु वर्तते । (V.S. 3-4-5-16-24-20) "स प्रथसभां मे गोपाय । ये च सभ्याः सभासदः । तानिन्द्रियावतः कुरु सर्वमायुरुपासतां" (तै. ब्रा. 1-1-10-6) इति प्रार्थना वर्तते । अत्र सभारक्षणप्रार्थनं सभ्यानाम्, इन्द्रियवत्त्वं दीर्घायुष्ट्वं च प्रार्थ्यते । यद्यप्ययं मन्त्रः सभ्याग्निप्रार्थनाकाले प्रयुक्तः प्रतिगृहं वर्तमानसभाविषय इत्यूहितुमवकाशोऽस्ति; परं तु मन्त्रे तादृशं लिङ्गं नोपलभामहे । ततश्च प्रतिगृहं वर्तमान-सभामात्रविषयमिति सङ्कोचस्यावकाशो नास्ति । सर्वजनसाधारणसभाया एवात्र प्रार्थना-सूचिता । शतपथब्राह्मणे (2-3-2-5) 'अनशित्वा मुहूर्तं सभायाम् आसित्वा अपि कामं पर्ययेत" इत्युच्यते । आधानप्रकरणे चैवमुच्यते । अतश्च सभाया द्यूतस्य च सम्बन्धः सुस्पष्टः । तैत्तिरीयसंहितायां चतुरात्रब्राह्मणे सुसभेयः पुत्रः फलत्वेन निर्दिष्टः । "आस्य चत्वारो वीरा जायन्ते । सुहोता सूद्गाता स्वध्वर्युः सुसभेय" (तै. सं. 7-1-8) इति । मन्त्रब्राह्मणवाक्येषु सभाविषयं श्रूयमाणं परिशील्यैवं निर्णीतवन्तः । आधुनिकाः ऋक्संहिता-काले अथर्वसंहिताकाले च समितिवत् सभापि सार्वजनीना आसीत् । परं तु समितिः सर्वथा उत्सन्नप्राया । ब्राह्मणकाले यद्यपि सभा वर्तते तथापि तस्य सार्वजनीनत्वमुत्सन्नम् । सर्वजनसाधारणासभा यजुः संहिताकाले ब्राह्मणकाले च राज्ञाधिष्ठिता । अधिकारवतां पुरुषाणामेव सभा अभूत् । राजा यत्ता सभा (Royal Couneil, Royal Court) रायल् कौन्सिल्, रायल् कोर्ट्) । उपनिषत्काले चेयं सभा विदुषां सभा संजाता । अत्रापीयं राज्ञः सभैव । सभासमितिपदद्वयं वर्तते । सभ्याः सभासद इति । सभासदशब्दः सभायां ये सीदन्ति स्थिराः सभ्याः । तेषां प्रतिपादनपरः । परं तु सभ्यपदं साधारणसभ्यानेव प्रतिपादयति इत्यपि वदन्ति । परं तु सभासमित्योरुभयोरपि यजुःसंहिताकाले ब्राह्मणकालेऽपि उभयोरस्तित्वे न विरोधं पश्यामः । ऋग्वेदमन्त्रकालस्य यजुर्वेदमन्त्रकालस्य चात्यन्तं विप्रकर्षश्च नासीत् । ऋक्संहितोक्तसमित्या झडित्यन्तर्धान-प्रतिपादनं क्लिष्टमेव । राजसूयादिराज्यतन्त्रप्रधानेषु कर्मसु समित्या वा सभाया वा प्रस्तावो नास्ति इत्यपि यत्किंचिदेतत् । ब्राह्मणकालेष्वेव ग्राम्यवादिनः तत्सभायाश्च प्रस्तावो वर्तत एव । सभाया नीतिनिर्णयपरत्वमपि नाङ्गीकारार्हम्; यतः सभायां सर्वेऽपि

विषया विचारिताः । सभामन्त्रे च पितर इति प्रयोगात् वृद्धानां सभा सभा इति जयस्वाल् वदति । पारस्करगृह्ये कश्चन मन्त्रः श्रुतः । तत्र च नदिः त्विषिः इति नामद्वयं सभायाः प्रतिपादितम् । "नदिः नामासि, त्विषिर्नामासि" इत्युच्यते । नदिशब्दस्य सर्वथा शब्दवत्त्वं तथा त्विषिमत्त्वं चोच्यते । अनेन सभायां सर्वदा वादप्रतिवादे शब्द आसीत् इति वादप्रतिवादोच्चस्थनाकालो सर्वेषां मुखं दीप्तमासीत् इति च निश्चीयते । अथवा धर्मनिर्णयसभायामग्नेः स्थापनायावश्यकत्वात् त्विषिशब्देन स एवार्थः प्रतिपाद्यते । जयस्वाल्-महाशयाः न्यायनिर्णयार्थं प्रवृत्ता इति वदति । ग्राम्यवादिनः सभा मैत्रायणीसंहितायाम् उल्लिखिता । (1-2-2-1) "धर्माय सभाचरम्" इति पुरुषमेधप्रकरणे तैत्तिरीयब्राह्मणे वाजसनेयसंहितायां च दर्शनात् सभाया धर्मनिर्णायकत्वमप्यङ्गीकार्यमेव । तत्रान्यविषयवत् राज्ञोऽप्यधिकारोऽङ्गीकार्यः । तैत्तिरीयसंहितायां सभाया राज्ञश्च सम्बन्धो मुखान्तरेण प्रस्तुवितः । अत्र हि राष्ट्रभृन्मन्त्रेषु "भुवनस्य पते" इति मन्त्रस्य विधानप्रतिपादनपरे ब्राह्मणवाक्ये एवं दृश्यते—"यस्य कामयेतान्नाद्यमाददीय" इति । "तस्य सभायामुत्तानो निपद्य भुवनस्य पत इति तृणानि संगृह्णीयात् । ऋतवोऽस्मा अनुप्रयच्छन्ति" इति । अत्र राज्ञः सकाशात् तत्सम्बन्धि अन्नाद्य आहरणार्थोऽयं कल्पो विहितः । तत्र यद्यपि राजशब्दो न प्रयुक्तः, अथापि पूर्वोत्तरपर्यालोचनया इदं राजविषयम् इति वक्तुं शक्यते । तत्र तस्य सभायाम् इति तत्सम्बन्धिसभास्थानस्य प्रस्तावोऽस्ति । सभाशब्देन जनसम्मेलनस्थानस्य वा, जनानां वा ग्रहणे न किञ्चित् भेदं पश्यामः । एकस्य राज्ञः सभा एकैव सर्वं राज्यार्थम् । जैमिनीयब्राह्मणे साक्षादेव राजसभायाः प्रस्तावोऽस्ति । "राजसभं वा एतत् यद् दशममहः" (3-289) ॥ परं तु तस्मिंस्तस्मिन् ग्रामे बह्वयो ग्रामण्यः तत्सभाश्च सन्ति । इदं च मैत्रायणीसंहितातो लभ्यते । तत्र हि ग्राम्यवादिसभायाः प्रस्तावोऽस्ति । इत्थमेव प्रतिगृहं च सभा वर्तते इति यजुर्ब्राह्मणेषु सभ्याग्निविधानप्रकरणे आधानप्रकरणे च स्पष्टं प्रतिपादयते । गृहसभायमागतानां पुरुषैः सह संवादः क्रियते द्यूतं च क्रियते ॥

॥ विदथम् ॥

विदथ इति कस्याश्चन सभाया नाम "बृहद्वदेम विदथे सुवीराः" इति बहुवारम् ऋग्वेदे पठ्यते । विदथस्य बहुवारप्रस्तावः समस्ति । तस्य किं कार्यम् के च सभ्या इत्यपि च न निर्णेतुं शक्यते । रातमतानुसारेण इदं च स्यानम् आवश्यकम् । सा चाल्पीयसी सभा, युद्धार्थं च यागादिनिर्वाहार्थं च प्रवृत्ता इति वदति । लुट्विक्-महाशयास्तु इयं सभा धनिनां ब्राह्मणानाम् इति वदन्ति । ब्लुम्फ़ीलड् महाशयस्तु विदथ-शब्देन गृहमेवोच्यत इति वदति । यः कोऽपि वार्थोऽस्य भवतु ; सर्वथा इयं जनानां संमेलनात्मिका सभा इत्यत्र न मनागपि संशयोऽस्ति । परं तु ब्लुम्फ़ीलड् महाशयेन यदुक्तं विदथ-शब्दस्य गृहवाचकत्वमेव इति, तत् सर्वथा न सङ्गच्छते । 'बृहद्वदेम विदथे सुवीरा.' इत्येतत् महतीं ज्ञानवतां सभामधिकृत्यैव प्रवृत्त इति अङ्गीकार्यमेव । ऋग्वेदे विदथस्य प्रस्तावः । 122 वारम्, तथा अथर्ववेदे 22 वारम्, यजुःसंहितासु ब्राह्मणेषु च 31 वारं वर्तते । जयस्वालमतानुसारेण विदथाख्यसभा मतविषये आज्ञादानार्थं प्रवृत्ता इति दृश्यते । परं तु विदथेन युद्धविषये समाधानकाले राज्यतन्त्रविषये मतानुष्ठानविषये च आज्ञा दत्ता इति रात्मतानुसारेण जयस्वाल् अपि अभिप्रैति । परं तु इयं सभा विदथाख्या सभासमित्योः अङ्गभूतैव इत्यभिप्रैति । अत्यन्तसमीपे काले शर्मामहाशयः विदथविषये स्वकीयग्रन्थे बहु विचारं कृतवान् । (Aspects of Political Ideas and Institutions in Ancient India) इत्यस्मिन् ग्रन्थे । तन्मतानुसारेण विदथे सर्वे समागम्य स्वकीयशौर्यं प्रकाशितवन्तः । युद्धमकुर्वन् साम गायन् क्रीडन्त आसन्, संभूय भगवत्प्रार्थनां च अकुर्वन् । तत्र च सार्वजनीनभगवत्प्रार्थना आसीदिति तस्याभिप्रायः । अस्य च न राज्यतन्त्रसम्बन्धोऽस्ति इति शर्मा अभिप्रैति । प्रथमं तावत् आर्याः संभूय प्रार्थनामङ्गीकुर्वन् इत्यपि च बदति । इदं चङ्गीकार्यमेव । केषुचित्, स्थलेषु विदथशब्देन गृहं यागशाला च उच्यत इति । अथापि तस्य जनसम्बन्धपरत्वमन्यत्र नापह्नोतुमर्हति । विदथहेपुत्रस्य प्रार्थनापि दृश्यते । "सादन्यं विदथ्यं सभेयम्" इति कुत्रचित् विदथबहुत्वमपि श्रुतम् ॥

(ऋक्सं. 2-27-12) एषु स्थलेषु "बृहद्वदेम विदथे सुवीराः" इत्युच्यते । ऋक्सं. (1-16, 2, 13, 11-21, 13-13, 14-12, 5-10. 16-19, 17-9, 18-9, 19 9, 20 9, 23-19, 24-16, 27-17, 28-11, 29-7, 33-15, 35-15, I-117-25, II-12-15, VIII-48-14, विदथाख्यसमितिश्च सभासमित्योः पूर्वकालीना

प्राचीनतमा च समितिः, यस्याः सकाशात् सभा समितिश्चोत्पन्ना इति वदन्ति । यतः विदथप्रस्तावः ऋग्वेदे परं वर्तते; अतो विदथविषयान् मन्त्रभागान् परामृशामः ॥

(ऋकूसं. 1-167-3) वचो विदथे ऐकमत्यम् उदाहृतम् । अनेन ज्ञायते अत्र वाक्-पूर्वकाः व्यवहाराः आसन्निति । परं तु अन्ततो गत्वा वाचि ऐकमत्यं सम्पाद्यते । (ऋकूसं. 1-130) "ऐन्द्रयाहृदयुपनः परावतो नायमच्छा विदथानीव सत्पतिरस्तं रजेव सत्पतिः" इत्युच्यते । अत्र विदथान् सत्पतिः यथा दूरादपि आगच्छति एवमागन्तव्यम् इति इन्द्रः प्रार्थ्यते । सत्पतिरिति प्रयोगः, अत्र पत्युः सत्त्वं प्रतिपादयति । सत्पतेः विदथं प्रति आगमनं सर्वं विचारार्थमेव भवति । तच्च त्रिषु स्थलेषु प्रतिपाद्यते । "नवोढायाः स्त्रिय उपदेशकाले "विदथमावदासि" (ऋकूसं. 10-85-26) इति विदथे वक्तृत्वमुपदिश्यते । अत्र च विवाहानन्तरं गृहे वर्तमानायाः स्त्रिय आवश्यकेषु विषयेषु स्वाभिप्रायाविष्करणमेव उच्यते । इयं च गृहमात्रविषया । परं तु नानेन विदथशब्दस्य गृहमात्रपरत्वं शङ्कनीयम् । बृहत्-विदथसदृशत्वात् अल्पीयसोऽपि कुटुम्बविदथस्य विदथत्वं न्याय्यमेव । विदथेषु हि तस्य सम्राजोऽपि प्रस्तावोऽस्ति । "(वितथ्यो न सम्राट्" (ऋकूसं. 4-21-2) "यस्य क्रतुः" (ऋकूसं. 4-21-2) विदथेषु अर्हः वीरः उदाहृतः । "विदथ्यं न वीरम्" (ऋकूसं.7-36-8) अश्विनोः रथो विदथं प्रति गच्छति । एकवचनान्तस्य विदथस्य प्रस्तावः केषुचित् स्थलेषु (ऋकूसं. 1-60-1-1-31-6-1) अन्यत्र बहुविदथवत्ता प्रतिपाद्यते (ऋकूसं. 3-1-18-3-14-1) । द्विवचनन्तविदथप्रयोगोऽपि दृश्यते (ऋकूसं. 10-12-7) । "यस्मिन् देवा विदथे मादयन्ते" । विवस्वतः सदने विदथे सर्वे देवा. मोदं प्राप्नुवन्ति इति वर्ण्यते । तथा अथर्ववेदेऽपि (8-1-16) यमस्य गृहे विदथं प्रति देवा विवादं कुर्वन्तीति उच्यते । (ऋकूसं.12-2-30) अनेन ज्ञायते विदथः जनानां सङ्घ इति । अन्यत्र निर्लज्जम् अभिप्रायाविष्करणं सूचितम् । "येनात्मयातन्वं संसृजस्वाथाजित्री विवदमावदाथ" (ऋकूसं. 10-85-27) । वृद्धा अपि स्त्रियो विदथे संगताः स्वाभिप्रायाविष्करणार्थम् । "यो राजभ्यः ऋतनिभ्यो ददाश । यं वर्धयन्ति पुष्टयश्च नित्याः स देवान् याति प्रथमो रथेन वसुदा वा विदथेषु प्रशस्तः" (ऋकूसं. 2-27-12) । अत्र य आदित्येभ्यो हविर्ददाति, यं च आदित्या वर्धयन्ति सःयजमानो धनवान् परार्थमपि धनं प्रयच्छन् रथेन याति विदथेषु प्रशस्तो भवति इत्युच्यते । अत्र विदथेषु प्राशस्त्यसम्पादनं प्रतिपाद्यते । तथा विदथे संमेलनार्थं रथेन कश्चन आयतीति अयमर्थोऽपि सूच्यते । (1-167-6) "आस्थापयन्त युवतिं युवानः शुभे निमिश्लां विदथेषु पज्राम् । अर्को यद्वो मरुतो हविष्मान् गायद्गाथं सुतसोमो दुवस्यन्" (ऋक्सं. 1-167-6) । अत्र विदथेषु युवानो युवतयश्च संमिश्ला अभूवन् इति द्योत्यते । "विदथेष्वा भुवः" (ऋक्सं. 1-64-11) "विदथेषु प्रचेताः" (ऋक्सं. 4-6-2-1-159-2) इत्यादिकं विदथे वाक्चातुर्यवतां प्रवेशं

द्योतयति । "सुवीरासो विदथमावदेम" । (ऋक्सं. 2-12-5—2-11-21) "या जागृविः विदथे शस्यमामा (ऋक्सं. 3-39) "विदथेषु प्रवाच्यः" (ऋक्सं. 4-36-5) इत्यादिषु प्रशंसनं च द्योतयति । (ऋक्सं. 10-91-9) इति पठ्यमानम् "अन्यत्र त्वामिदत्र वृणते त्वा यवः । होतारमग्ने विदथेषु घृष्वय." (ऋक्सं. 1-166-2) यद्यप्यत्र मरुतां क्रीडा साक्षादुक्ता, अथापि विदथेषु क्रीडायाः सत्वं द्योतयत्येव । "विदथेषु सम्राट्" (ऋक्सं. 3-56-5) । अनेन विदथेषु कस्यचिदनितरसाधारणमाधिपत्यमपि सूच्यते । अन्ततो गत्वा सम्राजो विदथे आगमनं च प्रतिपाद्यते । इदं च स्पष्टमन्यत्र । "विदथ्यो न सम्राट्" (ऋक्सं. 4-21-2) "कविर्निन्यं विदथानि साधन्" (ऋक्सं. 4-16-3) । अत्र मेधावित्वं गूढार्थवक्तृत्वं च विदथेऽपेक्षितमिति दृश्यते । यद्यपि सायणः तत्र तत्र विदथशब्दस्य प्रायो यज्ञपरत्वमेव वदति । परं तु युद्धार्थत्वमपि सोऽङ्गीकरोति । (ऋक्सं. 7-18-13) "व्रायोः सवितुर्विदथाति मन्महे" । (तै. सं. 4 7-14) "विदथानि प्रचोदयन्" इत्यदिषु आज्ञापरत्वमपि संभाव्यते । "विदथानि चिक्यत्" (ऋक्सं.4-38-4) । अत्र विदथशब्दो ज्ञातव्यार्थपरो व्याख्यातः सायणेन ॥ (ऋक्सं. 1-31-6) "त्वमग्ने वृजिनवर्तनं परं सक्मान्विपर्षि विदथे विचर्षणे" । अत्र च विद्युन्मार्गीणामपि विदथे शोधनं क्रियत इत्युच्यते । (ऋक्सं. 3 1-18) 'विदुरोणे अमृतो मर्त्यानां राजा ससाद विदथानि सादन्' । यद्यप्यत्र अग्निः प्रस्तूयते, परं तु राज्ञः स्वस्थाने तिष्ठतः स्वाज्ञाः साधयतश्च ध्वनिर्दृश्यते । (ऋक्सं. 3-28 4) "तव भागधेयं न प्रमिनन्ति विदथेषु धीराः" (ऋक्सं. 2-1-4) "त्वमंशः विदथे देव भाजयुः ।" एतत्स्थलद्वयपरिशीलनेन धनादिसंविभागोऽपि अनेन कृत इति ज्ञायते । (ऋक्सं. 3-26-6) "व्रातं व्रातं गणं गणं सुशस्तिभिः—गन्तारो यज्ञं विदथेषु धीराः ।" एतन्मन्त्रपर्यालोचनेन सर्वेषामपि जनानामत्र समागमः सूचितः । अत्र "विदधाति धीतिभिः ।" (ऋक्सं. 7-66-10-1-85-1) "मदन्ति वीरा विदथेषु घृष्वयः" इत्यादिकं विदथेषु प्रमोदस्य परिस्थितिमपि वदति । यद्यपि साक्षात् विदथविषये न किमप्युक्तम् ऋग्वेदे । सायणेन च विदथशब्दस्यार्थान्तरपरतया व्याख्यानं च कृतम् ; अथापि अस्य जनसम्मेलनपरत्वम् आधुनिकविमर्शकरीत्या वयमङ्गीकुर्मः । नास्माकं यज्ञपरत्वे विचिकित्सा, यतो यज्ञेषु बहवः ऋत्विजोऽन्ये च संमिलिताः । अतश्च यज्ञस्यापि विदथत्वे न विरोधः । परं तु ऐतिहासिकपद्धत्या विदथशब्दस्य सुप्राचीनजनसंमेलनपरत्वे स्वारस्यं बहु वर्तते । प्रायः सर्वा अपि देवता विदथे संबद्धा दृश्यन्ते । नैतावतास्य यज्ञमात्रपरत्वम् । बहुषु स्थलेषु राजत्वेन देवताः प्रतिपादिताः । नैतावता लौकिकस्य राज्ञोऽपह्नवः शक्यशङ्कः । लोकेषु पुरुषेषु उत्कृष्टो राजा ; अतश्च देवतां प्रस्तोतुं तस्य राजत्वमपि वदन्ति ऋषयः । एवमेव विदथाख्यं लौकिकं स्थानमभूत् । तत्र सर्वं समागम्य स्वसामर्थ्यं प्रकटयामासुः । स्त्रियः पुरुषाश्चात्र समागत्य देवताप्रार्थनमपि कृतवन्तः । एतल्लौकिकविदथं मनसि निधाय देवता वर्णयन्ति ऋषयः । "बृहद्वदेम विदथे सुवीराः" इति एकमेवालं विदथस्य सभापरत्वे ॥

॥ आमन्त्रणम् ॥

जनतन्त्रस्थानेषु आमन्त्रणमप्येकम् । राजा कादाचित्क आलोचनार्थं कांश्चिद् ब्राह्मणान् आहूय आमन्त्रयति । सत्यवसर एवैतादृशसभाया आवश्यकता भवति । यद्यप्यामन्त्रणाख्यं स्थानं न ऋग्वेदे निर्दिष्टम, परं तु अथर्ववेदेऽस्य प्रस्तावोऽस्ति । "विराड् वा इदमग्र आसीत्" (8-10) इति विराट्तत्त्वस्य महिमा प्रतिपाद्यते । "सोदक्रामत् । सा सभाया न्यक्रामत् । यन्त्यस्य सभां सभ्यो भवति । य एवं वेद । सोदक्रामत् । सा समितौ न्यक्रामत् । यन्त्यस्य समितिं सामित्यो भवति । य एवं वेद" इति सभासमितिप्रस्तावानन्तरम् 'सोदक्रामत् । सामन्त्रणे न्यक्रामत् । यन्त्यस्य आमन्त्रणम् । आमन्त्रणीयो भवति । य एवं वेद' इति आमन्त्रणाख्यं स्थानं सभासमितिभ्यां सह निरूपितम् । तत्रामन्त्रणाख्यं स्थानं तथा तदर्हता च स्पष्टं प्रतिपाद्यते । एतादृशव्याख्यानस्य विवरणं न अथर्ववेदेऽस्ति । परं तु कठमैत्रायणी-संहितयोः आमन्त्रणसम्बन्धी विषयो निरूपितः "राजसूययागे । दशपेये द्वादशप्रष्ठौहि गर्भिणी-ब्रह्मणः' इति दक्षिणाकल्पं विधायैवमुच्यते "वाग्वै धेनुः । गार्भो मन्त्रः । वाच्येवास्य मन्त्रं दधाति । आमन्त्रणीयो भवति" इति । (मै. सं. 4-4-8) ॥

अनेन आमन्त्रणे वाचा उपकारः क्रियते । तस्य च मन्त्रत्वमस्ति इत्ययमभिप्रायो लभ्यते । कापिष्ठलकठसंहितायाम् आधानप्रकरण एवं श्रूयते 'प्रनूनं ब्रह्मणः स्पतिर्मन्त्रं वदत्युक्तम् । यस्मिन् इन्द्रो वरुणो मित्रो अर्यमा देवा ओकांसि चक्रिरे' इति आमन्त्रणे जुहोति इत्युच्यते । अयं च मन्त्रः (1·40-5) ऋग्वेदे पठितः । आमन्त्रणाख्यं स्थानं किञ्चिदासीत् इत्यनेन ज्ञायते । आवसथस्यैवाऽग्नेः आमन्त्रणमिति संज्ञान्तरमस्तीति ज्ञायते । इति वदति । तथा सूत्रकारः तस्य पुरस्तादावसथः तदामन्त्रणमित्याचक्षते । कपिष्ठलकठसंहिताया उद्धृते ऋग्वेदमन्त्रे मन्त्रशब्दः श्रूयते । अस्य शब्दस्य मन्त्रालोचनपरत्वं कापिष्ठलकठ-संहितारीत्या भवति । एतदनुसारेणैव समनन्तरे मन्त्रे (R.V.1-40-6) श्रूयमाणमन्त्रशब्दोऽपि आलोचनार्थक इत्यपि वक्तुं शक्यते । एनेन महामहोपाध्यायगङ्गानाथजीमहाशयेन यदुक्तं तत्परास्तम्; यतः भटनागरमहाशयेन पृष्टः स आलोचनार्थकमन्त्रशब्दो मन्त्रीशब्दो वा वेदे नास्तीत्युक्तवान् । 'मन्त्रिणे वाणिजाय' इति शतरुद्रमन्त्रेषु श्रवणात् । (T.O.1) ऋग्वेद एव मन्त्रशब्दस्य दर्शनाच्च मन्त्रशब्दस्य गुप्तभाषणपरत्वं सायणः मुखान्तरेणाङ्गीकरोति । मन्त्रशब्दं विवृण्वन् सायणः मन्त्रीगुप्तप्रभाषणेति धातुं पुरस्कृत्यैव शब्दरूपं कृतवान् । परं तु सायणरीत्यात्र ऋग्वेदे श्रूयमाणमन्त्रशब्दः प्रसिद्धवेदमन्त्रपर एव, न समालोचनपरः । आमन्त्रणविषये

कश्चनेतिहासोऽपि कापिष्ठलकठसंहितायां पठ्यते (7-3-4) "सह वै देवाश्च मनुष्याश्चोदनपचन आसन् । ते मनुष्याणां देवान् अत्यचरन् । तेभ्यो देवा अन्तं प्रत्युह्य गार्हपत्य अभि उदक्रामन् । तान् तस्मिन् अन्वागच्छन् । ते मनुष्या एव देवानत्यचरन् । तेभ्यो देवाः पशुं प्रत्यूह्य आहवनीयमभि उदक्रामन् । तान् तस्मिन् अन्वागच्छन् । ते मनुष्या एव देवान् अत्याचरन् । तेभ्यो देवा यज्ञं प्रत्यूह्य सभां अभ्युदक्रामन् । तान् तस्यां अन्वागच्छन् । ते मनुष्या एव देवान् अत्याचरन् । तेभ्यो देवा विराजन् प्रत्यूह्यामन्त्रणं अभ्युदक्रामन् । तांस्ततः न अनुप्रार्थयन्त । एते वै देवानां संक्रामाः । श्रेयांसं श्रेयांसं लोकमभ्याक्रामति । य एवं वेद । एतत् देवानां सत्यमनभिहितं यदामन्त्रणम् । तस्मात् सुप्रातः आमन्त्रणं गच्छेत् । सत्यमेव गच्छति । तस्मादामन्त्रणम् आहूतो यायात् । तस्मादामन्त्रणे नानृतं वदेत् । वह्निर्वै नाम ओदनपचनः । अस्य वह्निर्जायते । य एवं वेद । गृहा गार्हपत्यः । ग्रहवान् भवति । य एवं वेद । जिष्णिया आहवनीयं उपेनं यज्ञो नयति । य एवं वेद । स प्रजामद्य विदेवनं प्रचते प्रजया पशुभिः । य एवं वेद । अनार्य आमन्त्रणं नैनमाप्नोति । य ईप्सति । य एवं वेद ॥"

अनेनेतिहासेनामन्त्रणस्थानस्य सत्यत्वमनभिभवनीयत्वं चोक्तम् । आमन्त्रणार्थमाहूतः प्रातरेव गच्छेत् । आमन्त्रणार्थमनाँहूतो न गच्छेत् । तथा आमन्त्रणेऽनृतं न वक्तव्यमिति चोच्यते ॥

गुप्तस्थाने आलोचनम् अस्य वमियसूक्ते (1-164-10) एवं प्रतिपाद्यते । मन्त्रयन्ते दिवोऽमुष्य पृष्ठे विश्वविदं वाचमविश्वमिन्वाम् ॥

एतच्चामन्त्रणाख्यस्य स्थानस्य महिमानं प्रतिपादयति ।

अयमेवेतिहासः काठकसंहितायामपि प्रतिपाद्यते । तत्रापि आमन्त्रणम् अनभिजितं स्थानम् । 'सुप्रात आमन्त्रणं गच्छेत् । स इदं च स्थानं सत्यम् । आमन्त्रणं न आहूतो येयात् । तस्मादामन्त्रणे नानृतं वदेत्' इति प्रतिपाद्यते ॥

आमन्त्रणस्य गुप्तस्थाने स्थित्वा क्रियमाण-आलोचनपरत्वम् एभिः मन्त्रब्राह्मणभागैः सिध्यति । आपस्तम्बोऽपि धर्मसूत्रे आमन्त्रणस्य प्रस्तावं करोति । शिशुपालवधकाव्ये राजसूयार्थमाहूतेन भगवता श्रीकृष्णेनामन्त्रणं कृतमिति प्रतिपादितम् । आमन्त्रणार्थं च गिरिपृष्ठं गतवन्त इत्युच्यते । अतः सभासमित्यादिवत् इदमप्यालोचनस्थानमासीदिति गम्यते । आहूतस्य सुप्रातर्गमनम, यथा वा तस्य गमनमन्यैर्न ज्ञातं भवति, तथा रहस्यरक्षणार्थमेव सुप्रातः गच्छेदित्युच्यते । एकान्तस्थाने आहूय पृष्टः सत्यमेव वक्तुमर्हति । अनृतवदने महान् दोषो भवति । यत एकान्तेऽपि विस्रब्धमाहूय पृष्टः यद्यनृतं ब्रूयात् तदा महाननर्थो भवेत् ।

अतः सामान्यतः सत्यवचनस्य निर्बन्धेऽपि पुनरत्र नानृतं वदेदित्युक्तम् । यत आमन्त्रणे सत्यज्ञानार्थं सर्वेऽपि सङ्गताः । अत एव तस्य सत्यत्वमप्युच्यते । आमन्त्रणस्थानस्यानाप्तत्व-मुच्यते । किमिदमनाप्तत्वम्? न हीदमापयितृत्वम् । अपि तु इतरैरप्राप्यत्वमेव । आमन्त्रणे स्थिता अन्यैः अप्राप्याः । तथात्र विचार्यमाणानां विषयाणामपि इतराप्राप्यत्वमपि सूचयति । अथर्ववेदे आमन्त्रणीयत्वं योग्यतया प्रतिपादितम् । न हि सर्वेषामपि आमन्त्रणं कर्तुं शक्यते । येषां पुनः विषयज्ञाने रहस्यगोपने च शक्तिरस्ति तेषामेवामन्त्रणेनाह्वानं भवति । तथा येषां मन्त्रालोचने सामर्थ्यमस्ति तेषामेवात्राह्वानं क्रियते । एतादृशं स्थानं रहस्यालोचनार्थं कल्पितम् । सुरक्षितं च अस्य च राज्यतन्त्रसम्बन्धः सुस्पष्ट एव ॥

॥ जनतन्त्रस्थानानि कदा उत्सन्नानि ॥

मन्त्रब्राह्मणेषु जनतन्त्रस्थानानि कार्यकराण्येवासम् । सभासमित्यादीनि स्थानानि वैदिकराज्यतन्त्रे प्रधानान्येव । अथापि गच्छता कालेन तानि उत्सन्नानि । राजाख्यं स्थानं जनतन्त्रस्थानं च सहैवास्ताम् । तयोर्मध्ये राजाख्यस्थानमेवावशिष्टम् । तस्य स्थिरत्वात् वीर्यवेदकपुरुषाश्रयत्वाच्च । जनतन्त्रस्थानस्यानेकाधीनत्वात् कालक्रमेण राजाख्यस्य स्थानस्य परिशिष्टिः संभाव्यत एव । पश्चात्कालीनस्मृतिषु जनतन्त्रस्थानस्योल्लेखोऽपि न दृश्यते । महाभारते कौटिल्यार्थशास्त्रेऽपि गणतन्त्रस्थानानां दूषणं साक्षात्परम्परया च बहु कृतम् । यथा वा स्मृतीतिहासपुराणेषु राज्ञ उपकारका मन्त्रिणः प्रसिद्धाः, न तथा वेदकालेषु मन्त्रिण आसन् । अत एव T. O. मूलभूतोंऽशः परं सुरक्षितो दृश्यते । राजानः प्रजारञ्जनधर्ममुत्तमं धर्मं मन्वाना एवासन् । आवश्यकसन्दर्भेषु जनानाहूय तेषामभिप्रायं विदितवन्तः । परं त्विदं राजभिः स्वयमेव कृतम् । नात्र धर्मशास्त्राज्ञा । रामाभिषेककाले दशरथेनाहूतं जनसम्मेलनं तादृशमेव । अथापि गण-पूग-जनपदनाम्ना तत्तत्समुदाचाररक्षणार्थानि स्थानानि आसन्नेत्र । तेषां न राज्यतन्त्रेण सम्बन्धः । सामुदायिकधर्मविषय एव तेषामधिकारः । तथा राजानः परिषद्भिरुपकृता एव धर्मनिर्णयमकुर्वन् । परिषत्सु च न सामान्यजनानां प्रवेशः । अपि तु विदुषामेव । राजतन्त्रसम्बन्धिकार्यनिर्वाहार्थं मन्त्रिसभैव राज्ञा सहावर्तत । ऐतिहासिक-पद्धत्या विमर्शे एवं भवति । कालेन राज्ञां जनतन्त्रस्थानानां च महान् सङ्घर्ष आसीत् । अयं सङ्घर्षो बहुकालपर्यन्तमनुस्यूतमवर्तत । तादृशसङ्घर्षे जनतन्त्रस्थानानि नष्टानि । राजाख्यं स्थानमेवावशिष्टमभूत् । पश्चात्कालस्मृतिषु राजाख्यस्थानस्य महती प्रशंसा क्रियते । राजा च यथेष्टकारी अभूत् । राजाज्ञाया अन्यादृशं प्राधान्यं च दत्तम् । एतादृश-राजाख्यस्थानमेव पश्चात्काले प्रसिद्धिं गतम् । नात्र जनतन्त्रस्थानानां मनागप्यवकाशोऽस्ति । परं तु वेदे दृष्टं राजाख्यं स्थानं न तादृशम् । जनतन्त्रस्थानेन सहैव राजा अवर्तत । राजाख्यस्थानस्य न स्वातन्त्र्यम् । अपि तु प्रजाभिर्निर्णीतार्थकरणमेव कार्यम् । राज्ञः स्थितिरपि जनायत्ता । तादृशं राजस्थानं देशान्तरराजतत्त्वापेक्षया विलक्षणम् । एतच्चोपरि निरूपयिष्यते । वेदेषु न कुत्रापि मन्त्रिसभायाः प्रसिद्धिरस्ति । जनतन्त्रस्थानान्येवमन्त्रिसभास्थाने आसन् । पश्चात्काले यद्यपि जनतन्त्रस्थानानि नष्टानि । अथापि जनतन्त्रतत्त्वस्य जनतन्त्रतत्त्वविषये ऐतिहासिकपद्धत्या विमर्शे क्रियमाणे एवं भवति—प्रथमं जनतन्त्रमेवासीत् । जनाः संभूय राज्यतन्त्रं स्वयमेव निर्वहन्त आसन् । कार्यनिर्वाहार्थं कञ्चनैकं पुरुषं

नियोजितवन्तः । स कालक्रमेण राजाभूत् । किञ्चित्कालपर्यन्तं राज्ञां जनतन्त्रस्थानानां च सहैव स्थितिरासीत् । तदनन्तरं बलवता राजतत्त्वेन जनतन्त्रस्थानानि भक्षितानि— इति । तदा कस्मिंश्चित्काले राजाढ्यं स्थानं स्वतन्त्रं स्थानं कुत्रचिदासीत् । कुत्रचिच्छुद्धमेव जनतन्त्रत्वं विनापि राजतत्त्वमासीत् । गच्छता च कालेनोभयोः सहस्थितिः परस्परमेळनं परस्परापेक्षा चासीत् । पश्चात् परं उभयोर्वियोगः समजनि । अधुना हि राजतत्त्वं सर्वथोत्सन्नम् । जनतन्त्रमेवावशिष्टं दृश्यते । धर्मसूत्रस्मृतीतिहासपुराणकाले जनतन्त्रस्थानानि नष्टान्यभूवन् । परं तु ते जनतन्त्रतत्त्वं न नाशितवन्तः । विनापि स्थानानि तादृशतत्त्वस्यादरः कृतः । वेदकाले राजतत्त्वं जनतन्त्रं चोभयं सहैवास्ताम् । तत्र श्रूयमाणराजतत्त्वं स्मृतिषु स्मर्यमाणराजतत्त्वापेक्षया सर्वथा विलक्षणमेव । वेदेषु श्रूयमाणराजतत्त्वस्य प्रजाप्रधानजनतन्त्रमूलकत्वमस्तीति निरूपणायैतः प्रयत्नः क्रियते ॥

॥ राजतत्त्वमपि जनतन्त्रतत्त्वे प्रतिष्ठितम् ॥

वैदिकराज्यतन्त्रे जनतन्त्रतत्त्वस्य प्राधान्यं यथा वर्तते तथा निरूपितमधस्तात् । जनतन्त्रतत्त्वानुसारीणि सभासमितिविदथाख्यादिस्थानानि च निरूपितानि । एवमेव राजाख्यं स्थानमपि जनतन्त्रतत्त्वे प्रतिष्ठितमिति सुस्पष्टं प्रतीयते । इदमेव च वेदोक्तराजस्थानस्य वैशिष्ट्यं यत् राजापि जनैरेव वृतः । यावज्जनानामादरो वर्तते तावद्राजा भवति । यावच्च जना राज्ञि अप्रियवन्तो भवन्ति तावत् राजा स्वराज्याद्भ्रष्टो भवति । राज्ञः सभासमित्याऽयत्तस्थितिः स्पष्टमेव प्रतिपादिता । "नास्मै समितिः कल्पते" इति । तथा सभासमितिभ्यां सहैव वेदकाले राजाख्यं स्थानमभूत् । राज्ञः प्रजासु न निरङ्कुशं स्वातन्त्र्यं वर्तते । "ध्रुवाय ते समितिः कल्पताम्" इति अन्यत्रापि श्रूयते । अतोऽन्वयव्यतिरेकाभ्यां राज्ञः सभासमित्यायत्तत्वं निश्चीयते । सभासमितिस्थानमपि जनतन्त्रस्थानमेव सभासमित्यादिषु जनानां प्रतिनिधयः, अथ वा साक्षाज्जना वा सङ्गत्य स्वाभिप्रायमाविष्कृतवन्तः । सर्वथा राज्ञः स्थितिः जनायत्ता । इदं च स्पष्टं राजसूयकर्मणि विनियुक्तेन मन्त्रेण । अत्र हि प्रजाभ्यो राज्ञा आवेदनकालेऽयं मन्त्रः पठितव्यो भवति । मन्त्रश्चैवम्—"महते क्षत्राय, महत आधिपत्याय महते जानराज्याय, एष वो भरता राजा सोमोऽस्माकं ब्राह्मणानाꣳराजा" इति । अयं च मन्त्रः (तै. सं. 1-8-10) (मै. सं. 2-6-6) यजुःसंहितासु पठितः । अस्मिन् मन्त्रे राज्ञो विशेषणत्रयं दत्तम्—क्षत्राय, आधिपत्याय, जानराज्यायेति । मन्त्रे श्रूयमाणो जानराज्यायेति भागः शतपथब्राह्मणे एवं व्याख्यातः-महते जनानां राज्यायेति वा वैतदह इति (शथ. ब्रा.5) अनेन ज्ञायते राजापि जनराजेति । परं तु गोपालमहाशयः जनराजशब्दस्य जनतन्त्रतत्त्वपरत्वं नाङ्गीकरोति । जनराजशब्देन तत्तज्जातीयानां जनानां राजा इत्ययमेवांशः प्रकटीकृत इति वदति । परं तु न वयं तदङ्गीकुर्मः । अत्र श्रूयमाणः जनराजशब्दः जनतन्त्रतत्त्वस्य प्रतिपादक एव । यद्यपि राजाख्यं स्थानम् अन्यदेशेषु निरङ्कुशस्वातन्त्र्यवदेव दृश्यते । राजा च यथेष्टं कर्तुं प्रभुः । सभासमित्यादिभिर्वा साक्षाज्जनैर्वा नायं निरोद्धुं शक्यः । निरपवादं स्वामित्वं स्वविषये राज्ञस्तत्र दृश्यते । राजाख्यस्थानेन सह सभासमित्याख्यस्थानानां सहस्थितिः सर्वथा असंभाविता । परं तु वैदिकराज्यतन्त्रे ऋग्वेदकालादारभ्यैव सभासमितिभ्यां सहैव राज्ञः स्थितिदर्शनात्, जनतन्त्रस्थानानां राजस्थानस्य न विरोधः शक्यशङ्क इति प्रतिभाति । राजा यदि वा जनैर्वृतः, अथ वा पारम्पर्यक्रमेण राज्यं प्राप्तः, राजकुलप्रतिनिधित्वेन वा राज्यं

प्राप्तः, सर्वथा तस्य स्थितिः जनायत्तेत्यत्र न संशयलेशोऽपि । अतो वैदिकराज्यतन्त्रे राजाख्यं स्थानमपि जनतन्त्रतत्त्वे प्रतिष्ठितमिति अकामेनाप्यङ्गीकार्यमेव । एतदेवात्र निरूप्यते ॥

यजुर्वेदकाले ब्राह्मणकाले च राजाख्यं स्थानं महदौन्नत्यं प्राप्तमिति ज्ञायते । अथापि अत्रापि राज्ञः स्थितिः जनायत्तेति राज्यतन्त्रतत्त्वमूलभूतोंऽशः न परित्यक्तः । महता श्रमेण जनतन्त्रतत्त्वमत्रापि सम्यग्रक्षितं दृश्यते । यावज्जनानामभिप्रायानुकूल्यं वर्तते तावद्राजा भवति । यदा वा प्रजानामभिप्रायः प्रतिकूलतया परिणमति तदा स प्रजाभिर्निरस्तो भवति । तस्य च "अपरुद्धः," "निरुद्धः" इति वा नाम दृश्यते । तादृशस्य च राज्ञः पुना राज्ये स्थापनं प्रजाभिप्रायानुकूल्यसंपादनमन्तरेण न भवति । निरुद्धस्य राज्ञः पुनःस्थापनार्थमनेके यागा यजुर्ब्राह्मणेषु विहिताः । ऋग्वेदब्राह्मणेषु शस्त्रविशेषः प्रतिपादितः । सामब्राह्मणेषु स्तोत्रविशेषश्च विहितः ॥

अपरुद्धानां राज्ञां नामापि तत्र तत्र श्रुतम् । दुष्टरीतुर्नाम कश्चन राजा आसीत् । स च दशपुरुषपरम्परागतराज्यादपि भ्रंशितः । सौत्रामणीयागेन पुनः प्रतिष्ठापित इति शतपथब्राह्मणे (12-9-3) प्रतिपादितम् । तत्र हि एवं दृश्यते—"दुष्टरीतुर्ह पौंसायनः दशपुरुषं राज्यादपरुद्ध आस रेवोत्तरसमु ह पाटवश्चाक्रं स्थपतिं सृञ्जया अपरुरुधुः । स होवाच । दुष्टरीतुं पौंसायनं सौत्रामण्या त्वा याजयानि । यदिदं सृञ्जयेषु राष्ट्रं त्वयि धास्यामीति तथेति तयैनमथाजयत्" । "तदुह बाल्हिकः प्रतिपीय शुश्रात्र कौरव्यो राजा । यो ह वा अयं दुष्टरीतुं पौंसायनः दशपुरुषं राज्यादपरुद्धोऽभूत् तमयं चाक्रस्थपतिं सौत्रामण्या याजयिष्यति यदिदं सृञ्जयेषु राष्ट्रं तत् हस्मिन् धास्यति" इति । अत्र दुष्टरीतुर्नाम्नोऽपरुद्धस्य राज्ञः पुनःस्थापनं प्रतिपादितम् । तथा जैमिनीयब्राह्मणे सिन्धुक्षिन्नाम राजा अपरुद्धः प्रतिपादितः । तस्य पुनःस्थापनार्थं सामविशेषश्चादृत इति तत्रैवोक्तम् । एवं ह्ययं ब्राह्मणभागः "सिन्धुक्षिद्वै भारतो राजा ज्योगपरुश्चचार । सोऽकामयत । अवस्व ओकसी गच्छेयमिति । यद्यु वै सिन्धुक्षित् भारतो राजा अपश्यत् । तस्मात् सन्धुक्षितम्" इति । अस्मिन्नेव ब्राह्मणे (1-214) वीतहव्यनाम्नः अपरुद्धस्य राज्ञ इतिहासः प्रतिपादितः । एवं ह्यत्र पठ्यते 'वीतहव्य आश्रायसः ज्योगपरुद्धश्चरन् सोऽकामयत । अवस्व ओकसी गच्छेयमिति । स एतत् साम पश्यत् । तेनास्तुवेत । सः ओकाय इत्येव निधनमुपैत् । ततो वै सः अवस्व ओकसी अगच्छत्" इति । एतादृशेतिहासदर्शनेनापरुद्धा राजानो बहव आसन्निति अभ्यूह्यते । अथर्ववेदे तृतीये काण्डे तृतीयचतुर्थसूक्तयो राज्ञो राज्याद्भ्रष्टस्य पुनःस्थापनार्थं प्रार्थना विहिता दृश्यते । अत्र प्रथमसूक्ते राज्ञ अपरुद्धस्याह्वानं समनन्तरसूक्ते संवरणं च प्रजाभिः कर्तव्यं प्रतिपाद्यते । इमे सूक्ते अत्र लिखामः—

अचिक्रदत्स्वपा इह भुवदग्ने व्यचस्व रोदसी उरूची ।
युञ्जन्तु त्वा मरुतो विश्ववेदस आमुं नय नमसा रात हव्यम् ॥ १ ॥

दूरे चित्सन्तमरुषास इन्द्रमा च्यावयन्तु सख्याय विप्रम् ।
यद्गायत्रीं बृहतीमर्कमस्मै सौत्रामण्या दधृषन्त देवाः ॥ २ ॥

अद्भ्यस्त्वा राजा वरुणो ह्वयतु सोमस्त्वा ह्वयतु पर्वतेभ्यः ।
इन्द्रस्त्वा ह्वयतु विड्भ्य आभ्यः श्येनो भूत्वा विश आ पतेमाः ॥ ३ ॥

श्येनो हव्यं नयत्वा परस्मादन्यक्षेत्रे अपरुद्धं चरन्तम् ।
अश्विना पन्थां कृणुतां सुगं त इमं सजाता अभिसंविशध्वम् ॥ ४ ॥

ह्वयन्तु त्वा प्रतिजना प्रतिमित्रा अवृषत ।
इन्द्राग्नी विश्वे देवास्ते विशि क्षेममदीधरन् ॥ ५ ॥

यस्ते हवं विवदत्सजातो यश्च निष्ट्यः ।
अपाञ्चमिन्द्र तं कृत्वाथेममिहा व गमय ॥ ६ ॥

अत्र प्रथमे मन्त्रे "युञ्जन्तु त्वा मरुतः विश्ववेदसः" इति राज्ञो राज्ये पुनर्योगः प्रार्थितः । 'अमुमानय यमसः' इत्यपि प्रतिपाद्यते । द्वितीये मन्त्रे सौत्रामणीयागः प्रस्तुतः । राजा दूरे वर्तते । तस्यागमनं प्रार्थ्यते । प्रजाभिः सह सख्यं च सूच्यते । तृतीये मन्त्रे चायमर्थः प्रतिपाद्यते—राज्याद्भ्रष्टो राजा निलीनः कुत्र वा चरतीति प्रजाभिर्न ज्ञायते । अप्सु वा पर्वतेषु वा अथ वा जनानामेव मध्ये तिरोहितो वा चरतीति न ज्ञायते । अतः सर्वेभ्यः पूर्वोक्तेभ्यः स्थानेभ्यः आह्वानं कर्तुं वरुण सोम-इन्द्राः प्रार्थ्यन्ते । 'श्येनो भूत्वा इमा विशः आपत' इत्ययमंशः त्वराविशेषे दृष्टान्ततया वर्तते । चतुर्थे मन्त्रे चैवमुच्यते—अपरुद्धो राजान्यक्षेत्रे वर्तते । तस्य च सुगमो मार्गः पुनरागमनार्थं कर्तव्य इति । अत्र 'इमं सजाता अभिसंविशध्वम्' इति राज्ञः परितः सजातानां च संवेशः प्रार्थितः । एतादृशसजातानामानुकूल्येनैव राजा राज्यं करोति । सजातानां च राज्यतन्त्ररीत्या मुख्यत्वमस्तीति अस्मिन् मन्त्रे षष्ठे च सूच्यते । इह पुनः सजाता अभिसंविशध्वम्' इति अन्वयमुखेन, सजातसम्बन्धो राज्ञ उच्यते । षष्ठे मन्त्रे च विवदमानानां सजातानामधरीकरणं च प्रार्थ्यते । अतो राज्ञः सजातानां सम्बन्धो यजुःसंहितासु ब्राह्मणेषु च प्रसिद्धः । अयं च अथर्ववेदकाल एव प्रारब्ध इति गम्यते । पञ्चमे मन्त्रे राज्ञः प्रतिकूलतया ये जना आसन् तथा ये अमित्राणि आसन् तेऽप्याह्वयन्तु इति सूच्यते । 'विशि क्षेममदीधरन्' इत्ययं मन्त्रभागोऽवधानार्हः; यतो विशां क्षेमाभावेनैव राजा राज्याद्भ्रंशित इति सूच्यते । षष्ठे च मन्त्रे ये ये राज्ञ आह्वाने विवदन्ते सजाता वा असजाता वा तेषामधरीकरणं प्रार्थ्यते । समनन्तरसूक्तं चैवं पठ्यते—

"आ त्वा गन्राष्ट्रं सह वर्चसो दिहि प्राङ् विशां पतिरेकराट् त्वं विराज ।
सर्वास्त्वा राजन् प्रदिशो ह्वयन्तूपसद्यो नमस्यो भवेह ॥ १ ॥
त्वां विशो वृणतां राज्याय त्वामिमाः प्रदिशः पञ्च देवीः ।
वर्ष्मन्राष्ट्रस्य ककुदिश्रयस्व ततो न उग्रो विभजा वसूनि ॥ २ ॥

अच्छ त्वा यन्तु हविनः सजाता अग्निर्दूतो अजिरः संचरातै ।
जायाः पुत्राः सुमनसो भवन्तु बहुं बलिं प्रतिपश्यासा उग्रः ॥ ३ ॥

अश्विना त्वाग्रे मित्रावरुणो भा विश्वे देवा मरुतस्त्वा ह्वयन्तु ।
अधा मनो वसु देयाय कृणुष्व ततो न उग्रो विभजा वसूनि ॥ ४ ॥

आ प्रद्रव परमस्याः परावतः शिवे ते द्यावापृथिवी उभे स्ताम् ।
तदयं राजा वरुणस्तथाह स त्वाय मह्वत्स उपेद मे हि ॥ ५ ॥

इन्द्रेन्द्र मनुष्या३ः परे हि संह्यज्ञास्था वरुणैः संविदानः ।
स त्वाय मह्वयत्स्वे सधस्थे स देवान् यक्षत्स उकल्पयाद्विशः ॥ ६ ॥

पथ्या रेवतीर्बहुधा विरूपाः सर्वाः संगत्य वरीयस्ते अक्रन् ।
तास्त्वा सर्वाः संविदाना ह्वयन्तु दशमीमुग्रः सुमना वशेह ॥ ७ ॥

प्रथमे मन्त्रे राष्ट्रं तवागतम् । वर्चसा उदेहि । विशां पतिस्सन् त्वमेकराड् विराज । सर्वा अपि दिशः त्वामाह्वयन्तु । त्वमुपसद्यो भव; नमस्यश्च भव इत्युच्यते । द्वितीये सर्वा अपि प्रजाः त्वां वृणन्तु । राज्यस्य ककुदि वर्तमान अस्माकं वसूनि विभज इत्युच्यते । तृतीये मन्त्रे सजाता अपि त्वामाह्वयन्तु । भवदागमनेन जायाः पुत्रा अपि सुमनसो भवन्तु । भवद्भ्यो बहुं बलिं दद्युः । तं च पश्येत्युच्यते । चतुर्थे मन्त्रे सर्वाभिर्देवताभिराहूतो वसु विभजस्वेति प्रतिपाद्यते । पञ्चमो मन्त्रः अत्यन्तमवधानार्हः । यतोऽयमेव मैत्रायणीसंहितायां (2-2-11) निरुद्धस्य राज्ञः विहितायामष्टौ याज्यापुरोनुवाक्यात्वेन विनियुक्तः । अस्मिन् मन्त्रे च सुदूरे वर्तमानस्य राज्ञ आद्रवणं प्रार्थ्यते। कालश्चानुकूल इति सूच्यते। षष्ठे मन्त्रे सर्वैरपि देवैः संविदान इन्द्र आह्वयतु । स च त्वत्प्रजाः त्वदनुकूलतया कल्पयत इत्युच्यते । सप्तमे सर्वा अपि देवताः संगत्य युष्मद्विषये क्षेममेव कुर्वन्ति । सर्वेऽपि भवद्विषये ऐकमत्यं प्राप्ताः । वश्यश्च भवेत्युच्ते ॥

इतः परं यजुःसंहितासु अपरुद्धस्य राज्ञो विहितानां यागानां स्वरूपं तत्सम्बन्धि-ब्राह्मणभागं च प्रथमं विमृशामः ॥

तैत्तरीयकाठकमैत्रायणीयशाखासु श्रूयमाणं कर्म समालोचनार्हं भवति । तैत्तिरीय-संहितारीत्या यागस्वरूपमेवं भवति । "आदित्येभ्यो धारयद्वद्भ्यश्चरुं निपेत् अपरुद्धो वा

अपरुध्यमानो वा आदित्या वा अपरोद्धार आदित्या अवगमयितार आदित्यानेव धारयद्व्रतः स्वेन भागधेयेनोपधावति त एवैनं विशि दाध्रात्यनपरुद्ध्यो भवति । अदितेऽनुमन्यस्वे त्यपरुध्यमानोस्य पदमादधीत । इयं वा अदितिः । इयमेवास्मै राज्यमनुमन्यते । सत्याशीरित्याह सत्यामेवाशिषं कुरुते । इह मन इत्याह । प्रजा एवास्मै समनसः करोति उपप्रेतमरुतः सुदानव एना विश्पतिना अभ्यमुं राजानमित्याह । मारुती वै विट् ज्येष्ठो विश्पतिर्विशैवैनं राष्ट्रेणसमर्द्धयति यः परस्तात् ग्राम्यवादी स्यात् तस्य गृहात् व्रीहीनाहरेत् शुक्लाँश्च कृष्णाँश्च विचिनुयात् ये शुक्लाः स्युः तमादित्यं चरुं निर्वपेत् आदित्या वै देवतया विट् विशमेवावगच्छति अवगतास्य विट् अनवगतं राष्ट्रमित्याहुः । ये कृष्णाः स्युः तं वारुणं चरुं निर्वपेत् उभे एव विशं च राष्ट्रं चावगच्छति यदि नावगच्छेत् इममहमादित्येभ्यो भागं निर्वपामि । आमुष्मादमुष्मै विशोपऽ-वगन्तोरिति निर्वपेत् । आदित्या एवैनं भागधेयं प्रेत्सन्तो विशमवगमयन्ति यदि नाम गच्छेत् आश्वत्थान् मयूखान् सप्त मध्यमेषायामुपहन्यात् । इदमहमादित्यान् बध्नामि । आमुष्मादामुष्मै विशोऽवगन्तोरिति । आदित्या एवैनं बद्धवीरा विशमवगमयन्ति यदि नाम गच्छेत् । एतमेवादित्यं चरुं निर्वपेत इध्मेऽपि मयूखान् सन्नह्येत् अनपध्यमेवावगच्छत्याश्वत्था भवन्ति मरुतां वा एतदोजः यदश्वत्थः ओजसैव विशमवगच्छति सप्त भवन्ति सप्त गणा वै मरुतः गणश एव विशमवगच्छति (2-3-1) इति ॥

अस्मिन् ब्राह्मणभागे बहवोंऽशाः समालोचनार्हा वर्तन्ते । यस्य राज्ञो जना अनवगता वर्तन्ते, जनैश्च राजा उद्वासितः तस्येयं इष्टिर्विहिता । अनया इष्टया जना अवगता भवन्ति । राजा च अनवरुध्यो भवति इत्युच्यते । अत्र कश्चन मन्त्रो व्याख्यातः । मन्त्रानुपूर्वी तु एवं दृश्यते—'अदितेऽनुमन्यस्व सत्याशीरिह मनः । उपप्रेत मरुतः सुदानव एना विश्पतिना अभ्यमुं राजानम्' इति । अस्य मन्त्रस्य व्याख्याने एतदुच्यते । प्रजा एवास्मै समनसः करोति । विशा एवैनं राष्ट्रेण समृध्यतीति । अत्र प्रतिपाद्यमानो विभागः समालोचनार्ह एव । अत्र हि पाल्यमानाः प्रजा विट्शब्देनोच्यन्ते । पालकस्य राज्यं राष्ट्रशब्देनोच्यते । एतद्यागीयद्रव्यसम्पादनार्थं ग्राम्यवादिनो गृहं प्रति आगमनमुच्यते । तत्र सम्पादितव्रीहिद्रव्ये शुक्लवर्णव्रीहिभिरादित्याय चरुर्विहितः; यत आदित्यो विशो अवगमयिता । अत एव विशामवगमार्थम् आदित्यचरुर्भवति । कृष्णव्रीहिभिर्वारुणश्चरुर्विहितः । स च राष्ट्रावगमार्थः । विशामवगमवत् राष्ट्रस्यावगमोऽप्यावश्यकः । यदि च विशो नावगच्छेयुः तदा प्रयोगान्तरं च विहितम् । अश्वत्थान् सप्त मयूखान् रथस्य मध्यम ईशायामुपहन्यादिति । अत्रापि मन्त्रविशेषः श्रूयते—'इदमहमादित्यान् बध्नामि' इति । अत्रादित्या बद्धवीराः सन्तो विशमवगमयन्ति । एवमपि यदि विशो नावगच्छेयुः पुनरादित्येभ्यश्चरुं निर्वपेत् इति विहितम् । तस्मिन् यागे इध्मे पूर्वं मध्यम ईषयामुपहतान् सप्त मयूखान् सन्नह्येत् इत्युच्यते । अनेन विशो

बलात्कारेणावगता भवन्ति । सप्तसंख्याकानां मयूखानां इध्मे सन्नहनेन गणशो विभक्ता जना राज्ञेऽवगच्छन्ति । इयम् इष्टिः सर्वथा राज्ञैव कर्तव्या । अत्र च प्रजानामवगमने अथ वाऽनुकूलत्वेन परिवर्तने यादृशः श्रमो वर्तत इति प्रतिपादनार्थं अपरुद्धस्य राज्ञः प्रजाः प्रतिकूलाः । तत्र तस्य च द्वयमपेक्षितम् । एकं विशः, अपरं राष्ट्रम् । विशामवगमेऽपि यदि राष्ट्रमनवगतं स्यात् तर्हि राज्ञो न किमपि भवेत् । अत्र राष्ट्रशब्देन राज्ञो वर्तमानोऽधिकारः सूच्यते । अधिकाराभावे जनानामवगमनेऽपि न किमपि प्रयोजनं भवेत् । अतश्च राष्ट्रावगमनमावश्यकं भवति । विशैवैनं राष्ट्रेण संध्ययति इति ह्युच्यते । अत्र च ग्राम्यवादिनो गृहाद्व्रीहीणामाहरणं विहितम् । तत्र शुक्लानां कृष्णानां व्रीहीणां पृथक्करणं विहितम् । शुक्लव्रीहिभ्य आदित्येभ्यश्चरुर्विहिता । कृष्णव्रीहिभ्य वरुणाय चरुर्विहितः । विशामवगमार्थमादित्यचरुर्विहितः । राष्ट्रावगमार्थं वारुणश्चरुः । अत्र ग्राम्यवादिद्वारा विशां राष्ट्रं चावगतो भवतीत्युच्यते । यदि नाम गच्छेदिति वारत्रयपाठान्महता प्रयासेनापि प्रजानामवगमः सम्पादनीय इति सूच्यते । राज्ञः पारस्थितिः प्रजायत्ता इति सूचयितुं महदिदं कर्म विहितम् । अवरुध्यमानस्य पदग्रहणार्थं विहितो मन्त्रोऽपि समालोचनार्हः । अत्र हि भूम्या अनुमतिमन्त्रेण न राज्ञो राज्यं भवतीति सूच्यते । अदितेऽनुमन्यस्व । इयमेवास्मै राज्यमनुमन्यत इति । तथा प्रजानां राज्ञा सह समनस्त्वप्रार्थनाऽपि वर्तते । इह मनः प्रजा एवास्मै समनसः करोतीति । अतश्चेयमिष्टिः राज्यतन्त्ररीत्या मुख्यत्ववती । इयमेवेष्टिः काठकसंहितायामपि (11-6) विहिता । तत्रैवं पठ्यते–आदित्येभ्यो धारयद्वद्भ्यः चरुं निर्वपेत् अपरुद्धो वा अपरुध्यमानो वा । आदित्या वै त्रातार आदित्या अवरोद्धारः तानेव भागधेयेनोपधावति । त एवैनं दाधति । आदित्येभ्यो भुवत् वद्भ्यः चरुं निर्वपेत् बुभूषन् इति विधाय आदित्योत्पत्तिविषयकाख्यायिका प्रतिपादिता । तत्रैवं पठ्यते-आदित्या इमाः प्रजाः स्वस्वायनाधिपत्याय सद्वद्यतमः स्वानेव भागधेयेनोपधावति भूत्यै इति । तदनन्तरं श्रूयमाणो ब्राह्मणभागः समालोचनर्हं इति । स लिख्यते—'आदित्या भागं वः करिष्यामीति निर्वपन् । ब्रूयादिमहममुमामुष्याणममुष्याः पुत्रममुष्यां विश्यवगमयतेति भागधेयवेभ्यः कुर्वन् प्राह तमादित्येभ्यश्चरुं निर्वपेदादित्या वै देवविशा देवविशा मनुष्यविशाया ईशे देवविशैवैनं मनुष्यविशामवगमयति । सप्ताश्वत्थ्या मयूखा भवन्ति तानिध्मेपि प्रोक्षति । त आसँस्थातोर्वेद्याँ शेरते । तान् संस्थिते मध्यमेषायामुपहन्तीदमहमादित्यान् बध्नाम्यमुष्यामुष्यायणस्यावगमायेति । यद्या सप्तमादहो नावगच्छेदिध्मं तान् कृत्वा परया यजेतैवं तृतीयया त्रिर्वा आदित्यास्सप्त सप्त यावन्त एवादित्यास्तान् बध्नाति त एनं बद्धा मोक्षमाणा अवगमयन्ति । विशो वै वीर्यमुपाक्रामत् । तदश्वत्थं प्राविशत् । तस्मादेषोऽधृनस्सर्वाहापर्णमेजयँस्तिष्ठति । यदाश्वत्था भवन्ति विश एवास्मिन् वीर्यं बध्नाति । सत्याशीरिह मन इति निरुद्धस्य पदमादधीता समनस

एवैनान् करोत्युपप्रेतमरुतस्स्वतवस एनविश्पतिनाभ्यमुं राजानमिति विशोऽभिवातमभिध्वँसयन् परीमादभिमनस एवैनान् करोति । यः परस्ताद्ग्राम्यवादि स्यात् तस्य गृहाद्व्रीहीनाहरेयुस्ताञ्छुक्लाँश्च कृष्णाँश्च विचिनुयुर्ये शुक्लास्तमादित्येभ्यश्चरुं निर्वपेद्ये कृष्णानि तान् दध्युरादित्या वै देवविशा देवविशा मनुष्यविशाया ईशे देवविशैवैनं मनुष्यविशामवगमयत्येतद्विशमवागन्नित्याहुरथ क क्षत्रामिति । यदा वै क्षत्रमवगच्छत्यथावगच्छति यदाव गच्छेद्ये कृष्णास्तं वारुणं चरुं निर्वपेत् । क्षत्रं वै वरुणो वरुण एवैनं क्षत्रगमयत्युभे विशा अवगच्छति देवविशां च मनुष्यविशां च । यच्छुक्लास्तानादित्येभ्यो निर्वपति । तस्माच्छुक्ल इव वैश्यो जायते । यत्कृष्णं वारुणं तस्माद्धूम्र इव राजन्यः । अत्रादित्या देवविश आदित्यचरुकरणेन देवा विशा एवैनं मनुष्या विश अवगमयति - इत्युच्यते । आश्वत्थान् मयूखान् इध्मप्रोक्षणकाले प्रोक्ष्य आसँस्थातो वेद्यां निदधाति । संस्थिते यज्ञे शकटस्य मध्यमेषायां मन्त्रेण बन्धनं विहितम् । 'इदमहमादित्यान् बध्नामि' इति । अत्र बलात्कारेण जनानामवगमनं सूच्यते । आसप्तमादह्नः जनानामवगमनं प्रतीक्षते । यदि च सप्तमे दिनेऽवगमनं न भवेत् तान् सप्त मयूखान् इध्मे सन्नह्य पुनरिष्टिः कार्येति विधीयते । तत्रापि सप्तभिर्मयूखैः सप्तदिनप्रतीक्षा कार्या । तत्रापि यदा जना नावगच्छेयुः पुनः पूर्ववत् इष्टिः कार्या । एवं त्रिवारमिष्टिकरणेनैकादशं आदित्या बद्धा मोक्ष्यमाणाश्च विशमवगमयन्तीति उच्यते । त्रिवारमिष्टिकरणं सप्तमयूखानां बन्धनं चात्र विशेषः । अश्वत्थार्थवादश्चास्यामेव संहितायां दृश्यते । अश्वत्थवृक्षादरेण विशां वीर्यं अपरुद्धे राज्ञि बद्ध इति सूच्यते । सत्याशीरिह मनः इति मन्त्रविवरणकाले आमस एवैनान् करोतीति प्रजानां राज्ञश्च समन स्त्वं प्रतिपाद्यते । अनेन मन्त्रेण विशः प्रति यथा रेणवो गच्छेयुः वातेन नीताः तथा परिगवनं विधीयते । अत्राप्यभिमनस एवैनां करोति इति प्रतिपाद्यते । तथा ग्रम्यवादिगृहाच्छुक्लानां कृष्णानां व्रीहीणामाहरणमादित्येभ्यः वरुणाय च चरुनिर्वापश्च समानमत्र । राष्ट्रशब्दस्थाने क्षत्रशब्दः प्रयुक्तः । देवविशां च मनुष्यविशां चावगमनमुक्तम् । मैत्रायणीसंहितायाम् (2-2-1) एतदिष्टिविषयो ब्राह्मणभाग एवं पठ्यते—'आदित्या भागंवः करिष्याम्यमुमामुष्यायणमवगमयत इति ब्रूयाद्धविर्निर्वप्स्यन्त्स एतमादित्यं धृते चरुं निर्वपेदादित्या वा इमाप्रजास्ता एवोपासरत् । ता एनमवगमयन्ति सप्ताश्वत्था मयूखा अन्तर्वेदि शयीरंस्तान् त्सँस्थिते रथवाहनस्य मध्यमेषायामतिहन्यात् । इदमहमादित्यान् बध्नाम्यामुष्यावगमः । इत्यादित्यान् वेतद्बध्नाति त एनं मोक्षमाणा अवगमयन्ति विशो वीर्यमपाक्रामत् । तदश्वत्थं प्राविशत् स तेन वीर्येण भर्मराभवत् । तद्विश एवैतेन वीर्यमवरुन्धे । यदि सप्तसु नावगच्छेदिध्मे तानपि कृत्वैतदेव हविर्निर्वपेदादित्या वा इमाः प्रजास्ता एवोपासरत् । ता एनमवगमयन्ति । यद्येवं सप्तसु त्रिर्वै सप्तसप्तादित्यास्तानेवोपासरत् ता एनमवगम

यन्ति । यद्येकतमीषु वाव गच्छेदपरो धुका एनंस्युरथ यत्सर्वा स्ववगच्छति तथाहनपरोध्योऽवगच्छति स यदावगच्छेद्दथादित्येभ्यो धारयद्भ्यो घृते चरुं निर्वपेदादित्या वा अपरोद्धार आदित्या अवगमयितारस्त एनं दाध्रति । अदितेऽनुमन्यस्व सत्याशीरिह मनः इति निरुद्धस्य राज्ञः पदमादधीत । तत् यः पुरस्तात् ग्राम्यवादि नस्स्यात् तस्य सभायाः अभिवातं परीय विध्वंसयेयुः । प्रेतमरुतः स्वतवसः ऐन विश्पत्या अमुं राजानमभि इति । तस्य गृहात् व्रीहीनाहरेयुः । तान् त्रेधा विचिनुयात् । ये कृष्णाः तान् कृष्णाजिने उपनह्य विदध्यात् । ये शुक्लाः तमादित्यं घृते चरुं निर्वपेत् त एनमवगमयन्ति । अथ एभ्योऽधिविचिनुयात् तान् उदङ्परेत्य वल्मीकवपां उद्धृत्य जुहुयात् । यद्वतेघोर आसन् जुहोमि एषां बन्धानां प्रमोचनाय यान्त्वाजनः भूमिरिति प्रमंदते निर्ऋतिस्त्वाहं परिवेद विश्वतः । इति निर्ऋतिगृहीतो वा एषः यो निरुद्धः निर्ऋत्या एवैनं तेन मुञ्चति एतत् वै विशं अवागमन् । अथ वास्य राज्यमनवगतं तत् एमि कृष्णाः व्रीहयः तं वारुणं घृते चरुं निर्वपेत् । वरुणो वै देवानांराजा । स राज्यस्यावगमयिता तमेव भागधेयेनोपासदत् स एनं राज्यमवगमयत् एतद्वै नाना विश्यं उभयमेव तेन विशमवगच्छति देवीश्च मानुषीश्च" । इति अत्र दृश्यमानं निरूपणं काठकसंहितानुसारीव दृश्यते । अपरुद्धविषयत्वे तिसृष्वपि संहितासु समानमेव कर्म । आदित्यदेवताकया इष्टया विशामवगमनं भवतीति अत्राभ्युच्यते । "आदित्या वा इमाः प्रजाः । ता एवोपासरत् । ता एनमवगमयन्ति" इत्युच्यते । सप्त अश्वत्थानां मयूखानां बन्धनं मोक्षणं च प्रजानामवगमार्थमित्युक्तं कठकसंहितावदेव त्रिवारमत्र यागानुष्ठानम् । यदा प्रजा अवगच्छेयुः तदा आदित्येभ्यो धारयद्भ्यः इष्टिर्विहिता । अत्र निरुद्धस्य राज्ञः पदाधानम् अन्यसंहितावदेव । परं तु ग्राम्यवादिनः सभाया अत्र प्रस्तावोऽस्ति । सभाया अभिवातं परीत्य विध्वंसयेयुरिति । ग्राम्यवादिनो गृहात् आहृतानां व्रीहीणां त्रेधा विभागोऽत्र विशेषः । एकस्य भागस्य मन्त्रेण वल्मीकवपायां होमः तत्र श्रूयमाणो मन्त्रो नान्ययोः संहितयोर्विद्यते । निरुद्धस्य राज्ञः पापसम्बन्धात् निर्ऋतिगृहीतत्वमनेन मन्त्रेण (होमेन) निर्ऋतेः पाशादस्य विमोको भवति । "निर्ऋतिगृहीतो वा एषः यो निरुद्धः" इति श्रूयमाणं वाक्यं समालोचनार्हमेव । अनया इष्टया विशामवगमनं भवतीत्युच्यते । विशामवगमनेऽपि असंपूर्णत्वात् राज्यस्यावगमार्थं वारुणचरुरपि विहितः । अत्र तैत्तरीयसंहितायां राष्ट्रशब्दः प्रयुक्तः । काठकसंहितायां क्षत्रशब्दः प्रयुक्तः । मैत्रायणीसंहितायां राज्यशब्दः प्रयुक्तः । एतत्त्रितयमपि राज्यतन्त्रतत्त्वसम्बन्ध्येव । यथा प्रजानामवगम आवश्यकः पालनार्थं तथा पालकतत्त्वस्यापि अवगम आवश्यक इति अत्र सूच्यते एतासु संहितासु । तथान्यत्र ब्राह्मणभागेषु निरुद्धस्य वा अपरुद्धस्य वा यानि यानि कर्माणि विहितानि तानि प्रदर्शयामः । "ऐन्द्रमेकादशकपालं

निर्वपेत् । निरुद्धं याजयेत् । आ प्रेहि परमस्याः परावतः'' इति याज्यानुवाक्ये स्याताम् । "परावतं वा एष गतः यो निरुद्धः परावत एव एनं आध्यात्वा अवगमयति" (मै. सं. 2-2-11) ॥ अत्र श्रूयमाणे याज्यानुवाक्ये अथर्ववेद एव पठिते। तत्र हि तृतीये काण्डे तृतीयतुरीयसूक्ते राज्ञः पुनराह्वानार्थं विनियुक्ते। तयोः सूक्तयो पठ्यमानौ मन्त्रौ अत्र याज्यानुवाक्यत्वेन विहितौ । ऐन्द्रं त्रयोदशकपालकं निर्वपेत् । निरुद्धं याजयेत् । अतिरिक्तं वै त्रयोदशं अतिरिक्तो निरुद्धः अतिरिक्तादेवैनम् आतिरिक्तमा त्वा अवगमयति" (मै. सं. 2-2-11) इति अत्र यो राज्यं त्यक्त्वान्यत्र गतः स अतिरिक्त इत्युच्यते । "इन्द्राय अर्काश्वमेधवते एकादशकपालं निर्वपेत् निरुद्धं याजयेत् । अन्तं वा एष गतः । यो निरुद्धः । अन्तो अर्कः । अन्तोऽश्वमेधः अन्तेनैवास्मान् अन्ते कल्पयति वशादक्षिणा वशं मानयत्" । (मै.सं. 2-2 9) इति अत्र निरुद्धो राजा स्वजनेभ्यो बहुदूरं गतोऽन्तं गत इत्युच्यते । "द्यावापृथिवीभ्यां धेनुं पर्यारिणीमालभेत यो राजन्योऽभ्यवरुद्धो विशः चरेत् । द्यावापृथिवीभ्यां हि वा एष निर्भक्तः । अथैषो अभ्यर्द्धो विशश्चरति । द्यावापृथिव्योरेवैनं विशि प्रतिष्ठापयतः । पर्यारिणी भवति । पर्यारीव ह्येतद्राष्ट्रं यदभ्यर्थो विशश्चरति । द्यावापृथिवी एवैनं विशि प्रतिष्ठाप्य । स श्वोभूते वत्सं वा यं आलभेत । वायुर्वाऽनयोर्वत्सो वायुरिमौ क्षयौ विशं च प्रदापयति" (मे.सं. 2-5 4) तैतिरीयसंहितायम् अपरुद्धविषये इष्टयो विहिताः "इन्द्राय सुत्राम्णे पुरोडाशंमेकादशकपालं निर्वपेत् । अपरुद्धो वा अपरुद्ध्यमानो वा इन्द्रमेव सुत्रामाणं स्वेन भागधेयेनोपधावति । स एवैनं त्रायते" (तै.स.का. 2-2-8-4) अत्रापरुद्धस्य राज्ञो रक्षणार्थमिष्टिर्विहिता "द्यावापृथिव्यां धेनुमालभेत ज्योगवरुद्धः । अनयोर्वा एषो प्रतिष्ठितः । अथैष ज्योगपरुद्धः द्यावापृथिवी एव स्वेन भागधेयोनोपधावति । ते एवैनं प्रतिष्ठां गमयतः । प्रत्येव तिष्ठति । पर्यारणी भवती पर्यारी वा ही एतस्य राष्ट्रं यो ज्योगपरुद्धः वायव्यं वत्समालभेत । वायुर्वा अनोर्वत्सः । इमे वा यो तस्मै लोकापशुष्काः विडपशुष्का अथैषः ज्योगपरुद्धः वायुमेव स्वेन भागधेयेन उपधावति । स एवास्मै इमाल्लोका विशं प्रदापयति—प्रास्मा इमे लोका स्नुवन्ति—भुञ्जत्येनं विडुपतिष्ठते" । अत्र प्रथमा इष्टिः अवरुद्धस्य विहिता । सा च काठकमैत्रायणीये संहितावदेव । परं तु अपरुद्धस्य राज्ञः सर्वत्राप्रतिष्ठितत्वमुच्यते 'अनयोर्हि वै एष अप्रतिष्ठितः । अथैष ज्योगपरुद्धः' इति । अनया इष्ट्या प्रतिष्ठा च भवतीति । मैत्रायणीसंहितायां द्यावापृथिव्यौ देवते एन दिशि प्रतिष्ठापयतः इत्युच्यते । अनन्तरं विहिता इष्टिर्वायुदेवताका स्वतन्त्रैव यः ज्योगपरुद्धः तद्विषये सर्वाः प्रजा अपशुष्का प्रीतिरहिता भवन्तीत्युच्यते । अनया इष्ट्या अपरुद्धाय राज्ञे इमे लोकाः प्रस्नुवन्तीत्युच्यते । एनं भुञ्जती, एनमुपतिष्ठन्ते च पञ्चविंशब्राह्मणे अपरुद्धविषये एवं वर्तते, 'राजानमपरुद्धं याजेत् विड्वायेनं अतिपवते, यो राजा अपरुद्धते' (18-4-4) । अत्र प्रजाभी राज्ञोऽधरीकरणमुक्तम् । एवमेव (18 5) अत्रापि प्रतिपाद्यते

अपरुद्धराजन्याय कुर्यात् (2-1) जैमिनीयब्राह्मणेऽपि अपरुद्धस्य प्रस्तावः । तद्विषये परिहारश्चोक्तः । 'वीतहव्य आश्रायसज्जोगपरुद्धश्चरन् । सोऽकामयत । सो ओकसीवाच्छेयमिति । स एतत् सामापश्यत् तेनाऽस्तुवत । स ओकाय इत्येव निधनमुपयत् । ततो वै सह अवसो ओकसि अगक्षत् ।' अत्र च ओको निधनं वैत हव्यमिति सामापरुद्धाय राज्ञे विहितम् । जै. ब्रा. (1-214) जैमिनीयब्राह्मणे अन्यत्र अवरुद्धराजविषये एवमुच्यते । "द्रोणकलशमत्यूहति इदमहं मां ब्रह्मवर्चसे अध्यूहामीति । यद्यस्यावरुद्धो राजन्यस्सादिमुखान्ग्राव्णः कृत्वा तूष्णीं द्रोणकलशं अध्यूह्य तमन्हारयन् दक्षिणा निरुहेत् । इदमहं अमुं विशो निरूहामीदं अस्य राष्ट्रं न्युब्जामि इति न्यञ्चं द्रोणकलशं न्युब्जेत् । संमुखान्ग्राव्णः कृत्वा योऽस्य राजन्यः स्यात् तस्य नाम गृहीत्वा द्रोणकलशमध्यूहेत् । इदमहममुं विविश्यध्यूहामि इति । अपेतरो रुद्धय तेऽवेतरो गच्छति । । स यद्येनमवगत्य नाद्रियेत तं कामयेत । अत्रैवान्तर अवरुद्धोऽस्तु' इति । 'विमुखान् ग्राव्णः कृत्वा तूष्णीं द्रोणकलशमध्यूह्य इमापांशुसवनः' इति ग्रावा । तमुपरिष्टादभिनिदध्यात्—इदमहं अमुष्मिन् विश्यध्यूहामि इति । अभिप्रक्षीणा वा हीनं वितिष्ठति सयद्येनं विदित्वोपधावेदास्मिन् वा वेदं ब्रह्मणेध्याहास यदिदं अस्मै वचने वचेति । संमुखान् ग्राव्णः कृत्वा द्रोणकलशमध्यूहेत् इदं अहं अमुं विश्यध्यूहामि इति । ईशे स्वानां अपैनं स्वाश्चायन्त्यनन्तरं अवरुद्धो भवति ।" जै-ब्रा. (17-2) ॥

सौत्येऽहनि अभिषवानन्तरं उद्गातरो ग्रावसु द्रोणकलशं प्रतिष्ठाप्य तस्मिन्
दशापवित्रं वितन्वते मन्त्रेण । अत्रावरुद्धराजविषये प्रयोगभेदः प्रतिपादितः । यद्यस्या-
वरुद्धो राजन्यः स्यात् विमुखान् ग्राव्णः कृत्वा तूष्णीं द्रोणकलशमध्यूह्य तमवन्हा-
स्यन्दक्षिणा निरुहेत् । इदमहममुं विशो निरुहामि इदमस्यराष्ट्रं न्युब्जामीति । न्यञ्चं
द्रोणकलशं न्युब्जेत् । अथ विशो राज्ञश्च पृथक्करणम्, तदनन्तरं तस्य राष्ट्रस्याधरी-
करणञ्चोच्यते । तथा संमुखान् ग्राव्णः कृत्वा योऽस्य राजन्यः स्यात् तस्य नाम गृहीत्वा
द्रोणकलशमध्यूहेत् । 'इदमहममुं विशि अध्यूहामी'ति । अत्र च प्रजासु राज्ञोऽध्यूहनं
विधीयते । 'अपेतरो रुध्यते अवेतरो गच्छती'ति । कस्यचिद्राज्ञोऽपरोधः । प्रजाभिस्तिर-
स्करणम्, कस्यचिद्राज्ञोऽवगमश्च प्रतिपाद्यते । ऐतरेयब्राह्मणे (8-10) एवं दृश्यते—
"यद्युह वा एनमुपधावेद्राष्ट्रादपरुध्यमानः तथा मे कुरु, यथा ह राष्ट्रं पुनरवगच्छति
उपस्थायामित्राणां व्युपनुक्तिं ब्रुवन् । गृहानभ्येत्य अपप्राच इन्द्रविश्वां अमित्रानिति
सर्वतो हा स्मा अनमित्रं अभयं भवति उत्तरोत्तरिणीं हि श्रियमश्नुते । अश्नुते ह
प्रजानामैश्वर्यं आधिपत्यं य एवमेतां अमित्राणां व्युपनुत्तिं ब्रुवन् पश्चादगृह्यस्याग्नेः

उपविष्टायान्वारब्धाय ऋत्विक् अन्ततः कंसेन चतुर्गृहीतास्तिस्र आज्याहुतीरैन्द्रीः प्रपदं जुहोति, अनार्त्यै अरिष्ट्यै अज्यान्यै अभयाय" (ऐ. ब्रा. 8-10) ॥

अत्रावरुद्धस्य राज्ञोऽभयप्रदानार्थं रष्ट्रावगमनार्थं च प्रयोगविशेषः प्रतिपादितः । तैतिरीयसंहितायां राष्ट्रभृन्मन्त्रविनियोगप्रकरणे एवं विनियोगः श्रूयते—"यो राष्ट्रादवभूतः स्यात् तस्मै होतव्याः यावन्तोऽस्य रथाः स्युः तान् ब्रूयात् युंध्वमिति । राष्ट्रमेवास्मै युनक्ति" इति । अत्र राष्ट्रादवरुद्धविषये राष्ट्रभृद्धोममन्त्रा विहिताः, तथा होमानन्तरं रथयोगेन राष्ट्रप्राप्तिश्च फलत्वेनोक्ता । सर्वेष्वपि ब्राह्मणेषु प्रजाभिस्त्यक्तस्य राज्ञोऽपरुद्धा निरुद्धा इति नाभिक्रमत्येन प्रतिपादितम् । तथा विशां राज्ञोऽवगमश्च सर्वेष्वपि ब्राह्मणेषु ऐकमत्येन प्रतिपाद्यते । यूपैकादशिनीब्राह्मणेषु तैत्तिरीयादिकृष्णयजुःसंहितासु श्रूयमाणेषु अपरुद्धस्य राज्ञोऽवगमः, अवगतस्य राज्ञोऽपरोधश्च प्रतिपादितः । उद्देशभेदेन प्रयोगभेदश्च प्रतिपादितः । "यदि कामयेत योऽवरुद्धः सोपरुद्ध्यताम्, योऽपरुद्धः सोऽवगच्छत्विति— "ऐन्द्रस्य लोके वारुणमालभेत वारुणस्य लोक ऐन्द्रं य एवावगतः सोऽपरुध्यते, योऽपरुद्धः सोऽवगच्छति" इति । तथा "तत्रैवैन्द्रमालभ्य मारुतमालभेत । विड्वै मरुतो विशमेवास्मा अनुबध्नाति । यदि कामयेत प्रजा मुह्येयुरिति पशून् व्यतिषजेत् प्रजा एव मोहयति" इत्यपि प्रतिपाद्यते । पूर्वत्र राज्ञि प्रजानां विश्वासजननार्थं प्रयोग उक्तः । उत्तरत्र च प्रजामोहनार्थ इति प्रयोगभेदः । यदि च राज्ञ आगमनानन्तरमपि प्राजा राजविरुद्धमेव कुर्वत्य एव वर्तेरंस्तदा प्रजामोहनकरणमावश्यकं भवति । मुग्धा हि प्रजा राजविरुद्धकार्येभ्य उपरता भवेयुः ॥ (तै. सं. 6-6-5-3) ॥

"ओ हों इत्येवापरुद्धाय राजन्यः कुर्वीत-अव हैवगच्छति" । अत्र इन्द्रवृत्रवध-सम्बन्धी इतिहासप्रतिपादनानन्तरमयं विधिः श्रूयते । इन्द्रो वृत्रं वज्रेणाध्यस्य नास्तृषीदिति मन्यमानः परां परावतमगच्छत् । तं प्रजापातेः अकामयत—तत्स्यादिति । तं ओ हों इत्यन्व-ध्यायत् । सोऽभवत्" । (जै. ब्रा. 1-137) "नौ धा वै काक्षी वधः ज्योगप्रतिष्ठितश्चरन् । सोऽकामयत प्रतिष्ठेयमिति" ॥ (जै. ब्रा. 1-147)

"काण्वः नार्षदिः ज्योगप्रतिष्ठितश्चरन् । सोऽकामयत प्रतिष्ठां विन्देयेति" ॥ (जै. ब्रा. 1-116) ॥

नौ धा काण्वश्चावरुद्धौ राजानाविति ज्ञायते ॥

॥ गणः गणपतिः ॥ (गणतन्त्रम्)

मन्त्रेषु ब्राह्मणेषु च गणशब्दो बहुवारं प्रयुक्तः । विशिष्य ब्राह्मणेषु प्रयुज्यमानो गणशब्दो राज्यतन्त्रतत्त्वरीत्या मुख्यत्ववानिति प्रतीयते । यद्यपि सामुदायिकव्यवहारानुसारेण गणशब्दो जनसमुदायपरः, अथाप्येतादृशसमुदायकल्पनस्य किं मूलमिति विवेचनीयं भवति । अयं गणशब्दो ब्राह्मणक्षत्रियादिवत् न जातिप्रयुक्तः । अथ वा तृत्सुभरतादिवत् एकजातीयजनसमुदायपरः । परं त्वेतदपेक्षयातिरिक्तं किमपि मूलं अस्य भवितुमर्हति । वयं तु ब्रूमः—राज्यतन्त्रतत्त्वरीत्यात्र किमपि मूलं भवितुमर्हति इति । अत्र च ब्राह्मणभागे दृश्यमानाः अभिप्राया एव मूलभूता भवितुमर्हन्ति । तैत्तिरीयब्राह्मणभागे पठ्यमानानि वाक्यानि गणशब्दस्य राज्यतन्त्रतत्त्वसम्बन्धं स्पष्टमेव प्रतिपादयन्ति । अपरुद्धस्य राज्ञः काचनेष्टिर्विहिता । तत्र गणश एव विशमवगच्छतीति गणशो विभक्ता जना राज्ञः स्वाधीना भवन्तीत्युच्यते । तथान्यत्र 'गणश एवास्मै विशं कल्पयति गणश एव विशमवरुन्धे' इति विशां गणशो विभागः स्पष्टं प्रतिपादितः । तदनुसारेण मन्त्रभागे ब्राह्मणभागे च तत्र तत्र श्रूयमाणस्य गणशब्दस्य राज्यतन्त्रतत्त्वरीत्या मुख्यत्वमस्तीति अङ्गीकर्तव्यं भवति । "व्रातं व्रातं गणं गणं" इति ऋग्वेदे दर्शनात् "गणेभ्यो गणपतिभ्यश्च वो नमः" इति यजुर्वेदे शतरुद्रीयमन्त्रेषु श्रूयमाणवाक्यानुसारेण बहवो गणा वर्तन्त इति ज्ञायते । तथा प्रतिगणं कश्चन गणपतिशब्दवाच्योऽस्तीति च ज्ञायते । बहवो गणपतयः सन्तीति गणपतिभ्य इति बहुवचनप्रतिपादनेन निश्चीयते । एतादृशगणशो विभागो यद्यपि लोकसिद्धः अथापि देवताप्रतिपादनकालेऽपि यत्र बहवो देवताः सन्ति ता अपि गणशो विभज्य प्रस्तुताः । इदं च वेदेषु प्रसिद्धं, यत् मरुतो बहवः (मरुतो हि देवानां भूयिष्ठाः) तेऽपि गणशो विभक्ताः । (गणशो हि मरुतः) ॥

गणशब्दप्रयोगश्च ऋग्वेदादारभ्य सर्वेष्वपि मन्त्रब्राह्मणेषु प्रयुज्यमानो दृश्यते । वेदसमनन्तरकालेऽपि गणशब्दप्रयोगस्य अनुवृत्तिरस्तीति ज्ञायते ॥

गणतन्त्रराजतन्त्रतत्त्वयोः मिश्रणं वेदकाले आसीत् । पश्चादेव तयोः तत्त्वयोर्विभागः समजनि । धर्मसूत्रकाले इतिहासपुराणकाले च राजतत्त्वस्यैव प्राधान्यं दत्तम्; न गणतन्त्रतत्त्वस्य । अथापि स्मृतिषु गणानामस्तित्वं तत्राङ्गीकृतमेव । परं तु गणायत्तस्थितिर्न राज्ञः स्मृतिष्वङ्गीकृता । बौद्धग्रन्थेषु प्रतिपाद्यमानकालेऽपि गणतन्त्रतत्त्वस्य स्वातन्त्र्येण स्थितिरङ्गीकृता दृश्यते ॥

बृहस्पतिरेवं वदति—

'ग्रामश्रेणिगणाश्चैव संकेतः समयक्रिया ।
बाधाकाले तु सा कार्या धर्मकार्ये तथैव च ॥ (17-56)

चारचौर्यभये बाधाः सर्वसाधारणाः स्मृताः ।
तत्रोपशमनं कार्यं सर्वैर्नैकेन केनचित् ॥

अत्र च गणानां प्रस्तावोऽस्ति । तेषां संकेतः समयश्च प्रतिपादितः । तेषां रक्षणं च राज्ञा कर्तव्यमित्युच्यते ॥

पाणिनिना स्वकीये सूत्रे "सङ्घातो गणप्रशंसयोः" (3.3.86) इति गणशब्दो व्याख्यातः । स्मृतिषु यत्र च राजतत्त्वस्य प्राधान्यं दत्तं, तत्रापि गणशब्दप्रयोगोऽस्ति । याज्ञवल्क्यः—

व्यवहारान् स्वयं पश्यन् सभ्यैः परिवृतोऽन्वहम् ।
कुलानि जातिश्रेणीश्च गणान् जनपदान्यपि ॥ (1-3-60-61)

"स्वधर्माच्चलितान् राजा विनीय स्थापयेत् पथि"

इति वदति । अत्र गणानां प्रस्तावस्तेषां धर्माणां च प्रस्तावश्चास्ति । यदि चैतादृशगणाः स्वधर्माच्चलिता भवेयुस्तदा राज्ञा शिक्षणमपि कर्तव्यं भवति । राजतन्त्रनीतिप्रतिपादनपरकात्यायन-स्मृतावपि एवं पठ्यते-"गणपाषण्डपूगाश्च व्राताश्च श्रेणयस्तथा"-इति । (वीरमित्रोदये उदाहृतम् ।) भृगुरपि "ग्रामपौरगणश्रेण्यश्चातुर्विंध्यस्य वर्गिणः" इति जनसमुदाये वर्तमानबहुविधविभागं दर्शयति । धर्मसूत्रेषु तदनुसारिस्मृतिषु राज्यतन्त्रव्यवहारे राजतत्त्वस्यैव सर्वथा प्राधान्यमङ्गी-कृतम् । अत्र च प्रजानां न प्राधान्यम् । अथापि राज्ञा परिपालनीयेषु धर्मेषु गणधर्मोऽपि प्रतिपादित इति बोद्धव्यम् । अतश्च ज्ञायते प्रजानां विभागो गणशः स्मृतिकालेऽप्यासीदिति । जैनबौद्धग्रन्थयोः साक्षाद्गणतन्त्रप्रस्तावोऽस्ति । आचाराङ्गसूत्रनामके जैनग्रन्थे राज्यविभागकाले गणराज्यप्रस्ताव एवमस्ति (2.3.10) । गणरायाणि इति बौद्धग्रन्थेषु च गणपूर्वक इति व्यवहारोऽस्ति । गणशब्दस्य पर्यायभूतः सङ्घशब्दः तत्र तत्र प्रयुक्तः । बृहत्संहितायां वराहमिहिरः (4.14) गणराज्यं प्रतिपादयति । अमरकोशेऽपि "अथ राजकम् । राजन्यकं च नृपतिक्षत्रियाणां गणे क्रमात्" इति वदति (2-8-11-3-4) । महाभारते शान्तिपर्वणि (अ. 107) गणराज्यस्य दूषणं विस्तरेण कृतम् ॥

व्याख्यातारो जगन्नाथनीलकण्ठादयो गणतत्त्वव्यवहारमङ्गीकृत्यैव वदन्ति । नीलकण्ठोऽपि व्यवहारमयूखे संविद्व्यतिक्रमप्रकरणे गणशब्दं सङ्घशब्दं च पर्यायतया प्रयुनक्ति ।

अवदानशतकनामकग्रन्थे गणराज्यस्यास्तितां तत्कर्ता केनचिदितिहासेन प्रतिपादयति। एवं हि तत्र दृश्यते—"अथ मध्यदेशात् वणिजो दाक्षिणापथं गताः। तैः राज्ञो महाकफिणस्य प्रभूतमुपनीतम्। राज्ञोक्तम्—भो वणिजः! कस्तत्र राजा? इति। वणिजः कथयन्ति—केचित् देशा गणाधीनाः; केचिच्च राजाधीनाः" इति। (अयं च ग्रन्थो रामप्रसादमहाशयेन आचार्यजयस्वालमहाशयं प्रति प्रकटीकृतः।) अनेन ज्ञायते—यथा वा राजाधीना जना अवर्तन्त तथा तदा गणतन्त्रमपि आसीदिति। किं च गणशब्दपर्यायभूतः सङ्घशब्दः पाणिनिना चरित्रकालीनजनेषु प्रयुक्तो दृश्यते—"जनपदशब्दात् क्षत्रियादञ्" (4.1.168) इत्येकं सूत्रं वर्तते। तत्र वार्तिककारः कात्यायनः—"क्षत्रियादेकराजादिति सङ्घप्रतिषेधार्थम्" इति वदति। भगवान् पतञ्जलिरपि बहूनां सङ्घानामस्तित्वमङ्गीकरोति। आचार्यजयस्वाल-मतानुसारेण पाणिनिसूत्रेषु दशसङ्ख्यानामायुधिसङ्घानां प्रस्तावोऽस्ति॥

यद्यप्यत्र प्रतिपाद्यमानाः सङ्घाः पालयितॄणां सङ्घा एव, न पाल्यमानाः प्रजाः सङ्घशो विभक्ता इति दृश्यन्ते, अथापि राजतत्त्वप्रतिसम्बान्ध (oligarchy) आलिगार्कि राज्यतन्त्रमपि आसीदित्यभ्यूहस्यावकाशोऽप्यस्ति। बौद्धग्रन्थेषु यथा भिक्षुसङ्घानां प्रस्तावः, न तथा जनसङ्घानां प्रस्तावोऽस्ति। अथापि जनसङ्घन्यायेनैव भिक्षूणां सङ्घाऽपि कल्पित इत्यूहस्यावकाशोऽस्ति। अत्रेदं वक्तव्यम्—गणतन्त्रतत्त्वस्य राजतन्त्रतत्त्वप्रतिद्वन्द्वित्वं सर्वैरप्यङ्गीकृतम्। गणतन्त्ररीत्या एकत्र संभूयैकं स्वकार्यनिर्वाहार्थं नियोजयन्ति। तस्य वरणानन्तरमधिकार आयाति। एतदेव (Republic) रिपब्लिक् शब्देनोच्यते। वृतः पुरुषः रिपब्लिक्शब्दवाच्यस्याध्यक्षो भवति। राजतन्त्ररीत्या पुनरेक एव राजा अधिकारिपुरुषः। स च स्वयमेव राज्यनिर्वाहं करोति। नात्र प्रजानां सम्बन्धो दृश्यते। अतो राज्यतन्त्रतत्त्वस्य गणतन्त्रतत्त्वस्य च परस्परविरोधः स्पष्ट एव। परं तु वैदिकराज्यतन्त्रे एतयोर्द्वयोः तत्त्वयोः सहयोग आसीदित्यङ्गीकर्तव्यं भवति॥

ऐतिहासिकपद्धत्या विमर्श एवमायाति—ऋग्वेदकाले प्रथमं राजप्रधानराज्यतन्त्रमेवा-
सीत्। अत्रापि राजा जनैर्वृत एव। राज्ञो वरणपर्यालोचनेनास्यैव गणतन्त्रतापि वक्तुं शक्यते।
राजप्रधानत्वात् राजतन्त्रत्वमपि युज्यते। ऋग्वेद एव जनराज्यप्रस्तावोऽस्ति। एवं हि कश्चन
मन्त्रः श्रूयते—'त्वमेताञ्जन राज्ञो द्विर्दशा बन्धुना सुश्रवसोपजग्मुषः। षष्टिं सहस्रा
नवतिं नवश्रुतो निचक्रेण रथ्यादु दुष्पदा वृणक्'॥ इति। अत्रायमितिहासः सूच्यते—सुश्रव इति
कश्चन बन्धुरहितो राजा आसीत्। अनेन युद्धं कर्तुं विंशतिसंख्याका जनराजानः (जनाधि-
पतयः, उपगतवन्तः। तेषामनुचराश्च नवतिसङ्ख्योत्तरषष्टिसहस्रसङ्ख्याका आसन्।) तान्
सर्वानपि इन्द्रो रथचक्रेणैव हतवानिति। अत्र विंशतिसंख्याकजनराजानः प्रतिपादिताः।
अनेन ज्ञायते—ऋग्वेदकाले बहुषु स्थलेषु जनराज्यमासीदिति। तथा च यथा राजानः तस्मिन्

कालेऽवर्तन्त, तथा जनराज्यं चासीदिति । अन्ये पुनरेवं वदन्ति—वेदकाले प्रथमं राजप्रधानराज्यतन्त्रमेवासीत् । तदनन्तरं तादृशराज्यतन्त्रं उत्सन्नमभूत् । आर्या अनार्येभ्यो जनेभ्यो राजतन्त्रस्थाने गणतन्त्रतत्त्वमादायादृतवन्तः । अत एव ब्राह्मणेषु गणप्रस्तावोऽस्ति । ब्राह्मणकाले राजतत्त्वमप्रतिष्ठितमेवासीत् । बौद्धग्रन्थकाले पुनर्गणतन्त्रानुसारि राज्यतत्त्वमेवासीत् । बौद्धग्रन्थकालोत्तरं गणतन्त्रतत्त्वस्योत्सन्नत्वात् पुनरपि राजप्रधानराज्यतन्त्रमेव सुप्रतिष्ठितमभूत इति । वयं तु ब्रूमः—वेदसमनन्तरकाले यत्किं वा भवतु राज्यतन्त्रम् ; वेदकाले पुनर्गणतन्त्रमिश्रमेव राजप्रधानं राज्यतन्त्रमासीदिति । यद्यपि राजानः तत्र तत्र श्रुताः, अथापि तेषां स्थितिर्जनायत्ता इत्यत्र न कापि संशीतिः । राजा वृतो वा भवतु अथ वा परम्परया आगतो वा भवतु । यो राजत्वेन क्लृप्तः तस्य प्रजानुसारित्वमावश्यकमेव । अन्ततः परिशील्यमाने एवं भवति वैदिकराज्यतन्त्रं न राजप्रधानराज्यतन्त्रम् ; परं तु प्रजाप्रधानराजतन्त्रमेव इति । अतश्च प्रजाप्रधानराज्यतन्त्रे प्रजानां गणशो विभाग आवश्यको भवति। गणशो विभक्तानां जनानां प्रतिनिधयो राज्ञः साहाय्यं कर्तुं शक्ता भवन्ति । एतादृशराज्यतन्त्रमेव वेदकाले आसीदिति निश्चित्य ब्रूमः । वेदकालीनेतिहासविमर्शं कुर्वन्तः पाश्चात्याः अस्मदीयाश्चाधुनिकाः गणशब्दस्य मुख्यत्वं न ज्ञातवन्तः । प्रजानां गणशो विभागश्च तेषां विमर्शपथं न आयाति । गणशब्दो बहुषु स्थलेषु प्रयुक्तः राज्यतन्त्रसम्बन्धितया च प्रयुक्तः । तैः न सम्यग्विवृतः । वैदिककोशकर्तारो गणशब्दं विस्मृतवन्तः । ब्राह्मणेषु तत्र तत्र राज्यतन्त्रे प्रजानां प्राधान्यमैकमत्येन प्रतिपादितम् । इदं स्पष्टतयान्यत्र प्रतिपादितम् । प्रजानां गणशो विभागः परं तैत्तिरीयसंहितायाम, विशिष्य ब्राह्मणेषु स्पष्टमुच्यते । पाश्चात्या आधुनिकाश्चास्मदीया यथा ऋग्वेदमन्त्राणां प्राधान्यमङ्गीकुर्वन्ति, न तथान्यवेदमन्त्रब्राह्मणानाम् । प्रायस्तत्र ते उदासीना एव । अत एव वेदकालीनलोकपरिस्थितिज्ञानविषये ते न संपूर्णज्ञानवन्तः । अत्रेदमुदाह्रियते—अस्मिन्नेव विषये सुप्रसिद्धः मोनीर् विल्लियंस्महाशयः स्वकीयसंस्कृतभाषाकोशे गणशब्दस्य सामान्यतो जनसमुदायपरत्वमेवोक्तवान् (Tribe) । दैव इत्यमुमेवार्थं स वदति । इदं चार्थवर्णनं महदनर्थमुदपादयत् । सुप्रसिद्धः प्राचीनलेखाविमर्शकः (FLEET) फ्लीट्महाशयो गुप्तकालीनशिलालेखनव्याख्यानावसरे मालवगण इत्यस्य मालवा जना इति व्याख्यानं कृतवान् । परं तु तादृशी व्याख्या (THOMAS) तोमस्महाशयेन सावेशं निराकृतः । गणशब्दस्य न सामान्यजनपरत्वम् ; अपि तु ततोऽप्यधिकोऽर्थ इति सः अभिप्रैति । सुप्रसिद्धाः मुजुंदार्—महाशयाः, Corporate Life in Ancient India-नामके ग्रन्थे वेदकाले अर्थमूलकसमुदायकल्पनं, तथा राज्यतन्त्रतत्त्वमूलकसमुदायकल्पनं चासीदिति सुस्पष्टं वदन्ति । यद्यपि मजुंदार्महाशयो गणतत्त्वस्यार्थतत्त्वमूलसमुदायपरत्वं वदति, अथापि तैत्तिरीयब्राह्मणपर्यालोचनेन गणशब्दस्य

राज्यतन्त्रतत्त्वमूलकत्वमेवेति निश्चीयते ; यतो गणशब्देन विभक्ता जना राज्ञः अनुकूला भवन्तीति तत्र स्पष्टमुच्यते । राज्यतन्त्रतत्त्वरीत्या मुख्यत्वमस्तीति निश्चीयते । गणत्वेन जनानां परिगणनं कदा अभूदिति इतः परं निरूपयामः ।

ऋग्वेदपर्यालोचनयैवं भवति—प्रथमं पृथक् पृथक् जनाः अवर्तन्त । तदनन्तरं कुलगोत्रादिभिः समुदायतां प्राप्ताः । अयं च समुदायो न्यूनपरिमाणः । तदनन्तरं जना एकनाम्ना समुदायतां प्राप्ताः । तत्र बहूनि कुलानि बहूनि गोत्राणि चैकैकसमुदायस्य आसन् । तेषां पृथक् पृथक् नाम अभूत् । स्पष्टं चेदं ऋग्वेदे । जना भारतनाम्ना तृत्सुनाम्ना च व्यवहृताः । तथात्रैवानुद्रुभद्रुपुरुनाम्ना च व्यवहारो दृष्टः । तत्रैव पञ्चजना इति कश्चन व्यवहारोऽपि वर्तते । ऋग्वेदे दृश्यमानजनसमुदायकल्पने मुख्यतोऽयं निर्देशः । परं तु क एते पञ्चजना इति निश्चित्य न वक्तुं शक्यते । तथा आर्य इति व्यवहारः ऋग्वेदे दृश्यते । परं त्वस्य मूलं किमिति न प्रतीयते । प्राय एकवचनान्तप्रयोग एव बहुलः । क्वचिदेव बहुवचनान्तः प्रयोगः । "तिस्रः प्रजा आर्याः" (ऋक्सं. 7.33.7) "यदि विशो वृजतेदस्ममार्याः (10-11-6)" इत्यादिष्वेवार्यनाम्ना जनानां व्यवहारो दृश्यते । आचार्यव्यवहारः तृत्सुभरतादिभ्यो भिन्नानामेव जनानां नाम वा, अथ वा तेषामेव यईति निर्देशो वर्तत इति न निश्चीयते । तदा केषां जनानामार्यत्वेन व्यवहारोऽभूदिति निर्णेतुं न शक्यते । यदि च ऋग्वेदे श्रूयमाणानां तृत्सुभरतादीनामिव आर्य इति नाम इति निश्चीयते, तदा ऋग्वेदे श्रूयमाणभिन्ननामवतां जनानामिव आर्य इति नाम्ना समुदायकल्पनमभूदिति वक्तव्यं भवति । परं तु आर्य इति सामुदायिकव्यवहारो ब्राह्मणेषु नादृतः । यथा कुरुपाञ्चाल-मात्स्या-वश-उशीनरा भारता इति व्यवहारो बहुलं दृश्यते, न तथा आर्य इति व्यवहारः । स्मृतिषु परं प्रसिद्धः । तत्र "आर्यसमयः" "आर्याः" इति व्यवहारो धर्मसूत्रेषु प्रसिद्धः । यदि वयमार्यत्वेन समुदायकल्पनम् ऋग्वेदकाल एवाभूत् इत्यङ्गीकुर्मः, तदा ऋग्वेदकाल एवार्यसमुदाय उत्पन्न इत्यङ्गीकर्तव्यं भवति । इदं च समुदायकल्पनं समुदायतत्त्वाङ्गीकारेण । ऋग्वेदकाल एव कल्पितेषु समुदायतत्त्वेषु अत्यन्तं वृहत् आर्यभिन्ना जना अनार्या इत्येवाङ्गीकर्तव्यं भवति । अनार्य इति शब्दः ऋग्वेदे न दृश्यते । दस्यूदासादिशब्दा एवार्यशब्दप्रतिद्वन्द्वितयोल्लिखिताः । तथा ब्राह्मणक्षत्रियवैश्यशूद्राः इति जातितत्त्वमूलकं समुदायकल्पनं ऋग्वेदकाल एवप्रारब्धमिति वक्तुं शक्यते ; यतः पुरुषसूक्ते चतुर्णां जातिनाम्नां व्यवहारोऽस्ति । यजुःसंहितासु तथा ब्राह्मणेषु च जातिमूलकब्राह्मणक्षत्रियवैश्यशूद्रा इति व्यवहारः स्पष्टं दृश्यते, तथा राज्यतन्त्रतत्त्वरीत्या प्रजानां विभागः ऋग्वेदकाल एवोत्पत्तिमगात् । तत्र त्रिविध एव व्यवहारः ब्रह्म-क्षत्र-विट् इति । राज्यतन्त्रतत्त्वरीत्या पाल्यपालकत्वेन द्विधा विभक्ताः । पाल्यमानाः प्रजा विट्शब्देन प्रतिपादिताः, पालकश्च क्षत्रशब्देन । उभयोरुपकारकं तत्त्वं ब्रह्मशब्देन प्रतिपादितमित्युक्तपूर्वमेव । एतादृश-

राज्यतन्त्रतत्त्वरीत्या प्रजानां विभागकल्पनमेव पश्चात्काले जातितत्त्वस्यापि मार्गकल्पकमभूत् । एवं गणशब्दः पाल्यमानासु प्रजासु गणशो विभागं वदति । इदं च जनपालनसौकर्यायैव । यदा वा जना न्यूनसङ्ख्याका आसन् न तदा एकस्मिन्नेव जनसमुदाये राज्यतन्त्रतत्त्वमूलको विभागोऽभूत् । यदा च क्रमशो जना वृद्धिं गताः, यदा च बहवो जनाः स्वसमुदायकल्पनं परित्यज्यान्यजनसमुदायेनैकत्वं च प्राप्ताः तदा एकस्मिन्नेव गणे बहुजातीया अपि जना अवर्तन्त इति प्रतिभाति । प्रायो वेदकाले जना जातिनाम्नैव व्यवहृताः । तथैकैकस्य जनसमुदायस्यैकैको राजाभूत् । जननाम्नैव सोऽपि व्यवहृतः—तृत्सूनां राजा, भरतानां राजा, कुरुपञ्चालानां राजा इति । यदा च जना एकनाम्ना व्यवहृताः, अन्यं जनं जितवन्तः, अन्यभूमिं च जितवन्त', तदा जातिनाम्ना व्यवहारं विहाय राज्ञो देशनाम्ना व्यवहारं कृतवन्तः । यदा जनाः परिमितसङ्ख्याका आसन् तदा ते एकत्र सभायां समित्यां वा सङ्गत्य स्वाभिप्रायमाविष्कृतवन्तः । राजा च तेषामभिप्रायं ज्ञात्वा तदनुसारेण राज्यनिर्वाहं कृतवान् । यदा जनानां वृद्धिरभूत् तदा समेषां सम्मेलनस्यावश्यकत्वात् केनाचिन्निमित्तेन जनानां गणशो विभागः समजनि । विभागनिमित्तभूतं किमिति निर्णीय वक्तुं न शक्यते । परं तु इदमत्र निश्चितम् । नात्र चातुर्वर्ण्यसम्बन्धिजातितत्त्वं मूलम् । परं तु तेषां तेषां कर्म वा निवासदेशो वा तत्र निमित्तमिति वक्तुं शक्यते ॥

एकविधकर्मकर्तारो जनाः एकगणत्वेन परिगणिताः । तथा एकैकप्रदेशवासिनः एकगणत्वेन परिगणिताः । ते च गणाः स्वस्य स्वस्य गणस्यैकैकं प्रतिनिधिं नियोजितवन्तः । तादृशप्रतिनिधिरेव सजातशब्देनोच्यते । ते च सजाताः संभूय स्वस्य गणस्यापेक्षितं निश्चित्य राज्ञे निवेदितवन्तः । राजा च तदनुसारेण कार्यं कृतवान् । अत्र च सजाता मुख्ये स्थाने वर्तन्ते । सजातानां गणतत्त्वस्य परस्परं सम्बन्धोऽवर्जनीयः । राज्ञः प्रस्तावकाले सजातशब्दस्य गणशब्दस्य च प्रस्तावदर्शनात् सर्वथा गणशब्दो राज्यतन्त्रतत्त्वमूलक एव । इदं च गणतन्त्रराज्यतत्त्वमर्वाक्कालीनगणतन्त्रराज्यतत्त्वसमानमेव । अधुनातने काले तत् गणैर्नियुक्तानां पुरुषाणां समित्यां सभायां समागमः तैः अथ वा साक्षात् एव जनैर्वृतस्य पुरुषस्य जनाधिपतिरिति नाम । वेदकाले पुनः तस्यैव राजा इति नाम । वेदकाले च गणतन्त्रं राजप्रधानराज्यतन्त्रं च संश्लिष्टं दृश्यते । ऐतिहासिकपद्धत्या विमर्शने कस्मिंश्चित्काले गणतन्त्रं राजप्रधानराज्यतन्त्रं च स्वतन्त्रतयैव आस्ताम् । पश्चात्काले पुनर्द्वयोः संमेलनमभूत् । प्रजाप्रधानगणतन्त्रमेव राजप्रधानराज्यतन्त्रापेक्षया प्राचीनतमम्; यतो राजप्रधानराज्यतन्त्रेऽपि गणतन्त्रतत्त्वमूलभूता अंशा मात्रामात्रापरित्यागेन सुरक्षिता दृश्यन्ते । राजप्रधानराज्यतन्त्रेऽपि राज्ञः स्वजनाभिप्रायानुसारित्वमवर्जनीयं भवति । राजप्रधानराज्यतन्त्रस्योत्पत्तिः प्राचीनतमसंस्कृत्यनुसारेणेति वक्तव्यं भवति; यतः प्राचीनतमे काले जना

एकस्याधिपत्यमङ्गीकृत्य तदनुसारेणैव तदधीनास्तादृशाश्चाभूवन् । एतादृशैकमनुष्यपूजैव पश्चात्काले राजतत्त्वस्य मार्गादेशिकाभूत् । यदा च जनाः समुदायभूता अन्यसमुदायेन युद्धं कर्तुमुद्युक्ताः तदा एकस्याधिपत्ये वर्तमाना एव तदकुर्वन् । यस्याधिपत्ये ये जयं प्राप्ताः तं पूजयितुं प्रवृत्तास्तस्योत्कृष्टं स्थानं दत्तवन्तः तद्द्वारा राजतत्त्वस्यावतारोऽभूत् । यदा च जनाः एकस्मिन् प्रदेशे वासं कृतवन्तोऽपि तस्य तस्य स्वस्वकार्यव्यापृतत्वात् समुदायकार्यनिर्वाहार्थमेकं नियोजितवन्तः तदा तदा सम्भूय स्वापेक्षितं च निर्णीतवन्तः । एतदेव गणतन्त्रतत्त्वस्य मूलं संजातम् । गणतन्त्रराज्यतत्त्वं समाधानकाले उत्पन्नम्; राजप्रधानराज्यतन्त्रं पुनर्युद्धादुत्पन्नम् । इतः परं वेदेषु तत्र तत्र निर्दिश्यमानगणशब्दस्य तत्संबन्धिविषयाणां विमर्शं कुर्मः ॥

वेदेषु जनसमुदायकल्पनस्य त्रीणि कारणानि दृश्यन्ते । एकं समुदायव्यवहारसिद्ध्यर्थं कल्पितं नाम । अपरं चातुर्वर्ण्यमूलभूतब्रह्मक्षत्रादिव्यवहारः । अन्यस्तु राज्यतन्त्रमूलको गणशो विभागः । ऋग्वेदे एवं गणशब्दप्रयोगोऽस्ति । "स हि स्वसृदश्वः युवा गणः (1.87.4)

ये त्वा अवर्धन् अभवन् गणस्ते (3.35.9)
युवा स मारुतो गणः (5.61.13)
त्रायतां मरुतां गणः (10.137.5)
गणानां त्वा (2.23.1)
आदित्यं मरुतां गणम् (1.14.3)
वन्दस्व मरुतं गणम् (1.36.15)
तव संमारुतं गणम् (1.64.12)
गणं देवानां भव सुहस्ताः (4.3.53)
यदीं गणं भजते सुप्रयावभिः (5.44.12)
तमृषे मारुतं गणं रमयाभिरे (5.51.13)
मारुतं गणम् (5.52.14)
गणं मारुतम् (5 53.10)
अग्ने शर्धन्त मा गणम् (5.56.1)
स्तुषे गणं मारुतम् (5.58.1)
त्वेषं गणम् (5.58.2)
आदित्यान् मारुतं गणम् (6.14.94)
शिसोधो गणम् (6.56.5)
मारुतं गणम् (8.94.12)
आदीन् हंसो यया गणम् (9.32.3)

मारुतं गणम (10.367)
मारुतं गणम् (10.77.1)
यदीं गणस्य रशनां अजीगः (5.1.3)
यो वः सेनानीः महतो गणस्य राजा व्रातस्य (10.34.12)
प्रसाकमुक्षे अर्चता गणाय (7·38.1)
उत प्रगाय भज अनिषद्य (6.40.1)
अथ यच्चारते गणे (8.46.1)
सजूर्गणेन तृम्पतु (1·23·7)
अत्रिं मुञ्चतो गणेन (1.1173)
ब्रह्मकृता मारुता गणेन (3.32·2)
स सुष्टु भास ऋग्वता गणेन (4.50.5)
देवाँ अच्छा ब्रह्मकृता गणेन (7.9.5)
स युध इन्द्रो गणेन (10.103.3)
शम्यतो वर्ह्हि मरुतो गणेन (9·96.1)

एषु स्थलेषु प्रायः मरुतां समुदायो गणत्वेनोल्लिखितः । यथा वा देवतायाः विशेषणकाले राज्यतन्त्रानुसारिराजा सम्राडित्यादीनि राज्यतन्त्रतत्त्वसम्बद्धानि विशेषणानि दत्तानि, एवमेव मरुतां समुदायस्य प्रस्तावकाले राज्यतन्त्रतत्त्वमूलकगणशब्दोऽपि प्रयुक्तः । ऋभूणां समुदायः (4-35-3 गणं देवानां भवः सुहस्ताः) तथादित्यानां समुदायश्च गणशब्देन प्रतिपादितः । 'अत्रिं अमुं च भोगणेन' (1-117-3) इत्यत्र गणशब्दो लौकिकजनसमुदायपरः । आचार्यसायणोऽपि इन्द्रियवर्गेण पुत्रपौत्रादिगणेन कुत्रचित् इति व्याख्यातवान् (8-46-3) । उष्ट्रगणः अक्षगणः (10-34-12) उक्तः । अपस्न (5-1-3) जनगणप्रस्तावोऽस्ति । जनानां मध्ये हंसानां गमनं वदन् वेदो जनसमुदायगणशब्देनैव वक्ति । (9-32-3) ब्रह्मणस्पतिमन्त्रे (2-23-1) गणप्रस्तावोऽस्ति । परं तु गणशब्देन केषां प्रतिपादनं वर्तत इति न सम्यक् प्रतीयते । एवं ब्राह्मणवाक्यं परं छन्दसामेव गणत्वं वदति । मरुतां देवविट्त्वं ब्राह्मणेषु प्रसिद्धम् "मरुतो वै देवानां विशः" इति । अतो लोके विट्सु प्रसिद्धगणशब्दो मरुत्स्वपि उपयुक्तः । इत्यङ्गीकार्यं भवति । गणश्रीरप्युक्ता (5-60-8) (8-23-4) (1-64-9)

तथा अथर्ववेदे गणशब्दप्रयोगश्च बहुवारं कृतः । तत्रापि मरुतां समुदाय एव गणशब्देन प्रतिपादितः । रुद्रो गणपतित्वेन यजुर्मन्त्रेषु निरूपितः । रुद्रस्य गाणपत्यात् 'मयो भूरेहीत्युच्यते । गणा इव वै तं स च स्तेयः श्रियमश्नुते (जै. 2-103) इत्यन्यत्रोक्तम् ॥

अतः परं यजुःसंहितासु ब्राह्मणेषु च श्रूयमाणगणशब्दविमर्शं कुर्मः । अपरुद्धस्य राज्ञः पुना राज्ये स्थापनार्थं काचिदिष्टिः यजुर्ब्राह्मणेषु विहिता । तत्र च गणशब्दव्याख्यापि कृता । तैत्तिरीयसंहितायामेवं श्रूयते—'आश्वत्था भवन्ति । मरुतां वा एतदोजः यदश्वत्थः । ओजसैव विशमवगच्छति । सप्त भवन्ति । सप्त गणा वै मरुतः । गणश एव विशमवगच्छति' । अत्रापरुद्धस्य राज्ञः स्थापनार्थायामिष्टौ 'आश्वत्थान् मयूखान् सप्तमध्यमेषायां उपहन्यात्' इति कश्चन कल्पो विहितः । एतादृश-कर्मकरणेन प्रजाः स्वयमेव राज्ञोऽवगता भवन्ति इति प्रतिपादितम् । "इदमहं आदित्यान् बध्नामि । आमुष्मादमुष्मै विशोरवगन्तोः" इति मन्त्रश्चोक्तः । यतो विड्भिः त्यक्तो राजा अपरुद्धो भवति । अत एव तदवगमनार्थं अयं कर्मविशेष उक्तः । मन्त्रविशेषश्चात्रोक्तः । तत्राश्वत्थं प्रशंसत् ब्राह्मणं "मरुतां वा एतदोजः यदश्वत्थः । ओजसैव विशमवगच्छति" । इत्याश्वत्थमयूखै राजा स्वस्य ओजसैव विशामवगमनं करोतीति उच्यते । तत्र संख्यां प्रशंसद्ब्राह्मणं 'सप्त गणा वै मरुतः । गणश एव विशमवगच्छति' इति प्रतिपादयत् सप्तसंख्यया राजा गणशो विशामवगमनं करोतीति वदति । यतो गणशो विशो विभक्ताः, अतोऽवरोधश्च गणश एव भवति । इयमेवेष्टिर्मैत्रायणीसंहितायां च प्रतिपादिता । (मैत्रायणीसंहिता 2-2-1) । उभयोरपि संहितयोः विशामवगमनमनया इष्टया प्रतिपादितम् "उभयीमेवैतेन विशमवगच्छति । दैवीं च मानुषीं च । (तै. सं. 2-2-1) "देवविशैवैनं मनुष्यविशामवगमयति ।" (का. सं. 11-6) ग्रामकामस्य ब्रह्मणस्पत्येष्टिः तैत्तिरीयसंहितायां श्रूयते । "ब्राह्मणस्पत्यमेकादशकपालं निर्वपेद् ग्रामकामः । ब्राह्मणस्पतिमेव स्वेन भागधेयेनोपधावति । स एवास्मै सजातान् प्रयच्छति । ग्राम्येव भवति" । गणवतीयाज्यानुवाक्ये भवतःसजातैरेवैनं गणवन्तं करोति" । (तै. सं. 2-3-3-4 to 5) अत्र च ग्रामकामस्येष्टिर्विहिता । गणशब्दयुक्तौ मन्त्रौ च याज्यानुवाक्ये विहितौ । एतादृशमन्त्रं प्रशंसद् ब्राह्मणं 'सजातैरेवैनं गणवन्तं करोति' इति वदति । अत्र सजातैरेव गणवत्त्वं प्रतिपाद्यते । सजातानां गण इति कश्चन गणः प्रतिपाद्यत इति स्थूलदृष्ट्या प्रतिभाति । अत्र च सजाताः के इति विचारयितव्यम् । प्रजासु यथा गणशो विभागो नैवं सजातेषु विभागः । अपि तु सजातद्वारा तद्गणानामेवावरोधोऽत्रोच्यत इति वक्तव्यम् । यदा च सजाता वशा भवन्ति तदा तद्द्वारा गणा अपि वशा भवन्ति । सजातद्वारा गणप्राप्त्या यागकर्ता ग्रामी च भवति । मैत्रायणीसंहितायामपि एवंविधेष्टिर्विहिता । अत्र हि एवं पठ्यते— "बार्हस्पत्यं चरुं निर्वपेत् पयसि ग्रामकामः पशुकामो वा" । तस्य बार्हस्पत्ये गणवती-याज्यानुवाक्ये स्याताम् । यो बहु पुष्टः तस्य गृहात् क्षीरमाहरेयुः स्यात् स्यासां गवां दुग्धं स्यात् उदकं पुष्टिरेवैषां संभ्रियत । ब्रह्म वै बृहस्पतिः बृहस्पतिश्छन्दाँसि छन्दोभिः बृहस्पतिर्गणी स्वां वा एतत् देवतां भूयिष्ठेनार्पयति । सजातैरेवैनं गणिनं करोति" (मै. सं.

2-2-3)। अत्र ग्रामकामस्यापि विहितायामिष्टौ गणशब्दघटितौ मन्त्रौ याज्यानुवाक्यात्वेन निरूपितौ। तस्य फलप्रतिपादनावसरे सजातैरेवैनं गणिनं करोतीति इत्युच्यते। सजातैः सह गणस्य सम्बन्धः स्पष्टं प्रतिपादितः। सजाता गणान्तर्भूता एव। बहुवचननिर्देशात् बहवो गणा बहवश्च सजाता वर्तन्त इति अङ्गीकर्तव्यं भवति। अत्र च ग्रामकामस्येयमिष्टिः श्रूयते। सजातप्राप्तया ग्रामी भवतीति बहुषु स्थलेषु प्रतिपादनेऽपि अत्र सजातैरयं गणी भवतीति प्रतिपादनात्। यथा राज्ञो गणशो विशां अवरोध आवश्यकः तथा ग्रामिणो गणश एव सजातद्वारा विशामवरोधः अवश्यमिति प्रतिभाति। अत्रेदं तत्त्वं ग्रामकामविषय एव सजातप्रस्तावोऽस्ति। अतः सजातैर्ग्रामिणः सम्बन्धो अस्ति इति दृश्यते। सजाताः संभूय ग्रामनिर्वाहं कृतवन्तः। ते च स्वस्वगणस्य प्रतिनिधयः। तेषामानुकूल्येन ग्रामित्वं भवति॥

यथा वा राजविषये प्रजा गणशो विभक्ताः तथा ग्रामविषयेऽपि प्रजा गणशो विभक्ता इति गम्यते। विशां गणशो विभाग उभयत्र समान एव। राजभिः पाल्यमानानां प्रजानां गणशो विभागकल्पनं तैत्तिरीयसंहितायां तथा ब्राह्मणेषु च यथा स्पष्टं प्रतीयते, न तथान्यब्राह्मणेषु। एतादृशगणशोविभागकल्पनं पश्चात्काले गणतन्त्रराज्यतत्त्वस्य बीजभूतं दृश्यते। काठकसंहितायां "बार्हस्पत्यं चरुं निर्वपेत् सजातकामः। तस्य गणवती याज्यानुवाक्ये स्याताम्। बार्हस्पत्यो वै ब्राह्मणो देवतया स्वामेव देवतां भूयिष्ठेनार्पयति। गणपति-याज्यानुवाक्ये भवतः। सजातैरेवैनं गणिनं करोति" इति पठ्यते। बार्हस्पत्यचरुविषये इयं संहिता मैत्रायणीसंहितावदेव दृश्यते। परं तु ग्रामकामस्थाने सजातकाम इति पठति। अतो ज्ञायते अत्रापि सजातशब्दो ग्रामशब्दपर्याय इति। ग्रामो नाम सजातसमुदाय एव। सजाताश्च गणवन्तः। तादृशसजातप्राप्त्यान्ततो गत्वा जनानामेव प्राप्तिर्भवति गणवती याज्यानुवाक्ये भवतः सजातैरेवैनं गणवन्तं करोतीत्येतत्पदं तैत्तिरीयकठमैत्रायणीसंहितासु समानमेव। सोमयागे प्रायणीयेष्टौ प्रधानयागानन्तरं मारुत्या ऋचोऽनुवचनं विहितम्। तैत्तिरीयसंहितायां तत्र ब्राह्मण एवं पठ्यते (तै.सं. 6-1-53) "मारुतीं ऋचम् अन्वाह। मरुतो वै देवानां विशः। देवविशं खलु वै कल्पमानं मनुष्यविशमवकल्पते मन्मारुतीम् ऋचमन्वाह विशां क्लृप्त्यै" इति। तत्र मरुतां देवविट्त्वं स्पष्टं प्रतिपादितम्। अनेन होमेन देवविशां क्लृप्तिः तदनुसारेण मनुष्यविशां क्लृप्तिश्च ब्राह्मणे प्रतिपाद्यते 'गणशो हि मरुतः' इति ब्राह्मणान्तरे प्रतिपादनात् मरुद्विषये क्लृप्तिः गणशः स्थितिरेव तदनुसारेण कल्प्यमाना मनुष्यविशां क्लृप्तिश्च गणशः स्थितिरेव। अस्मिन् विषये मैत्रायणीसंहितायामपि (3-7-1) किञ्चित्सूचनं दत्तम्। 'मरुत्वत्ती हि पथ्याया ऋचो भवन्ति' इति पथ्यादेवतायागे मारुत्या ऋचो विहिताः। तन्निरूपणावसर एवं प्रतिपाद्यते। देवविशो वै मरुतः देवविशामेवाचीक्लृपत् तां शान्तां क्लृप्तां मनुष्यविश अनुकल्पन्त' इति॥

काठकसंहितायामपि (23-8) एवं निरूपणं वर्तते 'यज्ञमुखं वा एतत् संभ्रियते यत् प्रायणीयं वाक् पथ्यास्वस्तिः यत् पथ्यास्वस्तित्वं यजति वाचमेव तत् संभवेति । प्राणापाना एवाग्नीषोमाभ्यां संभरति । प्रसवा एव सविता इयमदितिः अस्यामधिसंज्ञं मुखं संभरयति । क्लृप्त्यै वा एतत् निरूप्यते यत् प्रायणीयं मरुतां देवविशाः देवविशां वै कल्पमानां मनुष्यविशानुकल्पते । यन्मरुत्वत् याज्यायाः पदं भवति । स्वस्ति राये मरुतो दधातन' इति देवमिशामेव कल्पयति । तां कल्पमानां मनुष्यविशा अनुकल्पत इति । अत्रापि देवविट्सु मरुत्सु कॢप्तिः तदनुसारेण मनुष्यविट्सु कॢप्तिरुक्ता । तैत्तिरीयसंहितायामेव गणशब्दसम्बन्धीनि कानिचिदुदाहरणानि प्रदर्शयामः । "वैश्वानरं द्वादशकपालं निर्वपेत् । मारुतं सप्तकपालं ग्रामकामः । आहवनीये वैश्वानरमधिश्रयति । गार्हपत्ये मारुतं पापवस्यसस्य विधृत्यै द्वादशो कपालो वैश्वानरो भवति । द्वादशमासाः संवत्सरः संवत्सरेणैवास्मै सजाताꣳश्च्या-वयति । मारुतो भवति मरुतो वै देवानां विशः देवविशैवास्मै मनुष्यविशमवरुन्धे सप्तकपालो भवति सप्त गणा वै मारुतः गणश एवास्मै सजातानवरुन्धे । अनूच्यमान आसादयति विशमेवास्मा अनुवर्त्मानं करोति' (2.2.5.26) इति पठ्यते । 'वैश्वानरो द्वादशकपालः मारुतः सप्तकपालश्च ग्रामकामस्य विहितौ । तत्र ग्रामकामस्य विशां च व्यावृत्तिसिद्ध्यर्थं आहवनीये वैश्वानरस्याधिश्रयणं गार्हपत्ये मारुतस्याधिश्रयणं विहितम् । ग्रामकामस्य ग्रामनेतृत्वेनोत्कृष्टत्वं ग्रामजनानां च पोष्यत्वेनापकृष्टत्वं च मनसि निधायैवोत्कृष्टापकृष्टयोर्मेलन-परिहारार्थं पृथगधिश्रयणं विहितम् । कपालसंख्यां प्रशंसन् ब्राह्मणभाग एवं वदति—वैश्वानरयागस्य द्वादशकपालसङ्ख्याविधिर्दृष्टः । एतद्दशयागकरणेन द्वादशमासपरिमितसंवत्सरेणैव सजाता इमं ग्रामकाममागच्छेयुः इति विवृणोति । तथा मरुतां देवविट्त्वात् मारुतयागकरणेन तत्प्रतिद्वन्द्वी-भूतमनुष्यविशामपि अवरोधो भवतीत्युच्यते । मारुतयागस्य कपाले सप्तसङ्ख्याविधिर्वर्तते । तादृशसङ्ख्यानिरूपणकाले मरुद्गणानां सप्तसङ्ख्याकत्वात् सजातानामप्यवरोधो गणश एवेत्यु-च्यते । अनूच्यमाने आसादनं विधायैतादृशकर्मकरणेन विशोऽनुवर्त्मानो भवन्ति इत्युच्यते । अत्र सजातावरोधो गणश इत्युच्यते । तथाऽन्यत्र "ऐन्द्रमेकादशकपालं निर्वपेत् मारुतꣳसप्तकपालं ग्रामकामः इन्द्रश्चैव मरुतश्च स्वेन भागधेयेनोपधावति । त एवास्मै सजातान् प्रयच्छन्ति ग्राम्येव भवति आहवनीय ऐन्द्रमधिश्रयति सप्तकपालो भवति । सप्तगणा वै मरुतः गणश एवास्मै सजातान् अवरुन्धे । अनूच्यमान आसादयति विश एवास्मा अनुवर्त्मानं करोति'' (2-2-11-51) । अत्रापि सजातानां अवरोधो गणश एवेति प्रतिपाद्यते । अग्निचयने वैश्वानरयागानन्तरं मरुद्गणानां यागो विहितः । इदं चाग्नीषोमीयेऽहि क्रियते । तत्रैवं पठ्यते । राष्ट्रं वै वैश्वानरः विण्मरुतः वैश्वानरꣳहुत्वा मारुतान् जुहोति मरुतो वै देवानां विशः । देवविशैवास्मै मनुष्यविशमवरुन्धे सप्त भवन्ति सप्त गणा वै

मरुतः गणश एव विशमवरुन्धे । गणेन गणमनुधृत्य जुहोति विशमेवास्मै अनुवर्त्मानं करोति । इत्यत्र सजातद्वारा गणशो विभक्तानां जनानामवरोध उच्यते । गणश एव विशमवरुन्ध इति प्रजासु वर्तमानो गणशो विभागश्च साक्षादुक्तः । चातुर्मास्ययागे राजसूयप्रकरणे श्रूयमाणे मरुतां यागोऽन्तर्भावितः । तत्र मरुद्यागनिरूपणावसरे तद्गतसप्तसङ्ख्याम् एवं प्रशंसति ब्राह्मणभागः—'सप्त कपालो भवति । सप्त गणा वै मरुतः । गणश एवास्मै विशं कल्पयति' इति वदति । अत्र प्रजासु वर्तमानो गणशो विभागः साक्षादेव प्रतिपाद्यते । चातुर्मास्ययागस्य सर्ववर्णसाधारणत्वेऽपि अत्र राजसूययागान्तर्गतचातुर्मास्यस्य राजसंबन्धित्वं सुस्पष्टमेव प्रतिपादितम् । अतः साक्षाद्राजसम्बन्धे वा ग्रामसम्बन्धे वा प्राजानां गणशो विभागः स्पष्टं प्रतिपाद्यते । सजातानामपि प्रतिपाद्यमानो गणशो विभागोऽन्ततो गत्वा प्रजास्वेव अवतरति । अतो वेदकाले राजतन्त्रतत्त्वरीत्या प्रजा गणशो विभक्ता इति सिद्धम् ॥

॥ ग्रामः सजाताश्च ॥

वैदिकराजतन्त्रे "ग्रामः" "सजातः" इत्यनयोर्निर्देशयोः अन्यादृशं प्राधान्यं वर्तते । एतयोर्निर्देशयोर्जनतन्त्रतत्त्वेन वर्तमानसम्बन्धः सर्वथावधानार्हः । ग्रामसजातशब्दौ परस्परसम्बद्धौ । ग्रामशब्दस्य सजातानां समूह एवार्थः । तथा सजातानां समूह एव ग्रामशब्दस्यार्थः । सजातानां राजतन्त्रे प्रधानभूतराजग्रामणीतत्त्वाभ्यां सह सुश्लिष्टः सम्बन्धो वर्तते । अपरुद्धस्य राज्ञः पुनः संस्थापनार्थायामिष्टौ विशामवरोध उक्तः । अन्यत्र "गणश एवास्मै सजाताननुकान् करोति" इति च प्रतिपादितम् । "तस्माद्ग्रामणीः सजातैः पर्यूढः" इति च । विघननामको यागः प्रजाभ्यो राज्ञोऽपचितिसम्पादनार्थं विहितः । तत्र "व्यतिषक्तो वै ग्रामणीः सजातैः" इति श्रूयते । अथर्वसंहितायां चापरुद्धस्य राज्ञ आह्वानार्थेषु मन्त्रेषु सजातानां प्रस्तावो वर्तते । तथा तत्रैवान्यत्र सजातसम्बन्धिप्रार्थनापि दृश्यते । परं त्वाधुनिकाः पाश्चात्या अस्मदीयाश्च ग्रामसजातशब्दयोः प्राधान्यं सर्वथा विस्मृतवन्तः । इमौ निर्देशौ आधुनिकानां दृष्टिपथमेव नायातौ । अथाप्येतयोर्निर्देशयोर्विमर्शनेन वैदिकराज्यतन्त्रसम्बद्धा बहवो विषयाः प्रकाशं प्राप्स्यन्तीति अस्माकमाशयः । सजातो न राजा । अपि तु जनेष्वन्यतमः । तथा ग्रामोऽपि जनानां समुदाय एव । अतोऽनयोर्निर्देशयोर्जनतन्त्ररीत्यैव मुख्यत्वमस्तीति निश्चिनुमः । तत्र प्रथमं ग्रामशब्दसम्बन्धिविषयान् निरूप्य तदनन्तरं सजातशब्दसम्बन्धिविषयान्निरूपयामः ॥

॥ ग्रामः ॥

अयं च निर्देशः ऋग्वेदादारभ्य प्रवृत्तः । अयं च प्राचीनतमो वैदिकः शब्दः । अस्य शब्दस्य प्रथमं जनसमुदाय एवार्थ आसीत् । इतस्ततो गच्छन्तो जनाः "ग्राम" शब्देन प्रतिपादिताः । यदा च जना एकस्मिन् प्रदेशे स्थिरवासं कर्तुं प्रवृत्ताः तदा स्ववासस्थानस्यापि ते तन्नाम दत्तवन्तः । अतः किञ्चित्कालात्परं ग्रामशब्दो जनावासस्थानमपि निर्देष्टुमुपयुक्तः । ब्राह्मणेषु ग्रामशब्दः सजातसमुदाये प्रयुक्तः । वेदेषु कुत्रचित् ग्रामशब्दो जनसमुदायपरत्वेन प्रयुक्तः ; अन्यत्रापि प्रदेशपरत्वेनापि । आचार्यसायणोऽपि ग्रामशब्दस्यार्थद्वयपरत्वं तत्र तत्राङ्गी-करोति । प्राचीनतमे हि काले स्ववासस्थानलाभार्थं जना इतस्ततः सञ्चरन्त आसन् । तस्मिन् काले तादृशानां जनानां राजा वा राज्यं वा नासीत् । परं त्वेकं पुरुषं पुरस्कृत्य ते सञ्चरन्त आसन् । तस्यैव ग्रामणीः इति नाम । इतस्ततः संचरन्तो जना यदा वा तादृशान्यजनैः साकं सङ्घर्षं प्राप्ताः तदा ते युद्धमपि कृतवन्तः । अतश्च ग्रामशब्दस्य योद्धृजनपरत्वमपि कल्पितमासीत् । संग्राम· इत्ययं शब्दो युद्धपरत्वेन पश्चात् प्रयुक्तः । स च ग्रामयोर्ग्रामाणां वा सङ्घर्षमेव वदति । अत एव ग्रामशब्दवत् सङ्ग्रामशब्दोऽपि प्राचीनतम इति प्रतिभाति । वेदेषु श्रूयमाणग्रामशब्दस्यार्थनिर्णयकाले इदानीं ग्रामशब्दस्य प्रसिद्धतया योऽर्थो गृहीतः स विस्मर्तव्यः । स्मृतीतिहासपुराणेष्वपि प्रायो ग्रामशब्दोऽन्यस्मिन्नेवार्थे प्रयुक्तः । सोऽपि न मनसि कर्तव्यः । सर्वेषु वेदभागेषु सामान्यतया जनपरतया अथ वा जनावासस्थानपरतयैव ग्रामशब्दः प्रयुक्तः । नगरप्रतिद्वन्द्वितया नायं ग्रहीतव्यः । नगरशब्देन हि उत्कृष्टसंस्कृतिमतां जनानां महद्वासस्थानमुच्यते । तथा ग्रामशब्देनापकृष्टसंस्कृतिमतां जनानां न्यूनवास-स्थानमुच्यत इति च प्रथा वर्तते । यद्यपीदं वेदानन्तरकालभाविषु स्मृतीतिहासपुराणादिषु सम्भाव्यते, परं तु वेदेषु नायं नियमो दृश्यते । यजुर्ब्राह्मणकाले ग्रामशब्दः सजातसमूहवाची समभवत् । नगरप्रतिद्वन्द्वितया न वेदेषु गामशब्दः प्रयुक्तः, अपि त्वारण्यप्रतिद्वन्द्वितयैव ग्रामशब्दः प्रयुक्तः । मनुष्याणां वासस्थानं ग्रामशब्देन प्रतिपादितम् । मृगाणां वासस्थान-मरण्यशब्देनोक्तम् । ये ग्रामाः, यदरण्यां (अथर्व. 13-1) ग्राम्याः पशवः, आरण्याः पशवः, ग्राम्या ओषधयः, आरण्या ओषधय इति च । अतश्च सर्वेषु वेदभागेषु ग्रामशब्दः केवलजनावास-स्थानपरतयैव प्रयुक्तः ; न नगरप्रतिद्वन्द्वितया इत्यङ्गीकर्तव्यं भवति ॥

वैदिककोशकर्तारो ग्रामशब्दव्याख्यानावसरे ब्राह्मणेषु श्रूयमाणग्रामशब्दस्यापि विवरणं कुर्वन्ति । तैरेवैवं निरूपितम्—ग्रामशब्दोऽल्पमेव जनावासस्थानं प्रतिपादयति । अत्र बहूनि

(कुलानि (कुटुम्बकाः) आसन् । परं त्वेकजातीयकुलानां सर्वेषामस्तित्वं न प्रतीयते । एकजातीयजनेषु कानिचिदेव कुलान्यासन् । ग्रामे च क्षेत्रपतित्वं न प्रत्येकजनस्य, अपि तु कुलस्यैव । ग्रामभूमिषु राज्ञ एव स्वामित्वात् ग्रामकामेष्टिं येऽकुर्वन् तेषां राज्ञ अधिकारो दत्तः । तेषां च न ग्रामक्षेत्रेष्वधिकारः । क्षेत्रादुत्पन्नद्रव्येष्वेवाधिकारः । कर्षकाः स्वैरुत्पादितात् द्रव्यात् किञ्चिद्दत्तवन्तः । तन्न सङ्गतम् । ग्रामेष्टिकर्तुर्न कुत्रापि क्षेत्रप्राप्तिर्वा क्षेत्रस्य सस्ये भागित्वं वा श्रूयते । ग्रामकामेष्टिप्रतिपादकब्राह्मणेषु "सजातान् प्रयच्छन्ति, ग्राम्येव भवति" इति सजातप्राप्तिरेत्र फलत्वेन प्रतिपादिता । सजाताश्च ये केऽपि वा भवन्तु । नात्र क्षेत्रप्रस्तावः । क्षेत्रधान्येषु वा भागित्वप्रस्तावः । इदं च सत्यम्, यदाधुनिके काले ब्राह्मणेभ्यो राजानो ग्रामदानमकुर्वन् । ग्रामदानेन प्रतिग्रहीतॄणां ग्रामक्षेत्रेभ्य उत्पद्यमानधान्येषु भागित्वं भवतीति । नायं विषयो वेदकाले संभवति । तत्कालावस्थितेरन्यादृशत्वात् । ग्रामदानमेव वेदे न प्रसिद्धम् । सुतरामुत्पद्यमानद्रव्ये भागित्वं न संगच्छते । ग्रामशब्दो वेदे जनसमुदायतद्वासस्थानोभयत्रवाची । क्षेत्रशब्दश्च ग्रामशब्दाद्भिन्नः । ग्रामकाम इतिवत् क्षेत्रकाम इति पृथगपि श्रूयते । येषां क्षेत्राणि न सन्ति तेषामत्राधिकारः । क्षेत्रकाम इति स्पष्टमेव जैमिनीयब्राह्मणे श्रूयते । "अथाऽब्रवीत् पृथुरश्मिः क्षेत्रकामोऽहमस्मि, तस्मै क्षेत्रं प्रायच्छत्" (जै. ब्रा. 1-1861) इति । तथा "क्षेत्रस्य पतिना वयम् हितेनाव जयामसि" (4-5-7-1) "क्षेत्रस्य पते" (सं. 1-112-22) इत्यादिषु ग्रामशब्दाद्भिन्नमेत्र क्षेत्रपदं प्रथितम् । ग्रामस्य सस्योत्पादकप्रदेशस्यैव क्षेत्रमिति नाम । "क्षैत्रपत्यं चरुं निर्वपेत् जनतामागत्य । इयं वै क्षेत्रस्य पतिः । अस्यामेव प्रतितिष्ठति" । (तै. सं. 2-2-1-4) इति ग्रामाद्भिन्न एव क्षेत्रव्यवहारः ॥

इतः परम् ऋक्संहितायां तत्र तत्र श्रूयमाणग्रामशब्दमादाय विमर्शं कुर्मः ॥

'स ग्रामेभिः सनिता" (ऋक्सं. 1-100-10)। अत्र ग्रामदातृत्वमिन्द्रस्योच्यते । ग्रामशब्दस्य च वासस्थानपरत्वं वक्तुं शक्यते । परं तु सायणो मरुद्ग्रामपरत्वं व्याचख्यौ । "यस्य ग्रामाः" (ऋक्सं. 2-16-7) । अत्रेन्द्रस्य महिमा प्रतिपाद्यते । बहवो ग्रामा इन्द्रस्य वर्तन्त इति । "गव्यन्ग्राम इषितः इन्द्रजूतः" (ऋक्सं. 3-33-11) अत्र ग्रामशब्दस्य जनसङ्घपरत्वं प्रतीयते । गव्यन् ग्राम इति विशेषणात् गा आत्मन इच्छन् जनसमूहोऽत्र ग्रामशब्दस्यार्थः । अनेन ज्ञायते गोहरणार्थं जनसमूह इतस्ततः पर्यटन्नासीदिति । किं चात्र श्रूयमाणग्रामशब्दस्य योद्धृजनसमुदायपरत्वमपि प्रतीयते । "ग्रामजितः" (ऋक्सं. 5-55-8) इति मरुतो विशिष्यन्ते । अत्र जनसङ्घपरत्वं देशपरत्वमुभयमपि संभवति । सायणस्तु सङ्घपरत्वमेवाह । "अपश्यं ग्रामं वहमानमारात्" (ऋक्सं 10-27-19) । अत्र ग्रामशब्दः

सङ्घपरः । सायणव्याख्यापि सङ्घपरत्वे सङ्गच्छते । यतो ग्रामं वहमानमिति दृश्यते । अतो जनसङ्घपरत्वं संभवत्येव । "कथा ग्रामान्न पृच्छसि" (ऋक्. सं. 10-146-1) । अत्र ग्रामशब्दः स्पष्टं देशमेव प्रतिपादयति । "गा इव ग्रामं युयुधुरिवाश्वान्" (ऋक्सं. 10-149-4) अत्र ग्रामशब्दो देशपर एव । "निग्रामासु अविक्षत" (ऋक्सं. 10-127-5)। अत्र शेरत इति प्रतिपादनात् जनसमुदायपरत्वमेव । अतश्च ग्रामशब्दस्य जनसमुदाय-देश-उभयपरत्वम् ऋक्संहितारीत्या गम्यते । ग्रामणीपदमपि ऋग्वेदे दृश्यते । "सहस्रदा ग्रामणीः" इति ग्रामनेतृत्वमप्यत्र प्रतिपादितम् । मनोर्ग्रामणीत्वम् ऋग्वेदे उक्तम् । यजुः-संहितासु श्रूयमाणाधानमन्त्रेष्वपि मनोर्ग्रामणीत्वं प्रतिपाद्यते । "मनोस्त्वा ग्रामण्यो व्रतयते व्रतं नादधामीति" "वैश्यस्येति" । अथर्ववेदे पुनर्ग्रामशब्दप्रस्ताव एवं दृश्यते । 'पिशाचाः तस्मान्नश्यन्ति यमहं ग्राममाविशे' (अथर्व. सं. 4-36 7) "ग्राममवपद्यमानम्" (अथर्व. सं. 5-17-4) "अस्मै ग्रामाय प्रदिशश्चतस्र." (अथ. सं 6 40-2) "ये ग्रामाः यदरण्यं" (अथ. सं. 12-1-50) "निर्वहतग्रामार्दितः" (अथ. सं. 8-2-27) "हित्वा ग्रामान् प्रच्युता यन्तु शत्रवे" (अथ. सं. 5-20-3) "येमंसजग्रामे अश्वेषु गोषु" (अथ. सं. 4-22-2) "त्रयन्यतामस्मिन् ग्रामे गामश्वं पुरुषं पशुम्" (अथ. सं. 8-7-11) । ग्रामजित् इति व्यवहारोऽपि तत्र तत्र दृश्यते । अत्र श्रूयमाणग्रामशब्दस्य जन-तद्वासस्थानो-भयपरत्वमपि सङ्गच्छत एव । इतस्ततः सञ्चरन्तो जना अन्यसमुदायम् अथवा अन्यसमुदायस्य प्रदेशं वा जितवन्त इति वक्तुमवकाशोऽस्त्येव । काठकसंहितायां "यथा ग्रामः संग्रामाद्विसृजते" इति श्रूयमाणं निरूपणं ग्रामस्य युद्धान्निवृत्तिमेव प्रतिपादयति । गव्यन् ग्राम इति कुत्रचिच्छ्रूयते । तत्रापि ग्रामशब्द इतस्ततः संचरज्जनसमुदायपर एव । गोग्रहणार्थं जनाः सञ्चरन्त आसन्निति ऐतिहासिका अपि वर्णयन्ति ॥

ब्राह्मणेष्वपि केषुचित् स्थलेषु ग्रामशब्दस्य प्रदेशपरत्वमस्तीति ज्ञायते । प्राच्यदिशि "ग्रामात् अछदिर्दर्शे" (तै-आ-2) । अत्र ग्रामशब्दः प्रदेशपर एव । ग्रामस्य च्छदिषां प्रस्तावात् । "विदूरं ग्रामयोर्ग्रामान्तौ स्याताम्" (तै. ब्रा, 3-9-12) । अत्र ग्रामयोः सीमा सूच्यते । "ग्रामे मनसा स्वाध्यायमधीयीत" "स यथा नाना ग्रामौ मित्राणि व्यतिषज्य अभय आसीयाताम् तादृक् तत्" (जै. ब्रा) । "कनीयान् ग्रामो ज्यायांसं प्रति सँयतते" (जै. ब्रा. 1--195) । एतेषु स्थलेष्वपि ग्रामशब्दस्य देशपरत्वं प्रतीयते । अतोऽत्र ग्रामशब्दो निवासस्थानपर एव । जैमिनीयब्राह्मणे महाग्राम इति व्यवहारो वर्तते । छान्दोग्योपनिषदि ग्रामाद्ग्रामं पृच्छन्निति निर्देशः प्रदेशपर एव । "यत्र वै श्रेष्ठी ग्रामाद् ग्रामं प्रतिपद्यते न वै तत्रारिष्टमस्ति" (जै. ब्रा. 1-304) । "तस्मादेकैको ग्रामेऽधि-गम्यते । अतो अरण्येदुतं ग्राममेव अभियन्ति" (जै. ब्रा. 1-90) इत्यादिष्वपि ग्रामशब्दः

प्रदेशपर एव । परं तु यजुर्ब्राह्मणेषु ग्रामकामस्य यथा यागा विहिताः तथा सामवेदीयब्राह्मणेषु जैमिनीयादिषु ग्रामकामस्य प्रयोगोऽपि विहितः । एतादृशेषु स्थलेषु ग्रामशब्दस्य न प्रदेशपरत्वम्, अपि तु जनसमुदायपरत्वमेव । विशिष्य निर्णये सजातसमुदायपरत्वमेव भवति । ग्रामकामस्य विहिताया इष्टेः फलप्रतिपादनकाले सजातप्राप्तिमेव ब्राह्मणवाक्यं प्रतिपादयति । ग्रामकामस्य यागं विधाय फलप्रतिपादनावसरे "सजातान् प्रयच्छन्ति ग्राम्येव भवति" इति श्रूयते । सर्वथा "ग्रामकामः" इति श्रूयमाणेषु ब्राह्मणवाक्येषु ग्रामशब्दस्य जनसमुदायपरत्वमेवाङ्गीकार्यं भवति । मन्त्रब्राह्मणेषु श्रूयमाणग्रामशब्दस्यार्थमन्यथा कृत्वा ऐतिहासिकपद्धतिमनुसरद्भिर्महान् कोलाहलः कृतः । तेषां मते ग्रामशब्दस्यापकृष्टसंस्कृतिमज्जनसमुदायवासस्थानमेवार्थः । नगरप्रतिद्वन्द्वितयार्वाक्कालेषु दृश्यमानग्रामपदप्रयोगं मनसि कृत्वा ते ग्रामशब्दं विवृण्वन्ति । एवं हि ते वदन्ति—वेदकालीना जना ग्रामेष्वेवावसन् । विशिष्य ऋग्वेदकाले जना ग्राम एवावसन् । तेषां न नगरमासीत् । ते ग्रामीणा एव, न नागरिकाः । ग्रामिणां संस्कृतिमेव तेऽनुसृतवन्त इत्येतादृशमपसिद्धान्तं मनसि कृत्वा सिन्धुप्रदेशे प्राचीनतमे काले नागरिकसंस्कृत्यां येऽवसन् ते न आर्या भवितुमर्हन्ति इति सुधीरमुद्घोषयन्ति । तेषां सिद्धान्तो निर्मूल इति वयं ब्रूमः । सिन्धुप्रदेशे ये जना आसंस्ते आर्या वा अनार्या वा भवन्तु । नैतन्निरूपणेऽस्माकं नैर्भर्यं वर्तते । वेदेषु प्रयुज्यमानो ग्रामशब्दो नापकृष्टसंस्कृतिमज्जनसमुदायवाचीत्येव वयं ब्रूमः ॥

पश्चात्काले नगरशब्देन योऽर्थः प्रतिपादितः स एव ऋग्वेदे अन्यवेदेषु वा ग्रामशब्देन प्रयुक्तः । पश्चात्काले हि नगरशब्देन महाजनानां वासस्थानमुच्यते । न केवलं जनसङ्ख्यायां महत्त्वं नगरस्य । अपि तु संस्कृत्यामपि ग्रामजनापेक्षया नगरे वर्तमाना उत्कृष्टा इति दृश्यन्ते । ग्रामे हि वर्तमानाः जनाः प्राचीनतमकालीनसंस्कृतिमनुसरन्तो नगरवासिजनापेक्षया संस्कृत्या अपकृष्टा वर्तन्ते । जनसङ्ख्यायां च ग्रामेषु न्यूनता दृश्यते । एतादृशनगरग्रामविभागो वेदकालादर्वाचीन एव काल उत्पत्तिं प्राप्त इति दृश्यते । एतादृशविभागं पुरस्कृत्य वेदेषु ग्रामशब्दार्थनिरूपणं न समञ्जसम् । न कुत्रापि वेदेषु नगरप्रतिद्वन्द्वितया ग्रामशब्दः प्रयुक्तः । वेदे श्रूयमाणस्य ग्रामशब्दस्य "विलेज्" (village) इति व्याख्यानं सर्वथा विपरीतमेव । एतादृशान्यथाज्ञानं पुरस्कृत्य कैश्चिदाधुनिकैः इदमपि प्रतिपादितम्, यद्वेदकालीना आर्या अपकृष्टसंस्कृतिमन्तो भारतदेशं प्राप्यात्र वर्तमानजनेभ्यः स्वापेक्षयोत्कृष्टसंस्कृतिमन्नागरिकजनेभ्यो नागरिकसंस्कृत्यां शिक्षां प्राप्ता इति । इदमप्यसङ्गतमेव । आर्या भारतदेशमन्यदेशात् प्रविष्टा वा न वा इति विचारान्तरमेव । इदं च सुनिश्चितम्, यत् ऋग्वेदकालीना जना नापकृष्टसंस्कृतिमन्तः, नापि तेषामन्येभ्यो जनेभ्यः संस्कृत्यां शिक्षापेक्षा आसीत् । ऋग्वेदसंस्कृतिः अत्यन्तमुत्कृष्टैव अन्यनिरपेक्षैव सा

कालक्रमेण परिणामं प्राप्ता । तावता ते अन्येभ्य एव जनेभ्यः संस्कृत्यां शिक्षां प्राप्ता इति वक्तुं नावकाशोऽस्ति । तथा ग्रामशब्दोऽपि पूर्वं व्याख्यातः । अथ चाधिकं किञ्चिदुच्यते । (Zimmer) जिम्मर्-महाशयमतानुसारेण ग्रामशब्दः कुलजनशब्दयोर्मध्ये वर्तते । कुले हि एकमूलपुरुषवन्तो जना वर्तन्ते । जनशब्देन पुनर्बहुकुलसम्बन्धिनः अथाप्येकजातीयजना उक्ताः । तयोर्निर्देशयोर्मध्ये वर्तमानग्रामशब्दो जनापेक्षया न्यून एव अनेककुलसमुदायं वदतीति तस्याशयः । परं त्वेतादृशविभागे मूलं न पश्यामः । एकस्मादेव जनसमुदायात् ग्रामः समजनीति सुस्पष्टं निरूपयितुं प्रमाणं नास्ति । "गच्छन्त" इति ग्राम इति व्युत्पत्त्या परं केचन जना इतस्ततः संचरन्त आसन्निति कल्पयितुमवकाशोऽस्ति (Hopkins) होप्किन्स्महाशयः ग्रामशब्दस्य पशुपरत्वं वदति । ग्रामशब्दः पशूनेव गृह्णाति इति स वदति । परं तु नेदं संगतम् । ब्राह्मणे ग्रामकामस्य इष्टिर्यागश्च विहितः । तत्रेष्टिकरणेन वा यागकरणेन वा किं फलं भवतीति निरूपणावसरे न पशूनां प्रस्तावोऽस्ति । "सजातान् प्रयच्छन्ति ग्राम्येव भवति" इति हि तत्र तत्र श्रूयते । न हि सजाताः पशवः, किं च ग्राम्याः पशवः, ग्राम्या ओषधयः आरण्या ओषधय इत्यपि निर्देशो वर्तते । अतो ग्रामशब्दस्य जनवासस्थानपरत्वमेव न्याय्यम्, न पशुपरत्वम् । यथा तथा वा भवतु । ग्रामशब्दो जनसमुदायतद्वासस्थानोभयपर एवेति निश्चितम् । जनसमुदायसञ्चारकाले तत्रैकजातीया एव जना आसन् वा भिन्नजातीया अपि जना इति निश्चित्य वक्तुं न शक्यते । परं त्विदं संभाव्यते, प्रथममेकजातीया एव जना ग्रामत्वं प्राप्ताः सञ्चरन्त आसन् । यदा वा ते अन्यजनान् विजितवन्तः तदा तेऽपि अस्मिन् समुदायेऽन्तर्भाविताः । बहुजातीया अपि जना ग्रामशब्दवाच्यत्वम् प्राप्ता इति । जना यथा भारताः तृत्सव इति व्यवहारं प्राप्ताः न तथा ग्रामा जननाम्ना प्रसिद्धाः । अतश्च तत्तज्जातिनाम्ना व्यवहारो ग्रामत्वावस्थायाः पूर्वकालिको वा पश्चात्कालिको वेति निश्चित्य वक्तुं न शक्यते । उभयथाऽपि संभाव्यत इति अस्माकमाशयः । ग्रामशब्दोऽयं पश्चात्कालेऽपि स्मृतिकारैः सूत्रकारैश्च संरक्षितः । कात्यायनेन पाणिनिना शाकलग्राम उदाहृतः (4-2-106) । ग्रामे ग्रामे कठकालापं इति पतञ्जलिः प्रयुनक्ति । परं तु पौरनगरशब्दावपि जनावासस्थानपरतया तैः प्रयुक्ताविति अवगन्तव्यम् । ग्राम इति व्यवहारो बहुकालपर्यन्तं रक्षित इति निश्चीयते । ग्रीक्देशीया यदा वा सिन्धुं देशं प्रविष्टाः तदा तत्कुलीनग्रामान् दृष्ट्वा विस्मयाविष्टा एव वदन्ति इमे च ग्रामाः नगरसदृशा एव । ग्रीक्देशे नगरशब्देन यद् व्यवह्रियते तादृशीमेव स्थितिमत्र पश्यामः । जनसङ्ख्यायां संस्कृत्यां च पश्चात्प्रदेशस्थग्रामाणामुत्कृष्टत्वात् नेमे ग्रीक्ग्रामसदृशा इति तेऽवदन् । (V. S. Agarval, India Known to Panini) । ग्रामशब्देतिहासपरिशीलनेनेदं भवति ।

प्रथमं ग्रामशब्देन सञ्चरन्तो जना उक्ताः । तदनन्तरं सञ्चरन्तो योद्धृजनाः, तदनन्तरं जनावासस्थानं, तत्पश्चात् सजातजनसमुदाय इति ॥

ग्रामणीशब्दव्यवहारोऽपि ग्रामशब्देन सम्बद्ध इति दृश्यते । यदा वा ग्रामा इतस्ततः संचरन्त आसन् तदायं तेषां नेताभूत् । सञ्चरणकाले हि तेषां न सेना इति नाम, परं तु योद्धार इत्येव ते व्यवहृताः । ग्रामश्च न सर्वदा सङ्घर्षवान्, अपि तु कदाचिदेव । यदा च तादृशजनसमुदाया एकस्मिन् स्थले स्थिरवासं कल्पितवन्तः तदापि ग्रामण्याख्यं स्थानं रक्षितमेवाभूत् । गच्छता कालेन कदाचिद्राजनीत्यां परिणामं प्राप्ताः तदा राजनीत्यामपि ग्रामण्यः स्थान दत्तवन्तः । स्थिरवासप्राप्त्यनन्तरं जना न ग्रामशब्देन गृहीताः, परं तु ....तस्मिन् समये युद्धादिकं कर्तुं सेनाख्यं स्थानमपि कल्पितम् । जनेभ्यो योद्धुकामाः सेनात्वेन कल्पिताः । येषां पुनर्युद्धे इच्छा नासीत् ते च सामान्यजनत्वेन व्यवहृताः । तत्र ग्रामणीः तेषां व्यवहारं रक्षितवान् । सेनानीः परं युद्धार्थं सेनाया नेता अभूत् । अस्मिन् काले युद्धं न परस्परं जनसमुदायेन कृतम् । अपि तु राजद्वारैव । 'राज्ञे प्रोच्य विशं जनंति' इति पञ्चविंशब्राह्मणे श्रूयते । सेनानीग्रामणीस्थानयोः (Civil and Military) सिविल्—मिलिटेरितत्त्वपुरस्कारेण मुख्यत्वमासीत् । ग्रामणीः इदानीं सिविल्-अधिकारी सञ्जातः । सेनानीः मिलिटेरि-अधिकारी संजातः । वैदिकराजतन्त्रपरिणामकाले एतादृशपरिणामो मध्यकालेऽभूदिति अङ्गीकर्तव्यं भवति ॥

ग्रामपदवत् पुरपदमपि आधुनिकैः अन्यथा गृहीतम् । पुरशब्देन महत् जनावास-स्थानमुच्यत इति गृहीत्वा ग्रामप्रतिद्वन्द्वितया इदं गृहीतम् । किं च, पुरशब्देनोत्कृष्टसंस्कृति-मज्जनावासस्थानं गृहीत्वाऽन्यथाप्याधुनिका एवं कल्पितवन्तः । ऋग्वेदकाले आर्याणां पुरो नासन् । अनार्याणामेव पुर आसन् । आर्या अनार्याणां पुरो ध्वंसितवन्त इति कल्पयन्ति । प्रमाणयन्ति चेन्द्रे श्रूयमाणं पुरन्दर इति विशेषणम् । इन्द्रो हि आर्याणां देवः । अस्य पुरन्दरत्वेन विशेषणदर्शनात् आर्या अनार्याणां पुरो विध्वंसितवन्त इति वदन्ति । तथा शम्बरस्यानार्यत्वेन वर्णितस्य शतसङ्ख्याकाः पुर आसन्निति श्रूयते । अतः पुरशब्दविचारोऽपि अत्रावश्यको भवति । ऋग्वेदे यथा ग्रामशब्दः प्रसिद्धः तथा पुरशब्दोऽपि । परं तु पुरशब्दस्य ग्रामप्रतिद्वन्द्वित्वं न श्रुतम् । पुरशब्दो न जनावासस्थाम्, परं तु योद्धुः पुरुषस्य वासस्थान-मेव । इन्द्रः पुरन्दरत्वेन प्रसिद्धः (1-102-7-16-14-16) । शम्बरस्य शतसङ्ख्याकाः पुर आसन्निति ज्ञायते । अत्र पुरशब्देन न नगरस्य ग्रहणम् । जनावासस्थाने नगर इति प्राचीनानां पश्चात्कालिक एव निर्देशः । अतः ऋग्वेदरीत्या नेदं जनानां वासस्थानम् । "आयसी पुरः" इत्ययोमयपुराणामपि प्रस्तावोऽस्ति (ऋ. सं. 4-27-1) । "बृहत्यः

उर्व्यः पुरः प्रतिपादिताः" (ऋ. सं. 1-189-2) । "पृश्च पृथ्वी बहुला न उर्वी" असुराणां तिस्रः पुरो ब्राह्मणेषु प्रसिद्धाः । परं तु एतत्सर्वमपि पुराणां योद्धुः स्थानत्वमेव सूचयति । "शारदीः पुरः" इति (ऋ. सं. 131-4) "पुरो यदिन्द्र शारदीरवातिरः । ताश्च पुरः असङ्ख्यातभोगवत्यः शतभुजिः तमभिद्रुतेः अधात् पूर्भिः रक्षत" (1-166-8) "पूर्भवा शतभुजि" (7-15-14) । अत्र श्रूयमाणस्य शतभुजिशब्दस्य शतसङ्ख्याकद्वारवतीति कैश्चिदर्थो वर्णितः । (Pischel and Geldner) पिशल्-गिल्डनर्प्रभृतिमहाशयौ तु ऋग्वेदे श्रूयमाणपुरशब्दस्य नगरपरत्वमेव वदतः । परं तु ऋग्वेदरीत्या नास्य जनावासपरत्वम् । योद्धृणां वसतिरिति अर्थप्रतिपादनमेव न्याय्यम् इति मन्यामहे । वैदिककोशकर्तारः पुरशब्दस्य नगरम् इत्यर्थं प्रतिषेधन्तः ऋग्वेदकाले जना ग्रामीणामेव संस्कृतिमाश्रितवन्तः । ते च न नागरिका जना इत्यपि वदन्ति । नेदमुचितं भाति । पुरशब्दस्य यः कोऽपि वार्थो भवतु । ऋग्वेदकालीना जना ग्राम्यजनानां संस्कृतिमाश्रितवन्त इत्यत्र प्रमाणं न दृश्यते । ऋग्वेदे श्रूयमाणस्य ग्रामशब्दस्य न प्राचीनसंस्कृतिमज्जना अर्थ इति पूर्वमेव प्रतिपादितम् । तथा पुरशब्दस्यापि ऋग्वेदपश्चात्काले विशेषतः पुराणकाले यादृशोऽर्थः न तादृशः ऋग्वेदकाले । पुराणकाले हि पुरो ग्राम इति व्यवहारः । पुरवर्तिनां जनानां ग्रामवर्तिनां जनानां च भेदं प्रतिपादयितुम् एवं निर्देशः कृतः । तद्रीत्या पुरे वर्तमाना जना उत्कृष्टसंस्कृतिमनुवर्तन्त इत्यपिं च ज्ञायते । ऋग्वेदे पुनः पुरशब्दस्य न जनावासस्थानपरत्वं, अपि तु योद्धृस्थानपरत्वमेव । ऋग्वेदादर्वाचीनकाल एव पुरेष्वपि जनानां वासार्थं स्थानं दत्तमिति ज्ञायते । तच्चार्वाक्काले राजधानी-शब्देनोक्तम् । सर्वथा ऋग्वेदे श्रूयमाणः पुरशब्द आत्मरक्षणार्थं योद्धृभिरादृतं स्थानमेव (Rampart) सूचयति । पुराणकाले च ग्रामप्रतिद्वन्द्वित्वेन पौरजानपद इदि स्थानद्वयं प्रतिपादितम् । पुरशब्देनोच्यमानं स्थानं सर्वतः प्राकारै रक्षितं राज्ञा अधिष्ठितं च । तत्रापि जनानामावासः अभूदिति ज्ञायते । तथा जनपद इति स्थानान्तरं च निर्दिष्टम् । परं त्वत्र न प्राकारादिकमभूत् । जना एवासन् इति ज्ञायते । पुराणेषु श्रूयमाणस्य ग्रामशब्दस्य यद्यप्येतत् प्रतिद्वन्द्वित्वं समुचितम्, किं तु नायं विषयः ऋग्वेदे संभवति । पुरग्रामयोर्न प्रतिद्वन्द्वित्वम् । अर्वाक्कालीनसंस्कृतिग्रन्थेषु पुरग्रामयोः श्रूयमाणं प्रतिद्वन्द्वित्वं मनसि निधाय वेदे तथा व्याख्यानं सर्वथा अनुचितमेव । ग्रामशब्द एव वेदकाले जनावासस्थानं प्रतिपादयति इत्यत्र न कोऽपि सन्देहः । पुरशब्दस्य योद्धृसम्बन्धो ब्राह्मणेष्वपि संरक्षितः । "एना देवपुराः" (तै. सं. 7-2-5-4) (तै. ब्रा. 1-7-7-5) "संवत्सरः खलु वै देवानां पूः ।" (तै. सं. 6-2-3-1) "तिस्रः पुर आसन्" (तै. सं. 6-2-3-1) इति । यजुर्ब्राह्मणेषु (3-4-4-3)-शतपथ-तैत्तिरीय-(3-8-1)-मैत्रायणीय-(24-10)-काठककापिष्ठलकठादिषु महा-पुराणां प्रस्तावोऽस्ति । उपसदाख्या इष्टिः असुरपुरजयार्था इति तत्र तत्र प्रतिपादितम् ।

"उपसदा वै महापुरं जयन्ति" इति । अत्रोपसच्छब्दः योद्धृभिः क्रियमाणं परपुरबाधनं प्रतिपादयति । महापुरप्रस्तावः उपसदा तस्य जयार्थं प्रतिपादितः शतपथब्राह्मणे । अन्यत्रैवं श्रूयते (6-3-25) "परिवहि पुरः आग्नेयीभिः, अग्निपुरामेवास्मै एतत्करोति । सा ह एषा अग्निपुरा दीप्यमाना तिष्ठति । तिसृभिः त्रिपुरमेवास्मै एतत्करोति । तस्मादु ह एतां पुरां परमं रूपं यत्र पुरः" इति । गोपथब्राह्मणे (2-2-7) दशरात्रनामा यज्ञो देवपुरत्वेन प्रतिपादितः । जैमिनीयब्राह्मणेऽपि एवं पठ्यते—"देवपुरा कापयदुण्णिहः—ता यदन्तः क्रियन्ते । देवपुरा मे वै तदन्ततः परिहरन्ति । पशूनां गुप्त्यै असुराणाम् अनश्यत्वास्ति ।" ऐतरेयब्राह्मणे उपसत्प्रकरण एव पुरप्रस्तावोऽस्ति । "देवा असुरा इमानेव लोकान् पुरोऽकुर्वत चाराय" (1-2-27) । अत्र पुरे पशूनां रक्षणं शत्रुभिरप्रवेश्यत्वं च सूच्यते । उपसदा वै महापुरं जयन्ति इत्ययमंशोऽत्रापि प्रतिपाद्यते । (ऐ. ब्रा. 1-2-3) अतश्च ब्राह्मणकालेऽपि पुरशब्दस्य (Rampart) योद्धृस्थानपरत्वमेवार्थ इति निश्चीयते ॥

बलवतामिदं स्थानमिति स्पष्टमैतरेये "असुरा इमानेव लोकान् पूरो कुर्वत यथौजीयांसो बलीयांस एव" (1-23) ।

अथर्ववेदेऽपि पुरप्रस्तावोऽस्ति । "देवानां पूरयोध्या" "पुरं यो ब्राह्मणो वेद" "पुरं हिरण्मयीं ब्रह्म विवेश पराजिता" इति श्रूयते । "तां पुरं प्रैमि" इति सप्तवारं श्रूयते । "पुरं प्रणयामि व." इति दशवारं श्रुतम् । अत्रापि पुरशब्दो योद्धृरक्षणार्थं निर्मितं स्थानमेव वदति इति ज्ञायते । पुरं प्रैमीत्यत्रान्यपुरप्रवेशः स्वसामर्थ्यप्रतिपादनार्थः । पुरं प्रणयामीत्यत्र रक्षणार्थं कॢप्तं स्थानं नयामीत्यर्थः प्रतिपाद्यते । हृदयदहराकाशस्य ब्रह्मपुरत्वम् अथर्ववेदेऽपि प्रतिपाद्यते । छान्दोग्योपनिषदि (8-5-3) वैकुण्ठस्यापराजितपुरत्वमुच्यते । (अपराजिता पूः ब्रह्मणः) । कठोपनिषदि श्रूयमाणम् "पुरमेकादशद्वारम्" (कठ.उ.2-2-1) "अष्टाचक्रा नवद्वारा देवानां पूरयोध्या" (तै. आ. 1-26) पुरे बहूनां द्वाराणां सत्त्वमष्टभिः प्रकारैः परिवेष्टितत्वं च वदति । अतश्च मन्त्रकाले ब्राह्मणकाले च पुरशब्दोऽन्यैः प्रवेष्टुमशक्यं योद्धृभिः आत्मरक्षणार्थं च कल्पितं स्थानं प्रतिपादयति । राज्ञः पुरस्य च कः सम्बन्ध इति स्पष्टं न प्रतीयते । पूः पतिरिति निर्देशः ऋग्वेदे वर्तते । "मित्राय वो न पूर्पतिं" । (1-127-10) अत्र पूर्पतिं यथा पूजयन्ति इति प्रतिपाद्यते । "मित्राय वः" इति पूर्पतिना सहान्येषां मैत्रीच्छापि सूच्यते । पूर्पतिस्थानं राजापेक्षया अधमं भिन्नं च स्थानम् । तथा पुरीशब्दोऽपि "अमृतेनाऽवृतां पुरीं" इति श्रूयते ॥

॥ जनपदं जनता जनम् ॥

नगरम्

ब्राह्मणभागेषु जनावासस्थानपरत्वेन नूतनाः शब्दाः प्रयुक्ताः- जनपदं--जनता-जनम् इति । एवंविधो निर्देशो बहुलमुपलभ्यते । नगर इति निर्देशश्च द्वित्रिस्थलेषु दृश्यते । तैत्तिरीयारण्यके "नैतमृषिं विदित्वा नगरं प्रविशेत् । यदि प्रविशेत् । मिथौ चरित्वा प्रविशेत्" (तै.आ. 1-11-8) इत्युच्यते । अत्र नगरशब्दो जनावासस्थानमेव प्रतिपादयति । विद्यानिष्ठस्य नगरप्रवेशप्रतिषेधश्च श्रूयते । प्रवेशावश्यकतायां रहःप्रवेशश्च प्रतिपाद्यते । अनेन तत्तत्प्रतिपाद्यमानं जनावासस्थानं विलक्षणमिति दृश्यते । अन्यत्रापि "सँहार्यं नगरं तव" (तै. आ. 1-31-4) इति नगरप्रस्तावोऽस्ति । जैमिनीयब्राह्मणे केषांचित् ऋषीणां नागरी इति विशेषणं दत्तम् । अनेन केषाञ्चिदृषीणां नगरवास आसीदिति ऊहस्यावकाशोऽस्त । अर्वाचीनग्रन्थेषु नगरशब्दः सुप्रसिद्धः । ग्रामप्रतिद्वन्द्वितया च प्रयुक्तः । नागरिक इति व्यवहारोऽपि नगरवासिनां दृश्यते । तत्प्रतिद्वन्द्विभूतग्रामवासिनां ग्रामीण इति व्यवहारो वर्तते । नगरवासिनश्चोत्कृष्टसंस्कृतिमन्तः । ग्रामवासिनश्चापकृष्टसंस्कृतिमन्त इति च भेदः कल्पितः । परं तु नगरशब्दप्रयोगो द्वयोरेव स्थलयोः प्रयुक्तः । अनेनायं प्रयोगो वेदकालसमाप्तिदशायां प्रारब्ध इति गम्यते । परं तु इमं भेदं पुरस्कृत्य ग्रामनगरभेदकल्पन वेदेष्वनुचितमेवेति पूर्वमेवोक्तम ॥

जनपद-जनता-जन इति निर्देशत्रयमपि सुस्पष्टमेव जनावासस्थानं प्रतिपादयति । किमिमे निर्देशा ग्रामशब्दप्रतिद्वन्द्वीभूताः, अथ वा ग्रामस्थान एवागताः नूतना एव निर्देशा इति न स्पष्टं प्रतीयते । जनपदादिनिर्देशेषु जना बहुलतया वर्तन्त इति परं प्रतीयते । अर्वाचीनग्रन्थेषु पौरजानपदानिति पुरप्रतिद्वन्द्वितया जनपदप्रयोगः कृतः । स्मृतिषु च जनपदप्रस्तावोऽस्ति । परं तु न वेदेषु जनपदादीनां ग्रामप्रतिद्वन्द्वितया निर्देशो वर्तते । ग्रामपदस्थाने इमे निर्देशा नूतनतया कल्पिता इत्यूहस्यावकाशोऽस्ति । जनपदादिषु महान् जनसमुदायो वर्तते । बहवो जनपदाः । धनिकास्तत्र विद्यन्ते । यथा पुर इति निर्देशो योद्धृसंबद्धः, एवं जनपद इति निर्देशोऽपि राज्ञा संबद्ध इति दृश्यते । पश्चात्काले राजधानी-शब्देन यो निर्दिष्टः स एव जनपदादिशब्देन ब्राह्मणेषु निर्दिष्ट इति गम्यते । संस्कृतीतिहासानुसारेण कदाचिद्राजानः पुरेष्ववावर्तन्त आत्मरक्षणार्थम । किञ्चित्कालानन्तरं राजानः तादृशपुरो विहाय जनानां मध्य एव वासं कल्पितवन्त इति ज्ञायते । तस्मिन्नेव काले राज्ञ

जनपदेन सम्बन्धः आरब्ध इति ज्ञायते। यथा वा विश इति निर्देशः सामान्यजनानां वासस्थानं प्रतिपादयति, एवमेव जनपदादिनिर्देशः सामान्यजनानां वासस्थानं प्रतिपादयति। परं तु "विश" इति निर्देशः प्राचीनः। जनपदादिनिर्देशः अर्वाचीनः। किमर्थं "ग्रामः" "विशः" इति निर्देशमपहाय जनपदादिनिर्देशं नूतनतयाङ्गीकृतवन्त इति न ज्ञायते। गच्छता कालेनैकस्मिन्नेव विषये नूतना निर्देशा दृष्टपूर्वा एव। एतादृशनूतननिर्देशानां नूतनतया प्रवेशस्य किञ्चिदिव कारणं भवत्येव। जनबाहुल्यं मनसिकृत्यैव जनावासस्थानस्य जनपदादि-निर्देशः प्रवृत्त इति वयं मन्यामहे। इतः परं जनपदादिनिर्देशघटितब्राह्मणभागान् सविमर्शं प्रदर्शयामः॥

"आस्य तं जनपदं पूर्वा कीर्तिर्गच्छति। दानकामा अस्मै प्रजा भवन्ति" (तै. ब्रा. 2-3-9)। अत्र दातारो जना जनपदे वर्तन्त इति सूच्यते। इदमपि ज्ञायतेऽनेन यत् कश्चन कीर्तिमान् पुरुषः किञ्चिज्जनपदं याच्ञार्थं यदा याति, तदा तस्य जनपदप्राप्तेः पूर्वमेव तत्कीर्तिः(नगरं) जनपदमागच्छति। तत्र वर्तमाना जनाश्च तत्कीर्तिश्रवणेन संन्तुष्टा दानकामाः तादृशं पुरुषं प्रतिपालयन्तो वर्तन्त इति। "न मे जनपदे स्तेनः, न कदर्यः, न मद्यपः, नानाहिताग्निः, नाविद्वान्, न स्वैरी न स्वैरिणी" (छा.उ. 3-5-11 5)। "अश्वपतिः" राजा वदति—स्वजनपदे स्तेनादयो न सन्तीति। अत्र जनपदशब्द एकवचनान्ततया प्रयुक्तः। राज्ञा च तस्य सम्बन्धोऽस्ति। इयं च राजधानी इति ज्ञायते॥ "परेण हिमवन्तं जनपदा उत्तरकुरव उत्तरमद्रा इति" (ऐ. ब्रा. 8-14)। अत्र बहूनां जनपदाना-मस्तित्वं सूच्यते। तेषां चोत्तरकुरु—उत्तरमद्र इति नामधेयं दृश्यते। ततश्चेदं ज्ञायते—अनेकानि जनपदानि एकेनैव नाम्ना व्यवहृतानि इति "स यथा महाराजो जनपदान् गृहीत्वा स्वे जनपदे यथाकामं वर्तेत" (बृ.उ. 2-1-20 5-11-5)। अत्रापि जनपदानां बहुत्वं, एकस्य जनपदस्य राजाधिष्ठितत्वं च ज्ञाप्यते। "अथ यत्किञ्च जनपदे कृतान्नं सर्वं वः तत् सुतं तेषाम्" (शत.ब्रा. 13-4-2-17)। अत्राश्वमेधीयाश्वः सर्वामपि भूमिं परिक्रामति। अश्वरक्षकाश्च तेन समं गच्छन्ति। तत्तज्जनपदे ये जना वर्तन्ते ते अश्वरक्षकान् भोजयन्ति, तत्र चान्नं समृद्धं वर्तते इति गम्यते। जनतानिर्देशश्चैषु ब्राह्मणभागेषु दृश्यते॥

"यदा खलु वै संवत्सरं जनतायां चरति अथ सधनार्धो भवति" इति तैत्तिरीयसंहितायां प्रतिपादनात् जनतायां धनाढ्या अवसन्निति सूच्यते। "यः कामयेत स्वस्ति जनतामियामीति" (तै. सं. 2-3-4अ.2)। तस्यामेव संहितायां (2-2-1 and 2-3-4)। जनताशब्दस्य राजधानी-परत्वमपि सूचितम्। अत्र हि राजा सङ्ग्राममभिप्रयास्यन् संग्रामं जित्वा पुनर्जनतामेष्यन् यागं कुर्यादित्युच्यते। एवं हि श्रूयते—"यः संग्राममुपप्रयाति ऐन्द्राग्नमेकादशकपालं निर्वपेत्।

संग्राम उपप्रयास्यन् ऐन्द्राग्नमेकादशकपालं निर्वपेत् संग्रामं जित्वा एति ऐन्द्राग्नमेकादशकपालं निर्वपेत् जनतामेष्यन् क्षेत्रपत्यं चरुं निर्वपेत् जनतामागत्य" इति । अत्र राज्ञो युद्धं प्रति गमनं, तत्र जयः, प्राप्तजयस्य राज्ञः स्वजनतां प्रत्यागमनम् तत्र प्रतिष्ठा च प्रतिपाद्यते । युद्धार्थं गच्छन् इन्द्रियवीर्ये सम्पादयति । युद्धेन नष्टयोरिन्द्रियवीर्ययोः सम्पादनं प्रतिपाद्यते । पुनः स्वजनतां प्रति आगमनकाले इन्द्रियवीर्याभ्यां सहैवागच्छति । जनतायां युद्धानन्तरं पुनः प्रतिष्ठितो राजा इन्द्रियवीर्ये स्वात्मनि धत्त इतीमे विषया अत्र प्रतिपाद्यन्ते । अत्र राज्ञो जनतायां सन्बन्धः सुस्पष्टमुक्तः । अतो जनता राज्ञ आवासस्थानं जनानां चावासस्थानमिति निश्चीयते । एतादृश्य इष्टयो मैत्रायणीयसंहितायां काठकसंहितायां च प्रतिपादिताः । अत्रापि जनताप्रस्तावो राज्ञश्च प्रस्तावोऽस्ति । (जैमिनीयब्राह्मणे) 'अधिपतिरिव तस्यां जनतायां भवति वृषेव प्रजनितेव अधिपतिरिव तस्यां जनतायां भवति स्वायां जनतायां भवति' (जै. ब्रा. स्वायां जनतायामधिकं भवति (जै. ब्रा. 1-192) । वृषेव वै प्रजनितेव अधिपतिरिव तस्यां जनतायां भवति यस्यामृध्यते सर्वो ह वै जनेषु भूषते अराती यतिजने प्रतिष्ठाम. कुर्वति प्रतिपदं कुर्वति (जै. ब्रा. 1-92) यथा ह गिरौ ज्योतिर्भायात् एवं तस्यां जनतायां भवति यस्यां भवति (जै.ब्रा. 1-240) इति जनताशब्दः प्रयुक्तः । मैत्रायणीसंहितायां (2-1-1) एवं श्रूयते "ऐन्द्राग्नमेकादशकपालं निर्वपेत् संग्राममभिप्रयात् । ऐन्द्राग्नमेकादशकपालं निर्वपेत् संग्रामं संयत्य स यदा संग्रामं जयति अथैन्द्राग्नम् एकादशकपालं निर्वपेत् । ऐन्द्राग्नमेकादशकपालं निर्वपेत् पौष्णं चरुं जनताममभिप्रयान्" इति । अत्रापि राजा युद्धे जयानन्तरं स्वजनतामागच्छतीति प्रतिपाद्यते । काठकसंहितायामपि एवं श्रूयते (9-17) 'ऐन्द्राग्नमेकादशकपालं निर्वपेत् संग्राममभिप्रयान् । ऐन्द्राग्नमेकादशकपालं निर्वपेत् संग्राममागत्य ऐन्द्राग्नमेकादशकपालं निर्वपेत् संग्रामं जित्वा ऐन्द्राग्नमेकादशकपालं निर्वपेत् पौष्णं चरुं क्षेत्रस्य पतये चरुं यः कामयेत अस्यां मे जनतायां ऋध्येत' इति । अत्रापि राज्ञो जनतायाश्च सम्बन्धः सुस्पष्टः । आसु तिसृषु संहितासु राज्ञ आवासस्थानं जनताशब्देनोच्यत इति सुस्पष्टं प्रतीयते । काठकसंहितायां उभयोर्जनतयोः सन्धिः प्रतिपाद्यते । 'यद् विशालो व्रियतां तत् रूपं इन्द्राय निहनाय विशालवृषभमालभेत । जनतयोः सन्धौ यः कामयेत उभे जनते ऋध्येयमिति उभे एव जनते ऋध्यति । ते अन्योन्यं घनती चरतः यद् विशालः अवस्कमेवैने गमयति' इति । अत्र जनता तयोः सन्धिश्च प्रतिपादिता । जनतायां सर्वेषां सम्बन्धो न सुशकः । परं तु श्रमेणैव सम्पाद्यः । ऐतरेयब्राह्मणे प्रायणीयस्याहः प्रशंसाकाले 'तस्यै जनतायै कल्पते यत्रैवं विद्वान् होता भवति' (1-17) । एकैकस्या जनतायाः पृथक् प्राधान्यं अभूदिति ज्ञायते । 'एकैको वै जनतायामिन्द्रः (तै. ब्रा. 1-4-6&1) कीर्तिरस्य पूर्वा गच्छति जनतामायतः (तै. ब्रा.

2·3·1·4) इति जनतायां कीर्तिसम्पादनं प्रशंस्यते । वैश्वदेवं शंसति 'यथा वै प्रजाः एवं वैश्वदेवं तत् यथान्तरं जनता एवं सूक्तानि' (ऐ. ब्रा. 3·31) इति जनताप्रस्तावोऽस्ति । अत्रैव 'ऐनं पंचिन्यै जनतामिह विनो गच्छन्ति' इत्युच्यते । अन्यत्रास्मिन्नेव ब्राह्मणे 'यतर्भु ऋतून् कल्पयन्ति यथायथं जनता' इति दर्शनात् जनताऽव्यवस्थापि सूच्यते । जनतावत् जनशब्दोऽपि जनवासस्थानवाचकपरो'ऽतिजनं वेयात्' (तै. ब्रा. 1-8-8-5) । यथाजनम् अवसंकरोति (तै. सं. 5·4-6·1) जनं प्रतिगन्तुः आहारार्थं क्रियमाणः प्रयत्नः प्रतिपाद्यते । अत्र श्रूयमाणस्य अवसशब्दस्य पथ्यदनपरत्वं यास्कोऽप्याह—'अवसंगावः पथ्यदनम्' इति । अतो जनं प्रति गच्छन् आहारमपि आनयतीत्युच्यते ॥

॥ सजाताः ॥

वैदिकराज्यतन्त्रतत्त्वं सर्वमपि सजातशब्दव्याख्यानेऽन्तर्गतमिव दृश्यते । ऋग्वेदादारभ्य प्रवृत्तोऽयं सजातशब्दो ब्राह्मणेष्वसकृत् प्रयुक्तः । सजातानां मध्ये श्रैष्ठ्यप्रार्थनमसकृद्दृश्यते । तथा सजातप्राप्त्यर्थं बहवो यागा विहिताः । यजुःसंहितायां श्रूयमाणं "राष्ट्रं वै सजाता" इति वाक्यं सजातशब्दस्य राज्यतन्त्रतत्त्वरीत्या संभाव्यमानं मुख्यत्वं विशदयति । विशेषतया यजुर्ब्राह्मणेषु ग्रामशब्दस्य सजातशब्दवाच्यार्थेन सम्बन्धः स्पष्टं प्रतीयते । 'सजातान् प्रयच्छन्ति, ग्राम्येव भवति' इति हि श्रूयते । "सजातानेवास्मान् अनुकान् करोति" इत्यपि श्रूयते । अतश्च ग्रामशब्दो ब्राह्मणेषु सजातसमुदायपरतया प्रयुक्त इति गम्यते । सजातानां च राज्ञा सह सम्बन्धात् राज्यतन्त्रतत्त्वरीत्या सजातशब्दार्थस्य मुख्यत्वं प्रतीयते । अतः इतः परं सजातशब्दविमर्शं कुर्मः । अयं च सजातशब्दः ऋग्वेदादारभ्य प्रयुक्तः । ऋक्संहितायां सजातशब्दस्य राज्यतन्त्रतत्त्वरीत्या मुख्यत्वं न प्रतीयते । अथर्ववेदे पुनः राज्यतन्त्रतत्त्वसंबन्धः किञ्चिदिव स्पष्टोऽस्ति । यजुर्ब्राह्मणेषु सुस्पष्टं सजातशब्दस्य राज्यतन्त्रतत्त्वसम्बन्धः प्रतीयते । शतपथब्राह्मणरीत्या राजसूयसम्बन्धिस्फ्यप्रदानकर्मेति किञ्चन कर्म विहितम् । अत्र ह्येवं श्रूयते—(5-4-4 to 15) "स्फ्यं प्रयच्छति राज्ञे । राजानम् आत्मनः अबलीयांसं कुरुते । स राजा राजभ्रात्रे राजभ्राता सूताय स्थपतिर्वा ग्रामण्ये ग्रामणीः सजाताय" इति स्फ्यप्रदान-कर्म तस्य तस्याधिकारिपुरुषस्य स्वस्मादपकृष्टत्वकरणार्थं विहितम् । आत्मनो अबलीयांसं कुरुत इति ह श्रूयते । तत्रायं क्रमः—'ब्राह्मणो राज्ञे स्फ्यं प्रयच्छति । राजभ्रात्रे राजा भ्राता सूताय । स च ग्रामण्ये । ग्रामणीः सजाताय' इति । अत्र अन्ततः सजात आगच्छति । अतः सजातस्य राज्यतन्त्ररीत्या मुख्यत्वमस्तीति निश्चिनुमः । अन्यत्रापि 'भूमा वै सजाताः' (श. त. ब्रा. 2-1-9-7) । सजातानां बहुत्वमत्र प्रतीयते । अन्यत्रापि तस्मिन्नेव ब्राह्मणे "ब्रह्मावनिं त्वा क्षत्रावनिं सजातवन्युपदधामि" इति मन्त्रव्याख्यानावसरे एवं पठ्यते 'बह्वी वै युजु एवाशीः । तद् ब्रह्म च क्षत्रं चाशास्ते उभे वीर्ये सजातवनीति । भूमा वै सजातास्तद्-भूमानमाशास्ते' (शत. ब्रा. 1-2-1-7) 'सजातानेवास्मा अनुकान् करोति' (तै. ब्रा. 3-3-10-4) । 'अन्यत्र सजातानां मध्यमस्था एधि राज्ञाम्' (तै. सं. 4-1-7-2) । एभिर्मन्त्रभागैर्ब्राह्मणभागैश्च सजातशब्दवाच्यस्य राज्यतन्त्रतत्त्वरीत्या मुख्यत्वमस्तीति निश्चीयते । के ते सजाताः ? शब्दार्थविमर्शनावसरे समानजन्मवत्त्वमेवार्थ इति निश्चेतुं शक्यते । अथाऽपि के त इति विचारणीयं भवति । वैदिककोशकर्तारः सजातशब्दव्याख्यानावसरे

राजा राज्ञः सजात इति अधिकारे वा जन्मनि वा दृश्यमानं साजात्यमङ्गीकृत्य जातितत्त्वरीत्या नात्र साजात्यमिति अभिप्रयन्ति । सजातशब्दो न चातुर्वर्ण्यप्रयुक्तसाजात्यं प्रतिपादयतीति वयमप्यङ्गीकुर्मः । यतो जातिव्यतिरिक्तेन केनचिन्निमित्तेन संभाव्यमानं साजात्यमेव सजातशब्दः प्रतिपादयति । इदं चात्रावश्यं ज्ञातव्यम्—जातितत्त्वोत्पत्तेः पूर्वं समुदाये राज्यतन्त्ररीत्या कश्चन विभाग आसीदित्यवश्यमङ्गीकर्तव्यमेव । ऋग्वेदे सजातानां मध्ये श्रेष्ठयप्रार्थनं बहुषु मन्त्रेषु दृश्यते । सजातत्वं नैकजातीयत्वव्याप्यमिति निश्चीयते । ऋग्वेदे एषु स्थलेषु सजातिशब्दस्य प्रस्तावोऽस्ति । "इमं सजाता अनुवीरयध्वम्" (10-103-6) इति । अत्र केचन योद्धारः तत्समानजातीया अन्ये अयोद्धारः । तदर्थे चैतदुच्यते "अनुवीरयध्वम्" इति । अथ वा एको योद्धा । तमनुसृत्य तत्सजाता अनुवीरयन्तीत्युच्यते । "इन्द्राग्नी ज्ञात उत वा सजातान्" (ऋ.सं. 1-109-1) । "तवग्नावमित्रमहः सजात्यम्" (2-1-5) । "नासत्या मे पितरा बन्धुपृच्छा सजात्यमश्विनोश्चारुनाम" (3-54-16) । "अस्ति वः सजात्यं रिशादशः" ॥ (8-77-10) । "समानं वां सजात्यं समानो बन्धुरश्विना" (8-73-12) । "कुविदङ्ग प्रति यथा चिदस्य नः सजात्यम्" (10 64-13) । "अधीन इन्द्रेषां विष्णोः सजात्यानाम्" (8-83-7) । "युष्मे देवो अपिष्मसि सजात्ये" । (8-18-19) "गात्रश्चित् धामन्यवः सजात्येन मरुतः स बन्धवः" (8-20-21) । एषु स्थलेषु अश्विनोः साजात्यं मरुतां साजात्यं च प्रतिपादितम् । (8-83 7) मानुषसाजात्यस्य प्रस्तावोऽस्ति । इतः परमथर्ववेदे वर्तमानसजातपदविमर्शं कुर्मः ॥

"यो न स्वो अरणः सजातः । ममामित्रान् विविध्यत्" (1-19-3) । "यस्ते हवं विवद् सजातः यश्च निष्ठयः अपां चमिन्द्र तं कृत्वा अथेममिव अवगमय" । अयं च मन्त्रः अपरुद्धस्य राज्ञ आह्वानकाले पठितः । राज्ञः पुनराह्वानं कश्चन सजातो विवदत इति अनेन ज्ञायते । पूर्वस्मिन्नपि मन्त्रे (3-3-4) 'इमं सजाता अभिसंवदध्वम् । अग्ने सपत्नान् अधरान् पातय । अस्मद्व्यथय सजातम् उत्पिपानं बृहस्पते' (13-1-31) "अच्छ त्वा यन्तु हविनः सजाताः" (3-4-3) । अत्र राज्ञ आह्वानकाले सजाता अपि आगच्छन्त्विति उच्यते । सजातानां सांमनस्यं एकस्मिन् सूक्ते एवं प्रार्थ्यते (6-73) 'ये ह यातु वरुणः सोमो अग्निः बृहस्पतिः वसुभिरेह यातु ।

अस्य श्रियं उपसंयात सर्व उग्रस्य चेत्तुः संमनसः सजाताः ॥

यो वः शुष्मः हृदयेष्वन्तराकूतिः यो वो मनसि प्रतिष्ठा ।

तान् सीवयामि हविषा घृतेन मयि सजाता रमतिर्वोऽस्तु ॥ (1)

इहैव स्तमापयत अध्यस्मत् पूषा परस्तात् अपथं वः कृणोतु ।
वास्तोष्पतिः अनु वो जोहवीतु मयि सजाता रमतिर्वो अस्तु ॥ (2)

अत्र सजातानां सांम्मनस्यं रमतिश्च प्रार्थ्यते । प्रथमे मन्त्रे 'उग्रस्य चेत्तुः अस्य श्रियं उप संयात' इति सजाता उच्यन्ते । द्वितीये मन्त्रे सजातानां हृदये वर्तमानशुष्कहृदयत्वादिदोषापनयनद्वारा सजातानां रमतिः प्रार्थ्यते । तृतीये मन्त्रे एवं प्रार्थ्यते 'हे सजाताः! अस्य समीप एव तिष्ठत; मा अपयात । पूषा युष्माकं मार्गं मा करोतु । वास्तोष्पतिः गच्छतोऽपि युष्मान् आह्वयतु इत्युच्यते । 'इदं कसांब, चयनेन चितं तत् सजाताः अवपश्यतेत' (18-4-37) 'इयं मात्रा मीयमाना सजातांस्ते बलिहृतः कृणोतु' (11-1-6) । अत्र सजातानां बलिप्रदानं प्रतिपाद्यते । 'साकं सजातैः पयस सहैधि उदुब्जैनां महते वीर्याय' (11-1-7) । अत्र सजातैः साकमभिवृद्धिः प्रार्थिता । 'सजातानां श्रैष्ठ्य आधेह्येनम्' (1-9-3) । 'सजातानां मध्यमस्था एधि राज्ञां' (2-6-4) । 'सजातानां मध्यमेष्ठाः यथासनि' । एषु स्थलेषु सजातानां मध्यवर्तित्वं, तेषां मध्ये श्रेष्ठत्वं च प्रार्थ्यते । अथर्ववेदे (3-8) 'राष्ट्रक्षेमप्रार्थनापरं अत्र एवं प्रार्थ्यते ।

'आयातु मित्र ऋतुभिः कल्पमानः संवेशयत्पृथिवीमुस्त्रियाभिः ।
अथास्मभ्यं वरुणो वायुरग्निर्बृहद्राष्ट्रं संवेश्यं दधातु ॥ (1)

धातारातिः सवितेदं जुषन्तामिन्द्रस्त्वष्टा प्रतिहर्यन्तु मे वचः ।
हुवे देवीमदितिं शूरपुत्रां सजातानां मध्यमेष्ठा यथासानि ॥ (2)

हुवे सोमं सवितारं नमोभिर्विश्वानादित्याँ अहमुत्तरत्वे ।
अयमग्निर्दीदाय दीर्घमेव सजातैरिद्धोऽप्रतिब्रुवद्भिः ॥ (3)

इहेदसाथनपरो गामाथेर्यो गोपाः पुष्टपतिर्व आजत् ।
अस्मै कामयोप कामिनी विश्वे वो देवा उपसंयन्तु ॥ (4)

सं वो मनांसि संव्रता समाकूतीर्नमामसि ॥ (5)

अहं गृभ्णामि मनसा मनांसि मम चित्तमनुचित्तेभिरेत ।
मम वशेषु हृदयानि वः कृणोमि मम यातमनुवर्त्मान एत ॥ (6)

इदं च सूक्तं राज्यतन्त्रतत्त्वसम्बन्धीत्यत्र न कोऽपि सन्देहः । प्रथमे मन्त्रे बृहद्राष्ट्रं संवेश्यं दधातु इति उच्यते । द्वितीये मन्त्रे सजातानां मध्यमस्थानवर्तित्वं प्रार्थ्यते । तृतीये मन्त्रे सजातेष्वेव उत्कृष्टत्वं तथा अप्रतिब्रुवद्भिः सजातैः इन्धनं च प्रार्थ्यते । चतुर्थे मन्त्रे सजातान् प्रति एवमुच्यते । हे सजाताः! इहैव तिष्ठध्वम्, न परागच्छथ युष्माकं रक्षकः

पुष्टिपतिः आगत इत्युच्यते । पञ्चमे मन्त्रे च सजातानां मनसां व्रतानाम् आकूतीनां च सन्नमनं प्रार्थ्यते । विपरीतव्रतानां सजातानामपि सन्नमनमुच्यते । षष्ठे मन्त्रे सजातानां मनोग्रहणं श्रेष्ठचित्तानुवर्तित्वं श्रेष्ठवश्यत्वं तद्व्रतानुगतित्वं च प्रार्थ्यते । तथा सजातविषये यजुर्ब्राह्मणेषु च कश्चन मन्त्रः पठितः । स च व्याख्यातः । (मै. सं. 2-3-2 कं. सं. 12-1-2 तै. सं. 2-3-82) अयं मन्त्रः सांग्रहणेष्टाम् उपहोमसाधनत्वेन विहितः । सांग्रहणेष्टिः स्वतन्त्रा तिसृषु यजुस्संहितासु प्रतिपादिता । तैतिरयिब्राह्मणे परम् इयम् इष्टिः अश्वमेधाङ्गत्वेनापि विनियुक्ता । अस्या इष्टया राज्यतन्त्ररीत्या मुख्यत्वमस्तीति अश्वमेधाङ्गत्वप्रतिपादनेनैव ज्ञायते । अश्वमेधयागो हि राज्ञा एव कर्तव्या । अतश्चेयम् इष्टिः । तत्र वर्तमानोपहोममन्त्रस्य च राज्यतन्त्रतत्वसम्बन्धो निर्बाधः । संहितासु परं ग्रामकामस्येयम् इष्टिर्विहिता । 'वैश्वदेवीं सांग्रहणीं निर्वपेत् ग्रामकामः' (तै. सं) 'वैश्वदेवं चरुं निर्वपेत् ग्रामकामो यजेत (मैसं) पयस्यया यजेत सजातकामः' (का.सं) । अत्र परिधानमन्त्र उपहोममन्त्रश्च समालोचनार्हः । यथा—उपहोममन्त्रेषु सजातैस्सहैकमत्यं प्रार्थ्यते । परिधिमन्त्रे सजातानां मध्ये ध्रुवत्वं सजाताभिभावकत्वं सजातप्रियत्वं च प्रार्थ्यते । यतः तस्यां तस्यां संहितायां बहवोऽभिप्राया आविष्कृताः तत्तत्संहितास्थवेदभाग एव लिख्यते । तैत्तिरीयसंहितारीत्या एवम् । 'वैश्वदेवीं सांग्रहणीं निर्वपेत् ग्रामकामः, वैश्वदेवा वै सजाताः, त एवास्मै सजातान् प्रयच्छन्ति ग्राम्येव भवति, सांग्रहणी भवति, मनोग्रहणं वै सांग्रहणं, मन एव सजातानां गृह्णाति, ध्रुवोऽसि, ध्रुवोऽहं सजातेषु भूयासम् । इति परिधीन् परिदधाति, अथो एतदेव सर्वं सजातेष्वधि भवति, आमनसि आमनस्य देवा इति तिस्रः । एतावन्तो वै सजाता ये महान्तः क्षुल्लकाः इति स्त्रियः ताननेवावरुन्धे त एनम् अवरुद्धा उपतिष्ठन्ते' इति । अत्र सांग्रहणीति नाम्नैव इयमिष्टिः सजातमनोग्रहणार्था इति विवृतम् । अनया इष्टया सजातेष्वभिभवति इत्युच्यते । परिधिमन्त्रप्रशंसाकाले च सजातेष्वभिभवति इत्युच्यते । सजातप्राप्तिद्वारा ग्रामप्राप्तिश्चोच्यते । परिधिमन्त्रप्रशंसाकाले च सजातानामवरोधः प्रतिपाद्यते । उपहोमप्रशंसाकाले च महतां क्षुल्लकानां स्त्रीरूपाणां च सजातानामवरोधः प्रतिपाद्यते । एतत्संहितारीत्या परिधिपरिधानमन्त्र एवम् । 'ध्रुवोऽसि ध्रुवोऽहꣳ सजातेषु भूयासं धीरश्चेता वसुविद्-ध्रुवोऽसि ध्रुवोऽहꣳ सजातेषु भूयासमुग्रश्चेता—ध्रुवोऽसि ध्रुवोऽहं सजातेषु मभिश्चेत्ता वसुविदा मनस्या मनस्य देवा ये सजाताः कुमाराः समनसस्तानहं कामये हृदा ते मा कामयन्ताꣳहृदा तान् म आमनसः कृधि स्वाहा । आमनस्या मनस्य देवाः याः स्त्रियः समनसस्ताः अहं कामये हृदा ता मां कामयन्ताꣳहृदाताम आमनसः कृधि स्वाहा' इति । मैत्रायणीसंहितायामेवं पठ्यते—'वैश्वदेवं चरुं निर्वपेद्भ्रातृव्यवान् देवाश्च वा असुराश्चास्पर्धन्त । ते देवाः संग्रहणेनायजन्त । ते यत्किञ्चासुराणाꣳस्वमासीत् । तत्समगृह्णन्

मनांऽसि वा वैषां तत् समगृह्णंस्तेऽमनसः पराभवन् भ्रातृव्यान् यजेत, मनोग्रहणंवा एतन्मनाँसि वा एतद्भ्रातृव्यानाँसंगृह्णाति तेऽमनसः पराभवन्ति ग्रामकामो यजेत मनोग्रहणंवा एतन्मनाँसि वा एतत् सजातानांसंगृह्णाति तेऽस्मान्मनोगृहीतानापयन्ति सर्वेषाँ सजातानां गृहादाज्यमाहरेयुर्यातामेव क्रियतां च गृहादाज्यमाहरन्ति । तेषाँ सर्वेषां मनाँसि सङ्गृह्णाति तेऽस्मान्मनोगृहीतानापयन्त्यामनेन जुहोत्यामनस एवैतान् करोति । आमनस्य देवा ये सजाताः सुमनसस्तानहं कामये हृदा ते मां कामयन्तांहृदा तान्मा आमनसस्कृधि स्वाहाऽऽमनस्य देवा ये पुत्राः समनसस्तानहं कामये हृदा ते मां कामयन्तांहृदा तान्मा आमनसस्कृधि स्वाहाऽऽमनस्य देवा याः स्त्रियः समनसस्ता अहं कामये हृदा ता मां कामयन्त । हृदा तान्मा आमनसस्कृधि स्वाहा । एता वै सजाताः सजाता इव पुत्रा इव स्त्रिय इव पशव इव तैरात्मानमभिसंभुङ्क्ते तैर्भवति पृषती गौः धेनुर्दक्षिणा सा हि वैश्वदेव्यश्राव्यद्वैश्वदेव्यव्यथयद्वैश्वथ यद्वै व्यथयद्वैश्वदवीष्टिवैश्वदेवीर्वा इमाः प्रजाः त एवावरुन्धे ता आद्या अकृत बहिरात्मँवै बहिरात्मंवै प्रयाजानुयाजा आत्मा देवता यत् प्रयाजानुयाजानां पुरस्ताद्वोपरिष्टाद्वा जुहुयाद्बहिरात्मँसजातान् दधीतऽथ यन्मध्यतो जुहोति मध्यत एव सजातानात्मन् धत्ते, यदि कामयेत ता जगेयुस्ताजकृ परेयुरिति दारुमयेन जुहुयादराचरा हि वनस्पतयो यदि कामयेत ध्रुवा स्युः कृच्छ्रादेयुरिति मृन्मयेन जुहुयात् । ध्रुवा२र्दायं ध्रुवोऽसि ध्रुवस्त्वं देवेष्वेधि ध्रु२वोऽहंसजातेषु भूयासं प्रियः सजातानामुग्रश्चेत्ता वसुविदुग्रोऽस्युग्रस्त्वं देवेष्वेध्यु२ग्रोहंसजातेषु भूयासं प्रियः सजातानामुग्रश्चेत्ता वसुविदभिभूरस्यभिभूस्त्वं देवेष्वेध्यभिभूरहंसजातेषु भूयासं प्रियस्सजातानामुग्रश्चेत्ता वसुविद् परिभूरसि परिभूस्त्वं देवेष्वेधि परिभूरहं सजातेषु भूयासं प्रियः सजातानामुग्रश्चेत्ता वसुवित् सूरिरसि सूरिस्त्वं देवेष्वेधि सूरिरहंसजातेषु भूयासं प्रियः सजातानामुग्रश्चेत्ता वसुवित् । एते वै सजातास्तामस्मिन् दधाति तानस्मादनपक्रमिणः करोति' । काठकसंहितायम् एवं श्रूयते--'ध्रुवोऽसि ध्रुवोऽहँ सजातेषु ध्रुवामभिसजाता उग्रश्चेत्ता वसुविदभिभूरस्यम्यहं सजातान् भूयासं धीरश्चेत्ता वसुवित् परिभूरसि पर्यहँ सजातान् भूयासं धीरश्चेत्ता वसुवित् सूरिरसि सूरिरहं सजातेष्वधिभूयासमुग्रश्चेत्ता वसुविदामनस्य देवा ये सजाताः समनसो यानहं कामये हृदा ते मां कामयन्तां हृदा तान्म आमनसस्कृधि स्वाहा । मनस्य देवा या स्त्रियः समनसो या अहं कामये हृदा ता मां कामयन्तां हृदा ताम आमनसस्कृधि स्वाहा । मनस्य देवा ये पुत्रासो ये पशवः समनसो यानहं कामये हृदा ते मां कामयन्तां हृदा तान्म आमनसस्कृधि स्वाहा । देवाश्च वा असुराश्च संयत्ता आसँस्तेऽसुरामनस्वितरा आसन्नमनस्तरा इव देवास्ते देवा एतत् संग्रहणमपश्यँस्तेनासुराणां मनांसि समगृह्णँस्ततो वै ते समनसः पराभवन् मन एव भ्रातृव्यस्य

संगृह्णाति सोऽस्या मनाः पराभवत्येतया यजेत पशुकाम एतया वै देवा असुराणां पशून् समगृह्णँस्ततो वै ते पशवः पराभवन् पशूनेव भ्रातृव्यस्य संगृह्णाति सोऽस्य पशुः पराभवत्येतया यजेत सजातकामो मनोग्रहणं वा एतन्मनस्विन इव सजाता यावन्त एव सजातास्तेषां मनाँसि गृह्णाति तेऽस्मान्मनो गृहीतानापयन्ति । वैश्वदेवाः कार्यो वैश्वदेवा हि सजाताः पृश्नयाः पृषद्वत्सा या दुग्धे भवति वैश्वदेवी हि पृषति सर्वेभ्यः सजातेभ्यः आज्यं समाहरन्ति वैश्वदेवत्वाय वैश्वदेवा हि सजाता ध्रुवोऽसीति परिधीन् परिदधाति सजातेनेवास्मा उपदधात्यामनस्य देवा इत्यन्वारम्भयित्वा जुहोति मनोग्रहणं वा एतदेवमिव सजातस्त्रिय इव पुमाँस इत कुमारा इव यावन्त एव सजातास्तेषां मनाँसि गृह्णाति तेऽस्मान् मनोगृहीतानापयन्ति । विवा एतद्यज्ञं छिनत्ति यद्यज्ञे प्रतत एता अन्तराहुतीर्जुहोति संस्थिते होतव्या यत् संस्थिते होतव्या यत् संस्थिते जुहुयाद्बहिरात्मँ सजातान् कुर्वीतान्तरा प्रायाजानुयाजाञ्जुहुयात् प्राणा वै प्रयाजा अपाना अनुयाजा आत्मा हविरात्मन्नेव मध्यतः सजान् धत्ते दारुमयेन जुहुयाद्यदि कामयेत क्षिप्रं मा सजाता एयुः क्षिप्रं पुनः परेयुरित्येवामिव हि वनस्पतयोऽध्रुवा इव चराचरा इव मृन्मयेन इव जुहुयाद्यदि कामयेत चिरं मा सजाता एयुश्चिरं पुनः परेयुरित्येवमिवहीयं ध्रुवेव प्रतिष्ठिते वा चराचेर वा' ॥ मैत्रायणीसंहितायाम् अस्या इष्ट्या मनोग्रहणार्थत्वम् इतिहासमुखेन प्रतिपाद्यते । ग्रामकामस्य इयम् इष्टिः । तत्संहितारीत्या यतो ग्रामकामस्य इष्टिः, अतोऽनया इष्ट्या सजातानां मनोग्रहणं भवति इत्युच्यते । मनोग्रहणफलं च एवं प्रतिपाद्यते—ते अस्मात् मनोगृहीता नापयन्तीति । सर्वेषां सजातानां मनोग्रहणार्थं तत् ग्रहात् आज्याहरणं च विहितम् । उपहोममन्त्रे च भेदो दृश्यते । प्रथमं सजातानां संमनसप्रार्थनम् । तदनन्तरं पुत्राणां संमनसप्रार्थनम् । स्त्रीणां संमनसः प्रार्थनम् । तदनन्तरं पशूनां संमनसः प्रार्थनम् । प्रयाजानुयाजयोर्मध्ये उपहोमं विदधत् वेदवाक्यं तयोः बहिः होमं विनिन्द्य मध्यत एव सजातान् आत्मँ धत्ते इत्युच्यते । दारुमयेन पात्रेण होमकरणे सजाता दारुवत् चराचरा भवेयुरिति निन्दां कृत्वा मृन्मयेन होमकरणे सजाताः स्थिरा भवेयुरित्युच्यते । परिधिमन्त्रेऽपि भेदोऽस्ति । 'प्रियः सजातानां भूयासम्' इत्ययमभिप्रायः चतुर्वारं पठ्यते । 'एने वै सजाताः तानेवास्मिन् दधाति' इत्युच्यते । 'तानस्मा अनपक्रामिणः कुरुते' इति । अन्ततः फलं च श्रुतम् ॥

परं तु कीदृशस्ते जना इति न स्पष्टं प्रतीयते । योद्धारो वा सामान्यजना वा इति । (जै. ब्रा.) 'यत्रैव सजातो भवति तद् ग्रामणीर्भवति ।' (जै. ब्रा. 1-127) 'कुरुपाञ्चालानां ब्राह्मणाः श्रीकामा उपयन्ति ते ह गावो अथ द्रा आसुः । सजातेषु ह एषां पशव आसुः' (2-370) ब्राह्मणकाले योद्धॄणां समुदायस्य सेना इति व्यवहारः

प्रारब्ध एव । अतो ग्रामशब्दसेनाशब्दयोः भिन्नार्थकत्वात् न ग्रामशब्देन सेनाया ग्रहणम् समुचितं भवति । परं तु ग्रामशब्देन सजातानां सम्बन्धः स्पष्टतरं प्रतीयते । 'ग्रामकाम' इत्यारम्य 'सजातान् प्रयच्छन्ति ग्राम्येव भवति' इति प्रतिपादनात् । तथा काठकसंहितायां 'ग्रामकाम' इति 'सजातकामः' इत्येव पठ्यते । अनेन ग्रामसजातयोः समानार्थकत्वं स्पष्टं प्रथीयते । परं तु सजातशब्दवाच्याः के? तेषां कार्यविशेषश्च कः इति न स्पष्टं प्रतीयते । अथापि सजातशब्दवाच्यस्य तत्त्वस्य राज्यतन्त्ररीत्या मुख्यत्वमस्तीति निर्विवादमङ्गीकर्तव्यम् । यतो राज्ञः सजातापेक्षा, तथा ग्रामण्यश्च सजातापेक्षा वर्तते । वयं तु ब्रूमः—सजातशब्दवाच्या जनप्रतिनिधय एव ये सभ्याः तस्मिंस्तस्मिन् ग्रामे या या सभा वर्तते तस्यां तस्यां सभायां सजाताः सभ्यत्वेन वर्तन्ते । ग्रामनिर्वाहविषये तैर्यदुच्यते तत्सर्वं ग्रामण्या क्रियते । तथा राजसभायां ये सजाता वर्तन्ते तैर्यत् निर्णीयते तद् राज्ञा क्रियते । अतश्च ग्रामण्यो राज्ञश्च सजाता आवश्यका इति । यद्यपि केषुचित् स्थलेषु केवलं सजातकाम इत्येवं पठ्यते । परं तु एषु स्थलेषु राज्ञ एव प्रतीतिः आवश्यिकी यतो राज्ञ एव सजातापेक्षा वर्तते । सामान्यजनानां न सजातापेक्षा अस्ति । 'सजातेषु ध्रुवो भूयासं सजातानां प्रियो भूयासं' इत्यादिरपि राज्ञः सजातापेक्षत्व एव सङ्गच्छते । स्पष्टं चेदं काठकसंहितायाम्—'मैत्रावरुण्या पयस्यया यजेत सजातकामः' इति काचनेष्टिर्विहिता । तत्र योऽलं सजातेभ्यः सन् असजातो भवति इति निमित्तं च प्रदर्शितम् । तथा समूहतो सजातेनेवास्मै समूहतीति फलं च प्रदर्शितम् । अनेन ज्ञायते सजातापेक्षा कस्यचन पुरुषस्य अस्ति । तादृशश्च पुरुषो राजैवेति निश्चीयते । राजव्यतिरिक्तस्य समुदाय आदरो नात्यन्तमपेक्ष्यते । ग्रामकाम इत्यस्य सर्वसाधारणत्वे सजातसमूहप्राप्त्या स किं करोतीति वक्तव्यं भवति । किंच, राज्ञः सजातैः साकं सम्बन्धस्यान्यत्र प्रतिपादनात् न सामान्य-जनविषये सजातसम्बन्धस्य आवश्यकता । अस्तु वा ग्रामवान् पुरुषः ग्रामिसजातप्राप्त्या ग्रामणीत्वं प्राप्नोतीति । तस्माद् ग्रामणीः सजातैः पर्यूढ इति स्पष्टं प्रतिपादनात् ग्रामण्यः सजातसम्बन्धोऽप्रतिहतो भवति । सजातैः सहितो ग्रामणीः स्वग्रामनिर्वाहं सम्यक् कुर्यात् । किं च यथा वा राजा अभिषेकादिनोत्कृष्टं स्थानं प्राप्तो जनेभ्यः पृथक् वर्तते, नैवं ग्रामणीः । स जनमध्ये वर्तते । जनेष्वेव एको ग्रमणीस्थानं प्राप्नोति । स च सर्वथा स्वजनानां सजातानां मध्ये श्रैष्ठ्यं प्रियं च आशंसते । अतश्च सजातानां मध्ये स्वप्राशस्त्य-प्रार्थना सर्वथा समुचितैव । अतश्च ग्रामकाम इत्यत्र ग्रामणीत्वकाम इत्येव वक्तव्यं भवति । तत्रापि सजातापेक्षत्वं ग्रामण्यो भवति । यद्यपि राज्ञो यत्र सजातापेक्षत्वं श्रूयते तत्र ग्रीक्देशे श्रूयमाण (Oligraty) राज्यतन्त्रमपि अङ्गीकृतमिति अभ्यूहितुमवकाशोऽस्ति ।

अथाप्यस्यास्पष्टत्वात् नेदमाद्रियते । ब्राह्मणकाले राज्यतन्त्रतत्त्वं सुप्रतिष्ठितमेव दृश्यते । न एतस्मिन् काले जना वासलाभार्थम् इतस्ततः एकपुरुषाध्यक्ष्ये सञ्चरन्ति । यतो ग्रामकामपदस्य इतस्ततः संचारार्थम् अन्यजनैः साकं युद्धार्थं च जना अपेक्षिता बभूवुः । सर्वथा ग्रामशब्देन सजातानां समूह एव उच्यते । तत्प्राप्त्या च ग्रामणीपदस्य प्राप्तिर्भवति । राजविषये पुनः एत एव सजाता वा अन्ये वा सजाता वा इति न स्पष्टं प्रतीयते । उभयपक्षाङ्गीकारेऽपि न दोषं पश्यामः । सर्वथा सजातापेक्षित्वं ग्रामण्यो राज्ञश्च वर्तत इति सुदृढं निश्चिनुमः ॥

इतः परमन्यत्र ब्राह्मणभागेषु वर्तमानग्रामसजातसम्बन्धिवाक्यानि विमृशामः । प्रथमं काठकसंहितावाक्यानि उदाहरामः—'अग्ने वैश्वानराय द्वादशकपालं निर्वपेत् ग्रामकामः । यदा नाभिम् अभिसंश्रिताः एवमेवैनं सजातैः अभिसंश्रयति' (10-4) । अत्र सजातानां ग्रामकामस्य परस्परसम्बन्धः स्पष्टं प्रतिपादितः । 'इन्द्रा अनुजे वे एकादशकपालं निर्वपेत् सजातकामः इन्द्रियं वै ज्यैष्ठ्यं इन्द्रियेणैव सजातान् अन्वृजन् कुरुते' (10-9) । अत्र सजातेषु ज्यैष्ठ्यम् इन्द्रियेण उत्कृष्टसजातावशीकरणं च प्रतिपाद्यते । 'मारुतं प्रैयंगवं चरुं निर्वपेत् पृश्नया दुग्धे सजातकामः पृश्न्या वै मरुतो जातो वाचो वास्या वा पृथिव्या मारुतास्सजाता अभ्यायच्छन्ति' । अत्र सजातेषु श्रेष्ठं प्रति सजाता आगच्छन्तीत्यत्र वत्सस्य गोऊधः प्रति आगमनं दृष्टान्तीकृतम् । (10-11) 'वैश्वदेवं द्वादशकपालं सजातकामः क्षत्रं वा इन्द्रो वैश्वदेवीरिमाः प्रजाः क्षत्रायैव विशमनुनियुनक्त्यैन्द्रस्यावदायाथ वैश्वदेवस्योभे अवदाने अवद्येदथैन्द्रस्य क्षत्रं वा इन्द्रो वैश्वदेवीरिमाः प्रजाः क्षत्रेणैव विशमुभयतः परिगृह्णात्यैन्द्री वैश्वदेववर्णे याज्यानुवाक्ये भवतः समृद्ध्या उपाचाग्यपृडं हिरण्मयं दक्षिणा सजातानेवास्मा उपदधाति तदेतदनुवर्त्म नाम हविः सजातानेवास्मा अनुवर्त्मना करोति' (11-1) । अत्र केवलं सजातकाम इति सामान्यत इव प्रतिपादनेऽपि अस्या इष्ट्या राजविषयत्वं सुस्पष्टं भवति । क्षत्रायैव विशमनुनियुनक्ति क्षत्रेणैव विशं उभयतः परिगृह्णाति । सजातानेवास्मा उपदधाति तदेतदनुवर्त्म नाम हविः सजातानेवास्मै अनुवर्त्मनः करोति' इत्यादिप्रतिपादनम् अस्या इष्ट्या राजविषयत्वं स्पष्टीकरोत्येव । 'बार्हस्पत्यं चरुं निर्वपेत् सजातकामः तस्य गणवती याज्यानुवाक्ये स्यातां बार्हस्पत्या वै ब्राह्मणे देवतया स्वमेव देवतां भूयिष्ठेनार्पयति । गणवती याज्यानुवाक्ये भवतः सजातैरेवैनं गणिनं करोति' (1·4) । अत्रापि राजप्रस्तावो नास्ति । प्रत्युत ब्राह्मणसम्बन्धस्य अवकाशोऽस्ति । परं तु 'सजातैरेवैनं गणिनं करोति' इति गणवत्त्वं प्रतिपाद्यते । मैत्रायणीसंहितायाम् अधो निर्दिष्टेषु स्थलेषु ग्रामकामसजातप्रस्तावोऽस्ति । 'मारुतं चरुं निर्वपेत् पयसि

प्रैयंगवम् ग्रामकामः पृश्निनां गवां दुग्धे पृश्नीनां गवामाज्यँ स्यात्। तत्रापि गोमूत्रस्याश्चोतयेयुः। पृश्निर्वै यददुहत् स प्रियङ्गुरभवदिय॰वै पृश्नीर्वागवा तस्य वा एतत् पयो यत् प्रियंगवः स्वनैनैनां पयसाछैति प्रियवती याज्यानुवाक्ये भवतः प्रियमेव॰सजातानां करोति'। अत्र दृश्यमानं निरूपणं मैत्रायणीसंहितावदेव 'प्रियमेवैनं सजातानां करोति' इत्यादिकं अवश्यं द्रष्टव्यमेव। (12-1-8) 'बार्हस्पत्यं चरुं निर्वपेत् पयसि ग्रामकामः पशुकामो वा सजातैं गणिनं करोति' (2-2-3)। इदमपि काठकसंहितावदेव। 'आग्नेयमष्टाकपालं निर्वपेत् मैत्रावरुणीयं पयस्यां ग्रामकामिनं याजयेत् स्वामेव देवतां प्रायश्चित्य उपासरत्। वरुणगृहीतो वा एषः यो ग्रामकामः। पय एष इच्छति यो ग्राममिच्छति। अथ यत् पुनः समूहति ग्रामेणैवैनं समूहति' (2-3-1)। अत्र यद्यपि इष्टिः ग्रामकामस्य विहिता, परं तु न सजातप्रस्तावो अस्ति पय एष इच्छति यो ग्राम इच्छतीति श्रूयमाणम् अस्मिन् प्रकरणे ग्रामशब्दस्य देशपरत्वेऽनुकूलं भवेत्। तैतिरीयसंहितारीत्या इतः परं निरूपयामः। अस्यां संहितायां ग्रामकाम इत्येव सर्वत्र पठ्यते। मैत्रायणीसंहितावत् काठकसंहितायां पुनरनेकेषु स्थलेषु ग्रामकाम इति स्थाने सजातकाम इति पठ्यते। नैवं तैत्तिरीयसंहितायां। मैत्रायणीसंहितायां च अयमपरो विशेषः। तैत्तिरीयसंहितायां ग्रामकामेष्टिप्रकरणेषु 'सजातान् प्रयच्छन्ति ग्राम्येव भवति' इति फलं प्रतिपाद्यते, नैवमन्यासु संहितासु। 'वायवे नियुत्वत आलभेत ग्रामकामो वायुर्वा इमाः प्रजाः नस्योतानेनीयते वायुमेव नियुत्वन्त॰स्वेन भागधेयेनोपधावति स एवास्मै प्रजानस्योता नियच्छति ग्राम्येव भवति नियुत्वेते भवति ध्रुवा स्मा अनपगाः करोति' (2-1-1-1)। अत्र कश्चन ग्रामकामो वर्तते। स च राजा एव। यतोऽत्र प्रजाशब्दः प्रयुज्यते। अत्रापि प्रजानां नेतृत्वं प्रतिपाद्यते। तत्र प्रजा ग्रामकामस्य सर्वथा स्वाधीना वर्तन्त इति प्रतिपादयितुं 'न स्योतानि यच्छति' इत्युच्यते। ये तत् इष्टिकरणानन्तरं प्रजा अस्य ध्रुवा भवन्ति अस्माद् न अपगच्छन्ति इत्युच्यते। 'इन्द्राय मरुत्वते पृश्निसक्थमालभेत ग्रामकाम इन्द्रमेव मरुत्वन्त॰स्वेन भागधेयेनोपधावति स एवास्मै सजातान् प्रयच्छति ग्राम्येव भवति यदृषभस्तेनैन्द्रो यत् पृश्निस्तेन मारुतः समृद्ध्यै पश्चात् पृश्निसक्थो भवति पश्चादन्वासायिनीमिवास्मै विशं करोति' (2-1-3&2)॥ यद्यपीयमपीष्टिर्ग्रामकामस्यैव, तथापि अत्र ग्रामकामो राजा एव निश्चीयते। 'पश्चादन्ववसायिनीम एवास्मै विशं करोति' इति श्रवणात् 'सजातान् प्रयच्छन्ति ग्राम्येव भवति इति' इत्यपि श्रूयते। 'वैश्वदेवं बहुरूपमालभेत ग्रामकामः। वैश्वदेवा वै सजाताः विश्वानेव देवान् स्वेन भागधेयेनोपधावति त एवास्मै सजातान् प्रयच्छन्ति ग्राम्येव भवति' (2-1-6&4) 'वैश्वदेवीं बहुरूपां आलभेत ग्रामकामः वैश्वदेवा वै सजाताः विश्वानेव देवान् स्वेन भागधेयेनोपधावति त एवास्मै सजातान् प्रयच्छन्ति ग्राम्येव

भवति । रस इव खलु वै सजाताः । रसं सजातान् अवरुन्धे' (2-1-7-7-6) । अत्र सजातानां रसत्वनिरूपणमधिकम् । 'वैश्वानरं द्वादशकपालं निर्वपेत् मारुतं सप्तकपालं ग्रामकाम आहवनीये वैश्वानरमधिश्रयति गार्हपत्ये मारुतं पापवस्यसस्य विधृत्यै द्वादशकपालो वैश्वानरो भवति द्वादश मासाः सँवत्सरः सँवत्सरेणैवास्मै सजाताँश्च्यावयति मारुतो भवति मरुतो वै देवानां विशो देवविशेनैवास्मै मनुष्यविशमवरुन्धे सप्तकपालो भवति । सप्तगणा वै मरुतः गणश एवास्मै सजातानवरुन्धे । अनूच्यमान आसादयति विशमेवास्मा अनुवर्त्मानं करोति' । (2-2-5&6) । अत्रापीयमिष्टी राजविषयैव । यतो विश एवास्मा अनुवर्त्मानं करोति इति श्रूयते । "ऐन्द्रमेकादशकपालं निर्वपेन्मारुतँसप्तकपालं ग्रामकाम इन्द्रं चैव मरुतश्च स्वेन भागधेयेनोपधावति त एवास्मै सजातान् प्रयच्छन्ति ग्राम्येव भवति आहवनीय ऐन्द्रमधिश्रयति गार्हपत्ये मारुतं पापवस्यसस्य विधृत्यै सप्तकपालो मारुतो भवति सप्तगणा वै मारुतो गणश एवास्मै सजातानवरुन्धेऽनूच्यमान आसादयति विशमेवास्मा अनुवर्त्मानं करोति' (2 2-11-1) । इयमपीष्टी राज्ञ एव । यतो 'गणश एवास्मै सजातानवरुन्धे । विशमेवास्मै अनुवर्त्मानं करोति' इति श्रूयते । 'ऐन्द्रमेकादशकपालं निर्वपेत् वैश्वदेवं द्वादशकपालं ग्रामकाम इन्द्रं चैव विश्वाँश्च देवान्त्स्वेन भागधेयेनोपधावति त एवास्मै सजातान् प्रयच्छन्ति ग्राम्येव भवत्यैन्द्रस्यावदाय वैश्वदेवस्यावद्येदथैन्द्रस्योपरिष्टा-दिन्द्रियेणैवास्मा उभयतः सजातान् परिगृह्णात्युधारय पूर्वयं वासो दक्षिणा सजातानामुपहित्यै पृश्नियै दुग्धे प्रैयंगवं चरुं निर्वपेन्मरुद्भ्यो ग्रामकामः पृश्नियै वै पयसो मरुतो जाताः पृश्नियै प्रियंगवो मारुताः खलु वै देवातया सजाता मरुत एव स्वेन भागधेयेनोपधावति त एवास्मै सजातान् प्रयच्छन्ति ग्राम्येव भवति प्रियवती याज्यानुवाक्ये भवतः प्रियमेवैनँसमा-नानां करोति ।' इयमपि इष्टी राज्ञ एव । विशेषस्तु 'इन्द्रियेणैवास्मै उभयतः सजातान् परिगृह्णाति । सजातानामुपहित्यै' (2-2-11&3) इति श्रूयते 'बार्हस्पत्यं एकादशकपालं निर्वपेत् ग्रामकामः । ब्रह्मणस्पतिमेव स्वेन भागधेयेनोपधावति स एवास्मै सजातान् प्रयच्छति ग्राम्येव भवति गणवती याज्यानुवाक्ये भवतः सजातैरेवैनं गणवन्तं करोति' (2-3-3-4) । अत्र सजातैः गणवत्त्वं ग्रामकामस्य प्रतिपाद्यते । इयमपि इष्टी राज्ञ एव । अतश्च सजातैरेव ग्रामकामो ग्रामी भवति । एषु स्थलेषु श्रूयमाणो ग्रामशब्दो न वासस्थानपरः, अपि तु जनसमुदायपर एव । सजाताधीनत्वं राज्ञो दृश्यते । यथा राज्ञः तथा ग्रामण्योऽपि सजाताधीनत्वं वर्तते ॥

॥ राजा ॥

राजाख्यं स्थानम् ऋग्वेदादारभ्य सर्वेष्वपि वेदभागेषु असकृत् प्रस्तुतम् । क्षत्रतत्त्वमूलकं चेदं तत्त्वम् । राजशब्दवत् राज्यशब्दोऽपि बहुत्र वर्तते । "हिन्वंति संराज्यं रोदस्योः" । (ऋक्सं. 7-6-2) राष्ट्रशब्दश्च बहुवारं प्रयुक्तः । (ऋक्सं. 4.42.17.8.4.217.34.1 10.109.3.10.124.41) । केचन राजानो नाम्नापि समुल्लिखिताः । सौमकः, सुदासः पुरुकुत्सः, सञ्जयः, दैवरातः, सहदेव्यः, तूर्फयाणः, दिवोदासः इत्यादयः । अन्येषु मन्त्र-ब्राह्मणभागेषु परीक्षित्, जनमेजयः, मरुत् इत्यादयो बहवः शताधिका राजान उल्लिखिताः ॥

ऋङ्मन्त्रेषु श्रूयमाणराजतत्त्वविषये किञ्चिदिवाभिप्रायभेदो वर्तते । ऋङ्मन्त्रराजतत्त्वम् एकजातीयजनमात्रविश्रान्तमासीत् । पश्चादेवानेकविधजनसमुदायवासभूतदेशसम्बन्धितया राजतत्त्वस्य प्राप्तिरिति केचिद्वदन्ति । इदं न समीचीनम् यतः ऋङ्मन्त्रेष्वेव राजतत्त्वस्य तत्तज्जातिसम्बन्धदेशसम्बन्धाभ्यां व्यवहारदर्शनात् । तृत्सूनां राजा, भारतानां राजा, सञ्जयानां राजा इति जातिसम्बद्धराजतत्त्वस्य व्यवहारवत् "राजा विश्वस्य भुवनस्य" "इन्द्रो राजा जगतश्चर्षणीनां" इति बहुजातिसमुदायगर्भदेशसम्बद्धतयापि राजतत्त्वस्य प्रस्तुतत्वात् । अतः ऋङ्मन्त्रेषु तत्तन्नाम्ना जनानामुल्लेखनात् राजतत्त्वमपि तत्तज्जनमात्रविश्रान्तमिति यथा निर्णीयते, तथा देशसम्बन्धितयापि राजतत्त्वमङ्गीकृतमिति अकामेनाऽप्यभ्युपगन्तव्यमेव । किं च, ये तावत् ऋङ्मन्त्रेषु जातिसम्बन्धिराजतत्त्वं पश्यन्ति तेषामयमाशयः ऋङ्मन्त्रकाले जनाः तत्तज्जातीयनाम्ना विभक्ता इतस्ततः सञ्चरन्त एवासन् । तादृशानां जनानां विशिष्य केनापि प्रदेशेन सम्बन्धो नासीत् । अत एव ते जना जातिनाम्ना व्यवहृताः । राजतत्त्वमपि तत्तज्जनमात्रपर्याप्तमपि इदमपि नाङ्गीकारार्हम्, यतः ऋङ्मन्त्रेषु प्रतिपाद्यमाना जना नैकत्र स्थिरवासं प्राप्ताः; सञ्चारिण एवेत्यत्र ऋग्वेदे प्रमाणाभावात् । प्रत्युत ऋङ्मन्त्रकालीना जनाः स्वस्वस्थानेषु स्थिरा एवासन् । ते चान्यैर्जनैर्यदा युद्धार्थमाक्रान्ताः तदा अन्यजनाक्रमणनिराकरणार्थम् उद्युक्तवन्त इति दृश्यते । राजतत्त्वकथनं संचारकाल एव आवश्यकतया कृतमिति वादोऽप्यकिञ्चित्कर एव । एकत्र स्थिरवासं प्राप्तानामेव जनानां राजतत्त्वस्यावश्यकता भवेत् ॥

ऋङ्मन्त्रेषु राजतत्त्वस्य प्रवेशः समजनि इत्यस्माकमभिप्रायः । ऐतरेयब्राह्मणे च तादृशराजतत्त्वस्य प्रारम्भसूचकः कश्चनेतिहासोऽपि दृश्यते "देवासुरा एषु लोकेषु

समयन्त तत एतस्यां प्राच्यां दिश्ययतन्त । तान् ततो असुरा अजयन् । ते दक्षिणस्यां दिश्ययतन्त । तान् ततो सुरा अजयन् । ते प्रतीच्यां दिश्ययतन्त । तान् ततो असुरा अजयन् । त उदीच्यां दिश्ययतन्त । तान् ततो न पराजयन्त । सैषा दिगपराजिता । तस्मादेतस्यां दिशि यतेत । यातयेद्वा । ईश्वरो हा नृणां कर्तोः । ते देवा अब्रुवन् । अराजतया वै नो जयन्ति राजानं करवाम हा इति । तथेति ते सोमं राजानमकुर्वन् । ते सोमेन राज्ञा सर्वा दिशोऽजयन्" (ऐत. ब्रा. 1-14-11) ॥

तथा तैत्तिरीयब्राह्मणे (1-5-9) च युद्धार्थमेव राजा परिकल्पित इति प्रतिपादयितुं कश्चनेतिहासो दृश्यते । "देवासुराः संयत्ता आसन् । स प्रजापतिरिन्द्रं ज्येष्ठं पुत्रं पन्यधत्त । नेदेनमसुरा बलीयांसो हनन् इति । प्रह्लादो वै कायाधवः । विरोचनं स्वं पुत्रमपन्यधत्त । नेदेनं देवा अहनन्' इति । 'ते देवाः प्रजापतिमुपसमेत्योचुः । नाराजकस्य युद्धमस्ति । इन्द्रं अन्विच्छमेति' । उभाभ्याम् इतिहासाभ्यां युद्धकाले राज्ञ आवश्यकता सूचिता । युद्धकालेऽपि यस्य नेतृत्वे स्वरूपयोग्यता अस्ति तस्यैव नेतृत्ववरणम् इत्यन्यत्रेतिहासमुखेनोक्तम् । (तै. सं. 2·4 2) देवासुराः संयत्ता आसन् । ते देवा अब्रुवन् यो नो वीर्यावत्तमः तमनुसमारभामहा इति । त इन्द्रमब्रुवन् । त्वं वै नो वीर्यावत्तमोऽसि । त्वामनु समारभामहा इति' । यथा तथा वा भवतु । युद्धकाले राजतत्त्वप्रतिपादकेषु मन्त्रब्राह्मणवाक्येषु शान्तिकालेऽपि तस्यावश्यकता सम्यक् प्रतिपाद्यते । सभासमित्यादयः प्रतिष्ठितानामेव जनानां संभवन्ति । धर्मस्य राज्ञः संबन्धं प्रतिपादयद्वेदवाक्यं समाधानकालेऽपि राज्ञ आवश्यकत्वं सुस्पष्टं प्रतिपादयति । अश्वमेधीयानुभूद्धोमे राज्ञा मनुष्यान् (तै. सं. 7-3-14) इति कश्चन मन्त्रः श्रूयमाणः प्रजानां राज्ञाधिष्ठितत्वं वदति । अतश्च राजतत्त्वस्योत्पत्तिरुभयोरपि कालयोः समानैव । अथर्ववेदे व्रात्यकाण्डे व्रात्यस्य महिमानं वदन् वेदो राजतत्त्वस्योत्पत्तिमाह । "सोरज्यत । ततो राजन्यो अजायत । स विशः सबन्धून् अन्नमन्नाद्यं अभ्युदतिष्ठत् । विशां चैव सबन्धूनां च अन्नस्य च अन्नाद्यस्य च प्रियं धाम भवति । य एवं वेद ।" (15·8) । अत्र राजन्यशब्देन राज्ञ एवोत्पत्तिर्वर्ण्यते । राजशब्दस्य रञ्जनार्थत्वं मनसि निधायैव 'स अरज्यत' इति वर्ण्यते । राज्ञो विशां च वर्तमानं सन्निहितं सम्बन्धं मनसि निधायोत्पद्यमानो राजा 'विशः अभ्युदतिष्ठत्' इति प्रतिपादयति । तेन ज्ञायते प्रजार्थमेव राजा इति । प्रजानां रक्षणार्थं च राजतत्त्वस्योत्पत्तिरपि इति च ज्ञायते । विशां राज्ञश्च सम्बन्धं प्रतिपादयितुं विशः सबन्धूनिति विशेष्यन्ते । समनन्तरमेव विशां सभायाः समितेश्च प्रस्तावो वर्तते । 'स विशोऽनुव्यचलत् । तं सभा च समितिश्च सेना च अनुव्यचलत्' इति । ऋग्वेदकालात् पूर्वमेव तादृशतत्त्वस्योत्पत्तिरभूत् इत्यपि ज्ञायते । ऋग्वेदे श्रूयमाणं राजतत्त्वम् अधिकारे

पूज्यतायाम् ऐश्वर्ये च संपूर्णमेव । एतादृशराजतत्त्वमेवान्यवेदभागेष्वपि दृश्यते । राज्ञो यतो लोकव्यवहारे उत्कृष्टत्वम् अत एव देवतापि राजत्वेनापि स्तूयते । 'वरुणो राजा सोमो राजा' इति प्रायः सर्वा अपि देवता राजत्वेन स्तूयन्ते । तथान्यत्र तैत्तिरीय-जैमिनीयब्राह्मणयोः समाधानकाले राजतत्त्वस्योत्पत्तिरितिहासमुखेन प्रतिपादिता । तैत्तिरीयब्राह्मणे एवमितिहासः पठ्यते-"प्रजापतिरिन्द्रमसृजतानुपावरं देवानाम् । तं प्राहिणोत् । परे हि एतेषां देवानामधिपतिरेधीति । तं देवा अब्रुवन् कस्त्वमसि । वयं वै त्वच्छ्रेयाँसस्स्म इति । सोऽब्रवीत् । कस्त्वमसि । वयं वै त्वच्छ्रेयाँस स्म । इति मा देवा अवोचन् इति । अथवा इदं तर्हि प्रजापमोहर आसीत् । यदस्मिन् अदित्ये । तदेनमब्रवीत् । एतन्मे प्रयच्छ । अथाहमेतेषां देवानाम् अधिपतिर्भविष्यामीति । कोऽहं स्या इत्यब्रवीत् । एतत्प्रदायेति । एतत्स्था इत्यब्रवीत् । यदेतत् प्रवीणीति । को ह वै नाम प्रजापतिः । तदस्मै यं कृत्वा प्रत्यमुञ्चत् । ततो वा इन्द्रो देवानामधिपतिरभवत् स चन्द्रं म आहरेति प्रलपत् । सुवीर्योमर्यायथागोपायात इति । कश्नास्मि न्वा इदम् इन्द्रियं प्रस्थादिति । अयं वा इदं परमोऽभूदिति । तत्परमेष्ठिनः परमेष्ठित्वम् । (तै. ब्रा. 22-10.1, 2-31) ॥

अत्र देवानामधिपतित्वेनेन्द्रो नियुक्तः । देवानाजगाम इन्द्रस्य देवेष्ववरत्वात् यदा देवा इन्द्रं नाङ्गीकृतवन्तः तदा स्ववैशिष्ट्यप्रदर्शनार्थं प्रजापतिं किमपि याचितवान् इन्द्रः तदा प्रजापतिः किमप्याभरणं दत्तवान् । तेनेन्द्रस्य देवान्तरापेक्षया वैलक्षण्यं समजनि । तं देवा अङ्गीकृतवन्तः । स चन्द्र इवाह्लादकरोऽभवत् । वीर्यवान् इन्द्रियवान् अपि अभवत् इति प्रतिपाद्यते । अनेन राज्ञो आवश्यका अंशाः प्रतिपादिताः । नात्र युद्धप्रस्तावोऽस्ति । जैमिनीयब्राह्मण एवमितिहासः पठ्यते 'अथ वरुणसामवरुणो राजा सममित्रान्याभिर्देवताभिरासीत् । सोऽकामयत । सर्वेषां देवानामाधिपत्याय सूयेतेति । स प्रजापतौ शतं वर्षाणि ब्रह्मचर्यमवसत् । तस्मादेतत्सामाब्रवीत् । एतद्वै मे राज्यं रूपं गच्छ । राजानं त्वा देवाः करिष्यन्तीति । स देवानभ्यैत् । तमायान्तं दृष्ट्वा देवाः प्रत्यवरोहन् । तानब्रवीत् मा मा प्रत्यवरुक्षत । भ्रातरो वै मम यूयं स्थ । यादृशा वै यूयं स्थ तादृग् अयमस्मीति । नेत्यब्रुवन् । यद्वै नः पितुः प्रजापते रूपं तदिदं मयि पश्याम इति । तं प्रत्यवरोहन् । तस्मा एतां राजासन्दीं न्यदधुः । तस्यामेनमभ्यषिञ्चन्त वसवो राज्याय । रुद्रा वै राज्याय । आदित्याः स्वाराज्याय । विश्वे देवाः सम्राज्याय । मारुतः सार्ववश्याय । साध्याश्चाप्त्याश्च पारमेष्ठ्याय । तदेतत् श्रीसवः साम । अश्नुते श्रियं गच्छति राज्यम् । य एवं वेद । यदु वरुणो राजापश्यत् तस्माद्वरुणसामेत्याख्यायते, (जै. ब्रा 3-152) ॥

अत्रापि समाधानकाले राजतत्त्वस्योत्पत्तिः प्रतिपादिता । देवा यदा वरुणे स्वापेक्षयातिशयितरूपं दृष्ट्वा प्रत्यवरोहन् इत्युच्यते । वरुणायासनमाहृत्याभिषेकं कृतवन्त इति ॥

जनरक्षकत्वं च राज्ञः "जनस्य गोपाः" इति प्रतिपादितम् । मन्त्रब्राह्मणेषु श्रूयमाणान् राजसम्बन्धिविशेषान् उदाहरिष्यामः । जना राज्ञोऽलंकारभूताः । "समर्भृजा न आयुभिरिभो राजेव सुव्रतः" (ऋक्सं. 9-57-31) स च सुव्रतः । "राजेव सुव्रतः" (ऋक्सं. 9-57-3-9-20-5) "राजेव क्रतुमान्" "अनेन विश्वाद्यनिघ्नदुरिता पवस्व" (ऋक्सं. 9-90-6) "राजेव युध्वा नयसि त्वं" (ऋक्सं. 10-75-4) एताभ्यां मन्त्रभागाभ्यां राज्ञो युद्धसम्बन्ध उक्तः । "राजान इव त्वेष संदृशः" (ऋक्सं. 1 85-8) अनेन द्युतिमत्वं राज्ञः प्रतिपाद्यते । राजा जयदायकः "राजेव जे" (6-4-4) । "सः मित्रं प्रमिनाति" "राजा न मित्रं प्रमिनाति धीरः" । राज्ञो मित्रवत्त्वं चान्यत्रापि प्रतिपादितम् । "हितमित्रो न राजा" (ऋक्सं. 1-73 3) । पालनेन युद्धकरणेन च राजा प्रशस्तः । (ऋक्सं. 9-10-3) "राजानो न प्रशस्तिभिः" "स स्वबलेनैव शत्रून् जयति" (6-90-6) । सः जरारहितः । दृढाङ्गः । राज्ञो बहिः महताडम्बरेण पर्यटनानन्तरं स्वगृहागमनं चोदाहृतम् । "अस्तं राजेव सत्पतिः (ऋक्सं. 1-130-1) । राजा समितिमागच्छति । "राजानसत्यः समितीरियानः" (ऋक्सं. 9-92-6) । राजा स्वजनैः सहाऽम्बरेण आगच्छति (ऋक्सं. 4-4-1) । अत्र इभशब्दो गजपरतया सायणेन व्याख्यातः । स्वासने राजा सम्यक् निषीदति । "राजेव दस्मनिषदः" (ऋक्सं. 10-43-2) । स्वजनानां मध्ये वर्तते । "विशो राजेव सीदति" (ऋक्सं. 9-7-5) महतालंकारेण युक्तः "राजानो न चित्राः सुसंदृशः" (ऋक्सं. 10-78-1) । दर्शनीयश्च । "राजेव दस्म" (ऋक्सं. 9 82) स्वस्त्रीभिः सुखं वर्तते । "राजेव हि जनिभिः क्षेषि" (ऋक्सं. 7-18-2-1) । स्वजनानां मध्ये निषीदति । अत्र वरुणो लोके वर्तमानस्य राज्ञः प्रतिमानभूतः । तत्किरीटस्य प्रस्तावो वर्तते । हिरण्मयं द्रापिं स बिभर्ति । तथा स्वर्णमयीभिः तन्तुभिः कृतं परिधत्ते । "बिभ्रद्द्रापिं हिरण्मयं वरुणो वस्त निर्णिजम्" । तमभितः चाराः वर्तन्ते । "परिस्पशो निषेदिरे" (ऋक्सं. 1-25 3-1) । राज्ञः प्रभूतधनवत्त्वं ऐश्वर्यवत्त्वं च राजस्तुतिभ्यो ज्ञायते । बहूनां सूक्तानां दानस्तुतिरिति नाम । (ऋक्सं. 7-18-22-18-3-2 18-4-191) । यत्र च ऋषयो राज्ञा दत्तम् ऐश्वर्यं प्रशंसन्ति । अन्यत्रापि सूपकालः दर्शनीयः । क्षत्रियरूपं पुरुषरूपो जायते (जै. ब्रा. 1-187) । अत्र राज्ञा दर्शनीयत्वम् । अतो राजानो महैश्वर्यवन्त इति ज्ञायते । परीक्षितः तनयस्यैश्वर्यं विस्तरेण प्रतिपादितम् अथर्ववेदीय कुन्तापसूक्ते । राजानश्च समग्रमैश्वर्यं भुक्त्वैव दानं कुर्वन्ति । आधुनिकरीत्या ऋग्वेदकाले राज्ञां वरणमेवाभूत् पश्चात्काले राजानः परम्परया राजानोऽभूवन् । राजविषये ऋग्वेदे पठ्यमानं सूक्तद्वयमत्यन्तसमीचीनतया वर्तते ॥

आत्वाहार्षमन्तरेधि ध्रुवस्तिष्ठा विचाचलिः ।
विशस्त्वा सर्वा वाञ्छन्तु मा त्वद्राष्ट्रमधि भ्रशत् ।

इहैवैधि मापच्यौष्ठाः पर्वत इवा व चाचलिः ।
इन्द्र इहैव ध्रुवस्तिष्ठेह राष्ट्रमुधारय ।
इ—मिंद्रो अधीधरत् ध्रुवं ध्रुवेण हविषा ।
तस्मै सोमो अधिब्रव तस्मा उ ब्रह्मणस्पतिः ।
ध्रुवा द्यौः ध्रुवा पृथिवी ध्रुवासः पर्वता इमे ।
ध्रुवं विश्वमिदं जगत् ध्रुवो राजा विशामयम् ।
ध्रुवं ते वरुणो राजा वरुणो ध्रुवं देवो बृहस्पतिः ।
ध्रुवं त इन्द्रश्चाग्निश्च राष्ट्रं धारयतां ध्रुवम् ।
ध्रुवं ध्रुवेण हविषाभिसोमं मृशामसि ।
अथो त इन्द्र केवली विशो बलिहृतस्करत् ॥

अत्र प्रथमायां ऋचि राज्ञः स्थैर्यं प्रार्थ्यते । सर्वाभिः प्रजाभिः वाञ्छनञ्च विशेषितम् । मा त्वद्राष्ट्रमधि भ्रशत् इति प्रजावाञ्छाभावे राज्यभ्रंशो भवेत् इति च सूचितम् । द्वितीये मन्त्रे ध्रुवः स राष्ट्रं धारयेति प्रार्थ्यते । तृतीये मन्त्रे एतादृशं राजानमिन्द्रो धारयत् । अन्या अपि देवा एतद्विषये आदृतवन्त इति सूचितम् । चतुर्थे मन्त्रे यथा द्यौः ध्रुवा पृथिवी पर्वताश्च विश्वं जगदपि । एवमयं राजापि ध्रुवो भवतु इति प्रार्थ्यते । वरुण-बृहस्पति-इन्द्राग्नयोऽस्य राष्ट्रं ध्रुवं धारयन्तु इति प्रार्थ्यते । अन्ते षष्ठे मन्त्रे विशां बलिहृत्त्वं प्रार्थ्यते । समनन्तरसूक्तं च राजविषयमेव । अभिराष्ट्राय वर्तय इति प्रार्थ्यते । आश्वलायनगृह्यसूत्रानुसारेणेदं सूक्तं राज्ञा वक्तव्यम् । पुरोहितो राजानं वाचयति । (आ. गृह्य. 3-12-12) । अथैनं रथमाणम् उपरुह्य अभीवन्तं वाचयति । पूर्वमपि युद्धविषयतया निर्णीतम् । (आ. गृ. 3-12-2) । "आ त्वा हार्षमन्तरेधि" इति पश्चाद्रथस्यावस्थाय । परं तु द्वितीयसूक्ते अभीवर्तनामकस्य हविषः प्रस्तावोऽस्ति । पूर्वसूक्तस्यापि युद्धसंबन्धो न स्पष्टः । मन्त्रलिङ्गपरिशीलने प्रथमसूक्तस्याभिषिक्तस्य राज्ञः, अथ वा अभिषेककाले वा अभिमन्त्रणार्थो दृश्यते । अथर्ववेदे राजविषयके एकं सूक्तं पठ्यते । (अ. सं. 4-22)

"इममिन्द्र वर्धय क्षत्रियं म इमं विशमेकवृषं कृणु त्वम् ।
निरमित्रानक्ष्णुह्यस्य सर्वां स्तान् धयास्मा अहमुत्तरेषु ।
एमं भज ग्रामे अश्वेषु गोषुनिष्टं भजयो अमित्रो अस्य ।
वर्ष्म क्षत्राणामयमस्तु राजेन्द्र शत्रुं रन्धय सर्वमस्मै ।
अयमस्तु धनपतिर्धनानामयं विशां विश्वतिरस्तु राजा ।
अस्मिन्निन्द्र मयि वर्चांसि धेह्यवर्चसं कृणु हि शत्रुमस्य ।

अस्मै द्यावापृथिवी भूरि वामं दुहाथां घर्मदुघे इव धेनू ।
अयं राजा प्रिय इन्द्रस्य भूयात्प्रियो गवामोषधीनां पशूनाम् ।
युनज्मि त उत्तरावन्तमिन्द्रं येन जयन्ति न पराजयन्ते ।
यस्त्वाकरदेकवृषं जनानामुत राज्ञामुत्तमं मानवानाम् ।
उत्तरस्त्वमधरे ते सपत्ना ये के च राजन् प्रतिशत्रवस्ते ।
एकवृष इन्द्र सखा जिगीवां छत्रूयतामाभरा भोजनानि ।
सिंहप्रतीको विशो अद्धिसर्वा व्याघ्रप्रतीको व बाधस्व शत्रून् ।
एकवृष इन्द्र सखा जिगीवां छयूयतामखिदा भोजनानि ।"

अस्मिन् सूक्ते राजविषये इमे अभिप्रायाः सन्ति । राजा विशाम् ऋषभः । प्रजानां धनेषु भागवान् । क्षत्रस्य ककुदि वर्तते । स च धनपतिः । विशां पतिः । इन्द्रस्य प्रियः । पश्वादीनामपि प्रियः । मानवानामुत्तमः । शत्रुधनानामाहर्ता । सिंह इव स्वप्रजापालने जागरूकः । व्याघ्र इव शत्रूणां बाधकः । राज्ञः कोपस्य च प्रस्तावो वर्तते । "अन्यत्र राज्ञामभियातु मन्युः ।" (अथं. सं. 6-40-2) । राजा अदंण्ड्यः । राजसूये आसन्द्यामासीनं राजानम् अन्ये दण्डैर्घ्नन्ति । इदं हननम् अभिनयमात्रमेव । एवंविधकर्म निरूपयत् ब्राह्मणम् "तस्माद्राजा अदण्ड्यः" इति वदति । अवश्यकाले वैश्याद्धनमाहरति । जैमिनीयब्राह्मणरीत्या राजानः सर्वेऽपि समानमन्त्राः । तथा समानवचनाश्च । अधिकारपरिग्रहानन्तरं राज्ञा यथेष्टं कर्तुं यथेच्छं वक्तुं च न शक्यते । अभिषेकानन्तरं स धृतव्रतो भवति । धृतव्रतत्वं च नियमेन कस्यचिद्व्रतस्य परिपालनम् । अयं चार्थः शतपथब्राह्मणे एवं विवृतः । "धृतव्रतो वै राजा । न वा एष सर्वस्मा इव वदनाय । न सर्वस्मा इव कर्मणे" "यदेव साधु वदेत् यत् साधु कुर्यात्" (श. ब्रा. 5-4-4-5) इति । अनेन राज्ञः अधिकारसङ्कोचः सूचितः । प्रजानां यद्धितं तदेव कर्तुं वक्तुं चायमर्हति । धृतव्रतशब्दः ऋग्वेदेऽप्यष्टादशवारं पठितः । देवताया विशेषणेनायं पठ्यते । देवतासु वरुणो राजत्वेनाङ्गीकृतः । तस्यापि धृतव्रतत्वमुच्यते । "निषसाद धृतव्रतो वरुणः" इति । अयं मन्त्रो राजसूये अभिषेकप्रकरणे राज्ञ आसन्द्यामुपवेशनकाले विनियुक्तः । व्याख्यातं चैतद् ब्राह्मणेन पूर्वोक्तरीत्या । एतच्च धृतव्रतत्वविशेषणं प्रायः सर्वासु देवतासु प्रयुक्तम् । देवताया अपि न स्वच्छन्दतोऽधिकारः कर्मकरणे । एतादृशसङ्कोचः अधिकारस्य ऋङ्मन्त्रकाल एवाङ्गीकृतः । नूतनतया न यजुर्ब्राह्मणेषु वा संहितासु वा कल्पित इति निश्चीयते । तथा अदब्धव्रत इति अनतिलङ्घनीयशासनवत्त्वं देवताया विशेषणत्वेन पठ्यते । विशिष्येदं राजत्वेनाङ्गीकृते वरुणे बहुशः प्रयुक्तम् । धृतव्रतशब्दो वरुणसम्बन्धितया एतेषु स्थलेषु प्रयुज्यते (1-25-8) 'निषसाद धृतव्रतो वरुणः । वेदमासो धृतव्रतः' । (R.V. 1-25-8) 'पिबतु सोमं

वरुणो धृतव्रतः' (R.V. 1-144-11) । 'त्वया ह्यग्ने वरुणो धृतव्रतः' (1-141-9 EXT.) 'मित्रावरुणसंबन्धे, ''युवं दक्षं धृतव्रत' (1-15-6) । 'सनात्सुजातातनया धृतव्रताः' (8-25-2) । इन्द्रावरुणविषये (8-44-25) ''अग्ने धृतव्रताये ते'' । इन्द्रविषये (6-19 5) ''धृतव्रतः धनदाः सोमवृद्धाः'' । सवितृविषये' (4-53-4) ''धृतव्रतः महः आज्यस्य राजति । अदब्धानि वरुणस्य व्रतानि'' (तै. आ. 1-11-11) । किञ्च वैदिकराज्यतन्त्रे केषाञ्चिद्धर्माणां सनातनत्वमङ्गीकृतम् । तेषां परिवर्तने राज्ञो वा प्रजानां वा सर्वथा अधिकारो न वर्तते । धर्माणां राजापेक्षयापि परत्वं वेद एव पठ्यते । अश्वमेधयागे राज्ञा पठनीयेषु मन्त्रेषु ''नमोऽधिपतये'' इति कश्चन मन्त्रभागः अधिपतिं प्रति नमस्कारं प्रतिपादयति । कश्चाधिपतिरिति व्याख्यानावसरे ब्राह्मणेनेदं विवृतम् । ''धर्मो वा अधिपतिः धर्ममेवावरुन्धे'' इति । (तै. ब्रा. 3-8-15-1) अतश्च ज्ञायते राजापेक्षयापि धर्मस्याधिपतित्वमस्तीति । परं तु के ते धर्माः? इति न ज्ञायन्ते । सर्वेषां धर्माणां सनातनत्वमपि न प्रामाणिकम् । येषां कर्मणां सनातनत्वं तत्र राज्ञो रक्षकत्वमेव । ततश्च धर्मानुवर्तित्वं राज्ञामावश्यकमेव । न धर्मनिर्णायकत्वम् । अत एव बृहदारण्यके ''तदेतत्क्षत्रस्य क्षत्रम्'' इत्युक्तम् (बृ. उ. 1-4-14) । सभा समित्यायत्तस्थितित्वात् सभासमित्यादिभिः स्थानैर्निर्णीतस्यान्यथाकरणं न शक्यम् । वैदिकराज्यतन्त्रे हि केषांचिद्धर्माणां सनातनत्वमङ्गीकृतम् । तेषां परिवर्तने राज्ञो वा प्रजानां वा न सर्वथाऽधिकारः । कुत्रचिद्राज्ञो देवतास्वरूपत्वमपि प्रतिपादितम् । ''एषा वै प्रजापतेः प्रत्यक्षतमां यद्राजन्यः । तस्मादेकः सन् बहूनामीष्टे'' । (शत. ब्रा. 5-1-5-16) ॥ सवितृत्वम् इन्द्रत्वं मित्रत्वं वरुणत्वमपि मन्त्रेषु प्रतिपादितम् । ''त्वँ राजन् ब्रह्मासि सवितासि सत्यप्रसवः । त्वँ राजन् ब्रह्मासि इन्द्रोऽसि सत्यौजाः । त्वँ राजन् ब्रह्मासि मित्रोऽसि सुशेवः । त्वँ राजन् ब्रह्मासि वरुणोऽसि सत्यधर्मा । ''(तै. सं. 1-8-16-1) इति हि श्रूयते । सत्यप्रसवत्वेन सवितृत्वम्, सत्यौजस्त्वेनेन्द्रत्वम, सुशेवत्वेन मित्रत्वम्, सत्यधर्मत्वेन वरुणत्वं चात्र प्रतिपाद्यते । न तावता पाश्चात्यदेशेष्विव न राज्ञः साक्षाद्देवत्वम् ॥

यजुर्ब्राह्मणेषु राजसूययागप्रकरणे देवसुवाँ हवींषि कर्तव्यत्वेन विहितानि । अत्र पुनर्गृहपतित्वविशेषिताग्न्यादयो देवता विहिताः । तन्निरूपणावसरे राजतत्त्वस्वरूपमपि निरूपितम् । तत इदं ज्ञायते—ऐश्वर्यप्राप्त्या राजा गृहपतिर्भवति । आरण्यानामपि राजा । पशूनां राजा । वाचस्पतिः । प्रजासु ज्येष्ठः । सत्यपतिः । धर्मपतिश्च । विस्तरेण चैतत् शतपथब्राह्मणे व्याख्यातम् । अन्यत्रापि राज्ञः समृद्धिरुक्ता । राज्यप्राप्त्या ''अपरिमितसमृद्धमु वै राष्ट्रम्'' । (शत. ब्रा. 12-8-3-6) । ''श्रीर्वै राष्ट्रस्य मध्यं''

(तै. ब्रा. 3-9-7-2) इति निरूपणेनापि इदं सिध्यति । "तस्माद्राजा पशून् न पुष्यति" (तै.ब्रा. 3-9-7-3) । नायमापद्गतोऽपि पशून् चारयति । वीणागानब्राह्मणे राज्ञो नित्यश्रीमत्त्वम्, अत एव प्रत्यहं सङ्गीतरसास्वादनं च प्रतिपादितम् । "श्रियमेवास्मिन् तद्दधतः, यदा खलु वै पुरुषः श्रियमश्नुते वीणाऽस्मै वाद्यते" (तै.ब्रा. 3-9-13-1) । राज्ञः प्रोत्साहनार्थं तदपदानप्रतिपादकगीतिघटितवीणागानमपि क्रियते । "इत्ययुध्यथाः, इत्यमुं संग्रामं अहन् इति राजन्यस्य" (तै. ब्रा. 3-9-13-4) । परेभ्यः स्वजनरक्षणाय युद्धं चावश्यकर्तव्यं भवति राज्ञः । "युद्धं वै राजन्यस्य । युद्धेनैवेनं समर्द्धयति" । (तै.ब्रा. 3-9-13-4) । अयं च ब्राह्मणविलक्षणः । "न वै राजन्ये ब्रह्मवर्चसं रमते" (शत.ब्रा. 13-9) इति । प्रजानामनुमतिमन्तरेण वासार्थं गृहदानमपि कर्तुं नायं प्रभवति । प्रजाभिरङ्गीकृतमेवास्य दानं सुदत्तं भवति । राज्ञा स्वतुल्यैर्भूपतिभिर्मैत्र्यप्यवश्यं सम्पादनीया । "हितमित्रो न राजा" ॥ (ऋक्सं. .....)

इतः परं राज्ञः स्वत्वं कुत्र ? कस्मिन् विषयेऽधिकारः ? इति निरूपयामः । राज्ञः प्रजासुतबान्धवेषु न स्वत्वम्, परं तु तद्रक्षणार्थं प्रजाभिर्दत्तभाग एव स्वत्वमिति । तत्रापि यथेष्टविनियोगार्हं स्वत्वं नास्ति; प्रजाभिर्दत्तभागस्य राज्यनिर्वाहार्थत्वात् । तत्र च प्रजानामेवाधिकार इत्यपि वक्तुं शक्यते । निर्वाहविषये राज्ञः प्रजानुसरणस्यावश्यकत्वात् । तथा परं तु युद्धादिभिर्यल्लभ्यते तत्र राज्ञोऽशत्वेन यल्लभ्यते तत्र सम्पूर्णस्वत्वम् । तथा युद्धजयानन्तरम् उद्धारत्वेन यद्राज्ञे दीयते तत्रापि पूर्णस्वत्वम् । तथा स्वरक्षणार्थं कुटुम्बपोषणार्थं च कल्पैश्वर्येऽपि स्वातन्त्र्यमस्ति । तस्माद्राजनि जिगीषमाणे विशः प्रदान-मिच्छन्ति (जै. ब्रा.) "तस्माद्राजा संग्रामं जित्वा उदाजमुदजते" । (मै. सं. 1-10-10X1-4-3-1) । "तस्माद्राजा सङ्ग्रामं जयति अपि तत्र स्थितग्रामणीनां" (का. सं. 28-3) "तस्माद्राजा संग्रामं जित्वा निराजं निरजते" (कापिष्ठलसं X4-2) ॥ हाप्किसन् महाशयस्तु (India, old and New p. 221) राज्ये वर्तमानासु सर्वास्वपि भूमिषु राज्ञो यथेष्ट-विनियोगार्हत्वमासीदिति वदति । इदं तु निर्मूलकमेव । वेदकाले हि क्षेत्रेषु तस्याधिकार आसीत् । जनाः परस्परं क्षेत्रविषये क्रयविक्रयादिकं कृतवन्त इति दृश्यते (तद्यथा—"क्रये पर्यपेते क्षेत्रिणं क्षेत्रं" (जै. ब्रा.) राज्ञो न भूमिविषये स्वत्वम् । युद्धजयेन जनानां क्षेत्रेष्वधिकारो न । अपि तु राज्य एवाधिकारो भवति । यदपीदमुच्यते "विशामत्ता" इति राज्ञो विशेषणात् स्वामित्वं राज्ञ', प्रजाधनेऽपि भवतीति तदपि न संगच्छते । अत्र श्रूयमाणमत्तृत्वं करप्रतिगृहीतृत्वेनैव; न जनद्रव्यभक्षकत्वं राज्ञः । तथा वैश्यजातीयजने वर्तमाने धनविषये राज्ञो वर्तमानोऽधिकारो न तस्य स्वामित्वमुत्पादयति । यतो वैश्यधनविषये राज्ञोऽधिको रक्षणसंरम्भ आवश्यकः । अत एव तत्र राज्ञः तद्धनेऽधिकारविशेषः । अतो

यदा यदा राज्ञो धनापेक्षा तदा तदा वैश्याद्धनमिच्छति । नेदं सर्वसाधारणम् । "क्षत्रियस्य वशे वैश्यं पशव उपतिष्ठन्ते । तस्माद्यदोदः क्षत्रियः कामयते अथाह वैश्य मयि धत्ते वनो निहितं तदाहरेति तं जिनाति । तद्यथा त्वक् कातथा सचते" (शत. ब्रा. 1-3-2-15) । "वैश्यकल्पस्ते प्रजायामाजनिष्यते । अन्यस्य बलिहृत् । अन्यसाध्यो यथाकामज्येयः" (ऐ. बा. 7-29) । अतः प्रजानामेव स्वक्षेत्रधनादिषु स्वत्वम् । राज्ञः तद्रक्षण एवाधिकारः । किं च आवासस्थानदानेऽपि न राज्ञः स्वातन्त्र्यम्; तत्रापि विशामनुमतिरावश्यिकी । "यस्मा उ वै क्षत्रियः विशा संविदानो स्याम वसानं ददाति तत्सीदत्त"मिति (शत. ब्रा. 7-1-1-4) । राज्ञः प्रजापालनाधिकारो द्विविधः—एको युद्धादिकाले, अन्यश्च समाधानकाले । युद्धकरणे राज्ञ एवाधिकारः । यद्यपि राजा प्रजानां साहाय्यमवलम्ब्य योद्धृजनसहायं युद्धं करोति । अथापि राज्यतन्त्रे तत्परतया युद्धविषये राज्ञो वाधिकार इति दृश्यते । "राज्ञो प्रोच्य विशं जिरन्ति" पञ्च-जा. (जै. ब्रा.) । "पचं बा यदि च जना अन्यजातीया, अथवा राज्यसम्बन्धिजनैर्युद्धं कुर्युः तदा नास्य राज्यतन्त्रतत्त्वरीत्या युद्धतत्त्वम्; अपि तु सङ्घर्ष इत्येव नाम । राज्ञा क्रियमाणयुद्धसम्बन्धिनो बहवोंऽशाः मन्त्रब्राह्मणभागेषु प्रतिपादिताः । समाधानकालोक्तत्वं च निरूपितप्रायमेव ॥

राजा राज्यनिर्वाहं स्वेन नियन्त्रितपुरुषद्वारा करोति । एतद्विस्तरस्तु रत्निनिरूपणावसरे द्रष्टव्यः । तथा दण्डनीत्यनुसारेण दण्डने चास्याधिकारः । "राजन्येनाध्यक्षेण वैश्यं घ्नन्ति" (का. सं. 27-4) । जैमिनीयब्राह्मणे राजदण्ड्यत्वं ब्राह्मणस्य नास्तीति प्रतिपादनात् ब्राह्मणभिन्नविषये दण्डाधिकारो राज्ञोऽस्तीति गम्यते । 'तस्माद्ब्राह्मणयो राजन्यस्य ज्येयो अमार्यो अदण्ड्यः ।

॥ पुरोहितः ॥

ब्रह्मक्षत्रयोः ऐकमत्येनावश्यं भाव्यमिति पूर्वं प्रतिपादितम् । अधिकारकाले क्षत्राधिकारो यथा एकस्मिन् क्षत्रिये प्रयुक्तः । एकेनैव कार्यं कर्तुं शक्य इति । सर्वेषां क्षत्रियत्वाविशेषेऽपि क्षत्रियजातौ वर्तमानानां मध्ये एकस्यैव राजत्वम्, तथा सर्वेषामपि ब्राह्मणानां ब्रह्मत्वाविशेषेऽपि एकस्यैव पुरोहितत्वम् । ब्राह्मण एव पुरोहितः । पुरोहिततत्त्वस्य वैदिकराज्यतन्त्रे मुख्यत्वमस्ति । पुरोहितः स्वप्रार्थनया समालोचनेन च राज्यतन्त्रस्योपकारं कुर्वन् उभयोरपि राजप्रजयोः उपकरोति । "न ह वा अपुरोहितस्य राज्ञो देवा अन्नमदन्तीत्युच्यते" (ऐ.ब्रा 8-8-24) । ऐतरेयब्राह्मणे महाभिषेकानन्तरं पुरोहितवरणार्थं पुरोहिततत्त्वस्य प्रशंसां वदति । पुरोधाकामस्य यागविधिरस्ति । ऐतरेयेऽध्यस्य विस्तरो दृश्यते । पुरोहितः आहवनीयत्वेनोक्तः । "पुरोहित एव आहवनीयो भवति" इति । पुरोहितस्योपकारेण राजा क्षत्रं बलं राष्ट्रं विशं च प्राप्नोति । "एषा पुरोहितावसाने विन्दते पुरोधां वा पुरोधामात्रं वा" (जै. ब्रा. 1-286) । पुरोहितः पञ्चमेनिरिति प्रस्तूयते । पञ्चविधोपकारार्थमिदं निरूप्यते— पुरोहितं पूजयन् राजा संरक्षणमेव करोति । पुरोहितः अग्निर्वा एष वैश्वानरः पञ्चमेनिः पुरोहितः । ताभी राजनं परिगृह्य तिष्ठति । समुद्र इव भूमिम् आयुष्य आर्यस्य राष्ट्रं भवति । नैनं पुरायुषः प्रणो जहाति । आजरसं जीवति । न पुनर्म्रियते । यस्यैवं विद्वान् ब्राह्मणो राष्ट्रगोपः पुरोहितः । तस्मै विशः संजायते । संमुखा एकमनसः । यस्यैवं विद्वान् ब्राह्मणो राष्ट्रगोपः पुरोहितः" (ऐ. ब्रा. 8-5) । तत्र च द्वौ मन्त्रौ उदाहृतौ । एकश्च 'स इन्द्राजा प्रतिजन्यानि विश्वा शुष्मेण तस्थावभिवीर्येण । बृहस्पतिं यः सुभृतं बिभर्ति वल्गूयन्ति वन्दते पूर्वभाजम्" । (ऋग्सं. 4-50-7) व्याख्यातं च तत्रैव विस्तरेण । अत्र राजा पुरोहितभरणेन सर्वान् शत्रून् वीर्येणाधितिष्ठति । पुरोहितं च यः स्तौति, वन्दते, पूर्वभाजं च करोति सः प्रतिजन्यान्यपि अधितिष्ठति । अन्यो मन्त्रश्च उदाहृतः । "स इत्क्षेधिमुधित ओकसि स्वे । तस्मा इडा पिन्वते विश्वदानीं । तस्मै विश स्वधर्म वा नमन्ति । यस्मिन् ब्रह्मराजनि पूर्व एति" (ऋग्सं. 3-50 8) । अत्र च यो राजा ब्राह्मणं पुरो दधाति स राजा स्वकीय एव स्थाने तृप्तः सन् सुखेनास्ते । तस्य राज्ये भूमिः सर्वकालफलप्रदा भवति । तस्मै विशो दण्डनमन्त्रेण स्वयमेवानमन्ति इति प्रतिपादितम् । ऐतरेयब्राह्मणे पुरोहितवरणेन राज्ञः सम्भाव्यमानमानुकूल्यं प्रतिपादयति—"तस्यैवं विद्वान् ब्राह्मणो राष्ट्रगोपः पुरोहितः क्षत्रेण क्षत्रं जयति । बलेन बलमश्नुते । यस्यैवं विद्वान् ब्राह्मणो राष्ट्रगोपः पुरोहितः तस्मै विशः संजानते । सम्मुखा एकमनसः" इत्यपि उच्यते । अतः पुरोहितो राज्ञां प्रजानां च मुख्यं स्थानम् । पुरोहितस्थानं

तावत् ऋङ्मन्त्रकालादारभ्य समीपकालपर्यन्तं सुरक्षितम् । पुरोहितशब्दस्य ऋत्विक्परत्वम् । तथा न सर्वब्राह्मणपरत्वम् । अपि तु य एव ब्राह्मणो राज्ञा नियुक्तः स एव पुरोहितः । पुरोहितशब्दश्च यः पूर्वमेव हितं वदति स एव पुरोहित इत्यस्मिन्नर्थे प्रयुक्तः । पुरोहित-शब्दश्च ऋक्संहितायाम् एव बहुवारं प्रयुक्तः । बहुषु स्थलेषु (30) ऋग्वेदे प्रयुक्तः । ऋग्वेदप्रारम्भ एव अग्नेः पुरोहितत्वं वर्णितम् । केषुचित्स्थलेषु एकस्य जनसमूहस्यैकः पुरोहितः । यथा "वसिष्ठः तृत्सूनां पुरोहितः । विश्वामित्रो भरतानाम् । क्षत्रियवंशोत्पन्नो देवापिः शन्तनोः पौरोहित्यमकरोत्" । (R.V.10 98) । "यद्देवापिः शन्तनवे होत्राय वृतः । पुरोहितः स्वप्रार्थनया च । तदा तदा राज्ञ आलोचनकरणेन च राज्ञा संबद्धो दृश्यते । बहवश्च मन्त्राः पुरोहितप्रार्थनारूपत्वेन वर्तन्ते राज्यक्षेमाय" (A. V. 3-19) । अस्मिन् विषयेऽवश्यं द्रष्टव्यम् । "संशितं मे ब्रह्म संशितं वीर्यं बलम् । संशितं क्षत्रं जिष्णु यस्याहमस्मि पुरोहितः । उदेषां बाहू अतिरमुद्वर्च उदूबलम् । क्षिणोमि ब्रह्मणा मित्रानुन्नय स्वा॰अहम् । तै. सं. 4-1-10) । बहवः पुरोहिता वेदेषु निर्दिष्टाः । "दिवोदासं राजानं पुरोहितो भरद्वाजोऽरक्षत्" (P.B. 15-3-7) । "दिवोदासं वै भरद्वाज पुरोहितं नानाजनापर्यत । तस्मा एतेन साम्ना गातुमविन्दत् त्र्यरुणात्र्यस्य राज्ञः पुरोहितः वृश इत्यासीत्" (ऐ.ब्रा. 3-94) । "वृशः वै राजानः त्र्यरुणस्य त्रैवृष्णस्य ऐक्ष्वाकस्य राज्ञः पुरोहित आस" इति । अत्रायमप्यंशः प्रतिपाद्यते—यत्पुरातनकाले पुरोहिता एव राज्ञां सारथयोऽभूवन् । राज्ञः पापेभ्यो रक्षणाय । "अथ ह स्म ततः पुरा राजभ्यः पुरोहिता एव रथान् संगृह्णन्ति । औपद्रष्ट्र्याय । नेदयं पापं करवदिति । उपगुः सौश्रवसः कुत्सस्य पुरोहित आसीत्" (प.वि. 14-6-8) । "उपगुर्वै सौश्रवसः अत्ररोहस्य पुरोहित आसीत्" । अत्र ब्राह्मणे पुरोहितस्य राज्ञश्च कलह इतिहासमुखेन प्रतिपादितः । "सौश्रवशिरोऽपि औदुम्बर्यां अच्छिनत् । तथा राज्ञो जनमेजयस्य कश्यपानां विशन्तरस्य व्यपर्णानां च कलहो ब्राह्मणेषु प्रतिपादितः । (ऐ. ब्रा. 7 27-35) । ऐन्द्रमहाभिषेकप्रकरणे बहवः पुरोहिताः तद्राजानश्च उल्लिखिताः । एकः पुरोहितो द्वयोरपि जनसमूहयोरपि आसीदित्यपि ज्ञायते । देवभागः श्रौतर्षः कुरूणां सृंजयानां च पुरोहित आस । "देवभागः श्रौतर्षः स कुरूणां च सृंजयानां च पुरोहित आस" (श. ब्रा. 2 4-4-5) । "जनुज नूकर्णः काशीविदेहानां कोसलानां च पुरोहित आसीत्" (साङ्ख्यायनश्रौतसूत्रम् 26-29-51) । पौरोहित्यं पारम्पर्यक्रमागतमिति वक्तुं न शक्यते केषुचित् स्थलेषु पौरोहित्यं परम्पराप्राप्तमिति प्रतीयते । शतपथब्राह्मणे पुरोहिताः सर्वस्मिन्नपि काले राज्ञैव संचरन्त आसन्निति प्रतिपादयति । "एकतद्वितत्रिता इन्द्रेण सह संचरन्त आसन्निति वक्तुं लोकव्यवहारे ब्राह्मणा यथा राज्ञा सह संचरन्तीति दृष्टान्तीकृतम् । "त इन्द्रेण सह चेरुः यथेदानीं ब्राह्मणाः" । इति

॥ राज्ञोऽधिकारः ॥

कस्मिन् कस्मिन् विषये राज्ञोऽधिकार आसीदिति समनन्तरं निरूपयामः। अस्मिन्विषये केचनांशाः पूर्वं प्रतिपादिताः। अधिकमत्र निरूप्यते। सामुदायिकव्यवहारविषये निर्णयाधिकारः इदं कर्तव्यमित्यात्मकः सर्वथा स जनायत्तः। तत्र च राज्ञो नाधिकारः कथं कर्तव्यमिति निर्णये परं राज्ञोऽधिकारः। तादृशकार्यजातं निर्वर्तयितुं राज्ञः उपकारकाः पुरुषाश्च सन्ति। युद्धविषये राज्ञ एवाधिकारः। सेनानीः पुनः राजनिर्णीतं कार्यं साधयति। ऋग्वेदे एव सेनानीशब्दः प्रयुक्तः। अयं च सेनानीः साक्षाद्युद्धरङ्गे सेनाया नेता। तद्द्वारा राजा युद्धकार्यं निर्वहति। पञ्चविंशब्राह्मणे युद्धारम्भविषये वा युद्धकरणे वा जनानां नाधिकारः। परं तु राज्ञ एवेति प्रतिपादितम्—तस्माद्राज्ञे प्रोच्य विशं जिनान्ति। तथा समाधानकालीनजनसंरक्षणविषयेऽपि राज्ञ एवाधिकारः "मध्यमशीः" (ऋक्सं. 10-97)। "जीवगृभो यथा" (10 97-12) "उग्रमध्यमशीः" इत्येतद्द्वयमपि राज्ञः "सिविल्" "क्रिमिनल्" अधिकारं प्रतिपादयति इत्याधुनिका अभिनयन्ति। परं तु अन्ये जिम्मर्प्रभृतयः एतन्नाङ्गीकुर्वन्ति। 'मध्यमशीः' इति पदस्य मध्यस्थराजपरत्वं गिल्नर् अभिप्रैति। इदं 'मध्यमशीः' इति पदं न राज्ञा साक्षात्सम्बद्धम्। परं तु 'उग्रो मध्यमशीः' इति कस्यचिदेव प्रतिपादनं दृश्यते। "सजातानां मध्यमस्थाः" (तै. सं 4 1-7-1) इत्यनुसारेण मध्यमस्थपरत्वमेव निर्णीतम्। उग्रशब्दस्य "पोलीस्" अधिकारिपरत्वं मेक्स् मिल्लर् अभिप्रैति। बृहदारण्यकोपनिषदि "तद्यथा राजानं प्रति यान्तमुग्राः प्रत्येनः सूतग्रामण्यः अभिसमायान्ति" (बृह. बा. 4-3-38) इति राजानुचरप्रस्तावे उग्रशब्दो वर्तते। अतश्चोग्रशब्दस्य पोलीस्परत्वे 'मध्यमशीः इति पदस्य "जड्ज्"परत्वमपि अङ्गीकर्तुं शक्यते। अतश्च "उग्रो मध्यमशीः" इति शब्दस्य क्रिमिनल्अधिकारपरत्वात् प्राड्विवाकपरत्वमपि अङ्गीकर्तव्यम् भवति॥

॥ स्पशः (चाराः) ॥

राज्ञो राज्यनिर्वाहे साहाय्यकरणार्थं नियुक्तेष्वधिकारिषु चारा अन्तर्गताः राज्ञा प्रेरिताश्चारा इतस्ततः सञ्चरन्तो राजार्थं वार्तामाहरन्ति । यद्यपि राजा एकस्मिन् प्रदेशे तिष्ठति, अथापि चारद्वारा स्वदेशपरदेशरहस्यवृत्तान्तमपि राजा जानाति 'राजानश्चारचक्षुषः' इति प्रसिद्धिरपि वर्तते । चाराणां स्पश इति ऋक्संहितारीत्या नाम दृश्यते । देवता-राजत्वेन प्रतिपादितास्तेषां चारा अपि उक्ताः । ऋक्संहितायां श्रूयमाणाश्चारसम्बन्ध्यंशाः देवचारसम्बन्धिन एव । अथापि तादृशप्रस्तावानां रूपकत्वात् एतेभ्यो मानुषचारस्वरूप-निर्णयोऽपि कर्तुं शक्यते ।

आचार्यसायणोऽपि स्पशशब्दस्य चारपरत्वमङ्गीकृत्य द्वित्रस्थलेषु व्याख्यानं करोति । अतश्च ऋङ्मन्त्रेभ्यः स्पशाख्यचारविषये यल्लभ्यते तल्लिख्यते । "परिस्पशो निषेदिरे" (1-23-13-1) । अत्र राज्ञः समन्ततश्चारा निषण्णा इति वर्ण्यते । "चक्राणासः परीणहं पृथिव्या हिरण्ययेन मणिना शुम्भमानाः । न हि त्वा नास्ति तुरुस्त इन्द्रं परिस्पशो अदधात् सूर्येण" (1-33 8) । अत्र वृत्रानुचरा उच्यन्ते । स्पशाः भूमिं सर्वदा पर्यटन्ति कण्ठबाह्वादिगतेन हिरण्मयमणिनालङ्कृता अत्यन्तं पृथिवीं प्राप्ताः । "प्रतिस्पशो विसृजतूर्णितमः" (4-4 3) । स्पशां प्रेषणं प्रार्थ्यते । अत्र सायणः स्पश इत्यस्य चारपरत्वं विकल्पेनाङ्गीकरोति । सत्यानृतविवेकार्थं चाराः प्रहिता इति वदति । क्षत्रं देवासो अदधुः सजोषाः परियद्भूदथो रोदसी चिदुर्वी सन्ति स्पशः अदब्धासो अमूराः" (6-67 5) । अत्र चाराः केनापि न हिंस्या अमूढा इत्युच्यते । (अथापि चारपरत्वं स्पश इति पदस्याङ्गीकृतं भाष्यकारेण) "प्रोरोर्मित्रावरुणा पृथिव्या प्रदिवः ऋष्वात् बृहतः सुदानुः । स्पशो दधाते औषधीषु विक्षु ऋधग्यतो निमिषं रक्षमाणाः" (7-51-3) । चाराः सर्वत्र वर्तन्ते । तेषां प्रदेशनियमो नास्ति । राज्ञो विषयं निर्निमेषम् ईक्षन्ते । "परिस्पशो वरुणस्य स्म दिष्टा उभे पश्यन्ति रोदसी सुमेके । ऋतावानः कवयो यज्ञधीराः प्रचेतसो य इषयन्त मन्म" (7-87-3) । चाराः सर्वं पश्यन्ति द्यावापृथिव्योर्मध्ये तेषामविदितं नास्ति । धर्ममार्गानुसारिणः ते क्रान्तदर्शिनः । "आदित्याऽत्रहि ख्यत अधिकूला दिवस्पशः" (8 47-11) । बहुदूरे वर्तमानाश्चाराः पदे पदे सन्ति पाशहस्ताश्च ! सायणभाष्येण सूचितोऽयमर्थः । स्पशाः क्षिप्रगामिनो निमेषं न कुर्वन्ति । सर्वथा जागरूकाः । परस्परसम्बद्धा-

श्चाराः स्पशः स्वञ्च सुदृशो नृचक्षसः" (9-73-7) । गमनशीलां राज्ञो द्रोहं न कुर्युः । सुदर्शना नृणां द्रष्टारः । "न तिष्ठन्ति न निषीदन्ति" (10-10 8) । स्पशा मधुरं वदेयुः । जनेषु वर्तमाना अपि असंगता इव तिष्ठेयुः । एवंविधचाराणां साह्यं राज्ञामपेक्षितम् ॥

॥ दूतः ॥

दूतोऽपि राज्ञामुपकारकः पुरुषः । राजा स्वाभिप्रायम् अन्यराजभ्यो निवेदयितुं दूतान् प्रयुङ्क्ते । दूतद्वारा राजान्तरदेशान्तरवृत्तान्तं राजा जानाति । ऋग्वेदे बहुषु स्थलेषु दूतशब्दः प्रयुक्तः । देवानां दूतविषये प्रयुक्ता अनेके अंशा मानुषदूतविषयेऽपि सङ्गच्छन्ते । यजुःसंहितासु शतरुद्रीये रुद्रो दूतत्वेनोक्तः । "नमो दूताय" इति । दूतवत् प्रहितोऽपि उक्तः । प्रहितोऽपि दूतसदृश एव राजसूययागे दूतानां मुख्यत्वं प्रदर्शयितुं किञ्चन कर्मापि विहितम् । 'सात्यदूतानां हविः' इति तस्य नाम । अन्ते च दूतान् प्रहिणोति इति । अन्यराजेभ्यः दूतप्रेषणमपि विहितम् । अत्र प्रतिपाद्यमाना अभिप्राया अवधानार्हाः । राज्यस्य न एको दूतः । परं तु बहवो दूताः । दूतद्वारा राज्ञः परदेशे परराज्ये च सम्बन्धो वर्तते । दूतस्य राज्ञोऽविच्छिन्नः सम्बन्ध आवश्यकः । यदि राजा दूतेभ्यो विच्छिद्येत तर्हि राज्यतन्त्रमेव उच्छिद्येत । राज्ञो दूतानां चावि-च्छिन्नसम्बन्धसिद्ध्यर्थं सात्यदूतहविराख्यं कर्म विहितम् । अन्ते च फलश्रुतित्वेन "अथो दूतेभ्य एव न च्छिद्यते" इति प्रतिपाद्यते । अयं च दूतो रत्निषु अन्तर्भावितः शतपथे (5-3-1-11) । परं तु अत्र दूतः पलागलशब्देनोक्तः । बहुषु स्थलेषु ऋग्वेदे दूतशब्दः प्रयुक्तः अन्यसंबन्धे (50) । द्वयोः स्थलयोः परं मानुषदूतस्य प्रस्तावोऽस्ति । सुप्रसिद्धमिद-मग्नेर्दूतत्वम् । यतोऽग्नौ होमः क्रियते, ततोऽग्निर्देवेभ्यो मनुष्याणामिष्टमावेदयति । "अग्ने दूतो विशामसि" "जुष्टो हि दूतः" इत्यादि प्रयोगः ऋग्वेदे दृश्यते । सरमा-उपाख्याने च पणीन् प्रति सरमा इन्द्रस्य स्वां दूतीम् (ऋक्सं. 10-10-2) इति वदति । रत्निषु फलागलः कश्चनान्तर्भावितः । तद्वर्णनकाले ब्राह्मणेन "प्रहेयो वै परागतः अध्वानं वै प्रहित एति" (शतपथब्रा. 5 3-1-1) इत्युच्यते । अनेन ज्ञायते फलागलोऽपि दूतविशेष एवेति । स्पष्टमिदमापस्तम्बश्रौतसूत्रे यत्र च फलागलस्यानृतदूतत्वम् उक्तम् (आ.श्रौ.सू. 18-10-26) । ऋग्वेद एव मानुषदूतस्य प्रस्तावो दृश्यते (ऋ.सं. 4-33) "प्रऋभुभ्यो दूतमिव वाचमिष्ये" । दूतस्य प्रेषणम् उदाह्रियते (2-39-1) "दूतेव हव्या जन्या पुरुत्रा" । जनपदेषु राज्ञा प्रहितानां दूतानां सत्त्वं बहुभिः पुरुषैः तदाह्वानं चेदाहृतम् । "दूते वहिष्ठो यशसा जनेषु" (10-106-2) । दूतानां जनपदेषु प्रसिद्धिरुदाहृता । "न दूताय प्रह्वे तस्थे" (10-109-3) । दूतः स्वात्मानं न प्रकाशयति इत्युच्यते । "अन्तर्दूतश्चरति मानुषीषु मर्त्यानामन्तर्मेध्यांश्चरन्ति" (8 43-27) । (तै. ब्रा.

3-7-6)। वाचं दूतो यथोहिष (8-5 3)। दूतः स्वकार्यनिर्वर्तनार्थं याच्ञाप्रदर्शिकां वाचमभिभाषते। "दूतो न धिष्ण्यौ अजीग" (7-6-7-1)। दूतो विदेशवृत्तान्तं राज्ञे प्रोच्य जागरूकं करोति। (8-33-4) दूतः परिष्कृतः (विप्रोदूतः) अजिरो दूतः। (8-101-3) "त्वं दूतः कविर्मेधावी चिकित्वान्" (ऋक्सं 10 21·5)। "आ देवो दूतः" (10 98 2)। "दूतः आशुकारी" (4-7·4)। "अतन्द्रो दूतः" (8 44·6)। "दूतो "विवोचति" (1-105 4)। द्यावापृथिव्योर्मध्ये तस्याविदितं नास्ति। वाचा सर्वत्र संचरति। अथर्ववेदेऽपि बहुत्र प्रयुक्तः। तैत्तिरीयसंहितायामपि अग्निर्देवानां दूत आसीत् इति प्रयुक्तम्। तस्यामेव संहितायां वाङ्मनसोः विवादनिरूपणपराख्यायिकायाम् "दूतीरेव त्वं मनसोऽसि" इत्युक्तम्। जैमिनिब्राह्मणेऽपि दूतविषय एवमुच्यते "तस्मा इदमप्येतर्हि दूतमाहुः अपेहि मन्त्रयित्वा प्रतिवक्ष्यामि" इति। अत्र हि एवं भवति कश्चन दूत आगत्य सभायां वर्तमाने राज्ञि कञ्चन विषयमावेदयति। दूतोक्तविषये मन्त्रालोचनं कर्तुं राजा अभिप्रैति। परं तु तद्दूतस्य पुरस्तात् कर्तुं नेच्छति। अतो राजपुरुषा दूतं वदन्ति "अपसर, मन्त्रालोचनानन्तरं तत्र प्रतिवक्ष्यामि" इति। अतश्चारवद्दूतोऽपि राज्ञ उपकारकः॥

॥ रत्निनः ॥

यद्यपि राजा राज्यनिर्वाहे जनैर्नियुक्तः । अथापि एकेन तेन राज्यं निर्वोढुं न शक्यते । राज्ञः उपकर्तुं बहवोऽधिकारिणो राज्ञैव नियुक्ताः । तेषां साहाय्येनैव राजा राज्यं निर्वहति । यद्यपि तेषां प्रस्तावः साक्षादृग्वेदे नास्ति; अथापि ब्राह्मणेषु दृश्यते । राजाभिषेकार्थे राजसूयकर्मणि रत्निनः इति केचन प्रतिपादिताः, त एवाधिकारिणः । तेऽपि राज्ञा नियुक्ता एव । राज्ञो रत्नवत् एते बहुमानार्हा इति कृत्वा तेषां रत्नित्वमुक्तम् । "योऽस्य एकं रत्न" इति वदत् शतपथब्राह्मणं रत्नीनां मुख्यत्वं सुस्पष्टमाह । तैत्तिरीयब्राह्मणे (7-1-3-1) "एते वै राष्ट्रस्य प्रदातारः एते एते वा दातारः" इति कृत्स्नस्य राज्यस्य रत्न्यधीनत्वमुच्यते । रत्नीनां प्राधान्यं मैत्रायणीसंहितायाम् (4-3-8) एवमुच्यते—"अथैते रत्निनः क्षत्रस्य वा एतान्यङ्गानि । यस्य वा एतान्योजस्वीनि भवन्ति तद्राष्ट्रमोजस्वि भवति । तान्येवास्यौजस्वीनि करोति । क्षत्रस्य वा एतान्यङ्गानि यस्य वा एतानि तेजस्वीनि भवन्ति तद्राष्ट्रं तेजस्वि भवति । तान्येवास्य ब्रह्मणा तेजस्वीनि करोति" । एतादृशनिरूपणानि रत्नीनां राज्यतन्त्ररीत्या संभाव्यमानं मुख्यत्वं स्पष्टीकुर्वन्ति ॥

एकादशद्वादशरत्निनो राजसूये प्रतिपाद्यन्ते । राज्ञोऽभिषेकार्थे राजसूयकर्मणि तेषां गृहे कर्तव्या इष्टयश्च विहिताः । एतादृशेष्टिकरणेन तान् सर्वानपि राज्ञा सम्बद्धान् करोति । तदनन्तरं तेऽनपक्रामिणो भवन्ति इति च शतपथब्राह्मणेन व्याख्यातम् । राजसूययागं विदधत्सु ब्राह्मणेषु रत्नीनां सङ्ख्या तेषां क्रमः तेषां प्रशंसनं च सुस्पष्टं प्रतिपादितम् । इदं चात्रावधेयम्—यद्यपि ऋग्वेदे साक्षाद्रत्निनो न प्रस्तुताः । अथापि रत्निषु अन्तर्गताः सेननीर्ग्रामणीः क्षत्ता च प्रतिपादिताः । अथर्ववेदे च न रत्नीनां प्रस्तावः, परं तु राजकृत इति केचन प्रतिपादिताः । तत्र च सूता ग्रामण्यश्च अन्तर्भाविताः । पर्णमणिमन्त्रे (ऋकूसं.35) धीवानो रत्नकाराश्चोक्ताः । (3-5-7) । एतेषां साहाय्यं राज्ञां प्रार्थ्यते । "ये धीवानो रथकारा ये मनीषिणः उपस्तीन् पर्णमह्यन्त्वम् । सर्वान् कृण्वभितो जनान् ये राजानं राजकृतः सूता ग्रामण्यश्च ये उपस्तीन् पर्णमह्यं सर्वान् कृण्वभितो जनान्" इति । धीवादीनां साहाय्यं प्रार्थ्यते । परं तु राजकृच्छब्देन के व्यवह्रियन्त इति न स्पष्टं प्रतिपाद्यते । राजकृतश्च अन्यराजानो वा अथ वा अराजानो वा इति न स्पष्टं प्रतीयते । अत्र राजानः इति पदं स्वतन्त्रं कृत्वा साक्षादेव अन्यराजानां साहाय्यं प्रार्थ्यते इति आचार्यसायणस्याभिप्रायः समीचीन एव भवति । स चैवं वदति—ये राजानोऽन्यदेशाधिकारिण इति ।

राजकृत्पदं च सूतग्रामणीनां विशेषणतया प्रतिपादितम् । इदं च शतपथब्राह्मणानुसार्येव । यत्र अराजानो राजकृत इति ग्रामणीनां विशेषणं दत्तम् । सूतग्रामण्यो न हि राजानः । तेषां राजकृत्त्वेन व्यवहारः तत्साहाय्येनैव राज्यनिर्वाहस्य शक्यत्वात् । ते चाभिषेक्तार इति सायणोऽभिप्रैति । अभिषेकप्रकरणे ऐतरेयब्राह्मणे राजकर्तारोऽपि अभिषेकेण सम्बद्धा वर्तन्ते । अत्र च राजकर्तृभिः अभ्युत्क्रोशः कार्य इति विहितम् । अतश्च सूतग्रामण्यादीनां राजकर्तृत्वं अभिषेकसम्बन्धश्च सुस्पष्टं प्रतिपाद्यते । राजकर्तृत्वं नात्र वरणरूपम्; राजवरणस्य सर्वजनायत्तत्वात् । परं तु राज्यनिर्वाहे उपकारकत्वमेव । यदि चैते अभिषिक्तस्य राज्ञ उपकारं न कुर्युः राज्ञा राज्यनिर्वाहो दुःशको भवेत् । एते हि अधिकारिपुरुषा राज्यनिर्वाहे स्थिराः । राजान आगच्छन्ति अपगच्छन्ति च ॥

एते परं स्थिराः स्वस्थाने सर्वदा तिष्ठन्ति । अत एव ते राजकृत इत्युच्यते । राजकृत्त्वेन सम्बन्ध ऐतरेयब्राह्मणोक्ताभिषेककर्मण्येव तेषां दृश्यते । परं तु राजसूययागे एतेषां न राजकर्तृत्वेन व्यवहारः । अपि तु रत्नित्वेनैव । एवं पञ्चविंशब्राह्मणे अष्टौ वीरा राष्ट्रनिर्वाहकत्वेनोक्ताः । एतेष्वपि राजाभिषिच्यत इत्युच्यते । पञ्चविंशब्राह्मणे एकोनविंशाध्याये "तत्र राट्" इति एकः क्रतुर्विहितः । तत्र ब्राह्मण एवमुच्यते । अत्र "यो राज्यं आशंसमानो राज्यं प्राप्नुयात् स एतेन यजेत । "राजैवैनं राजानं करोति तन्तु वै राजेति वदेयुः यं राजा राजानं कुर्यात् राजैवैनं राजानं करोति" । अत्र अष्टएकविंशतिस्तोमानां राट् इत्यस्मिन् क्रतुं विदधत् ब्राह्मणम, अष्टाभिर्वीरै राज्यस्य संबन्धं वदति । 'अष्टौ वीरा राष्ट्रं समुद्यच्छन्ति' इति । अत्र राजभाता राजपुत्रः पुरोहितः महिषीसूतः ग्रामणीः क्षत्तारः संगृहीताः । यद्यपि एते राष्ट्रवीरत्वेनोक्ताः, अथापि प्रायः सर्वेऽपि रत्निषु अन्तर्भाविताः । एतेषां नाम परं राष्ट्रवीर इत्युक्तम् । तेनेदं भवति । अधिकारिपुरुषाः सर्वेऽपि सूतग्रामण्यादयः त एवोच्यन्ते । परं तु तेषामथर्ववेदरीत्या (3-5-7) ऐतरेय-ब्राह्मणरीत्या च राजकृत इति नामा । पञ्चविंशब्राह्मणरीत्या (19-1-4) राष्ट्रवीर इति नाम । यजुर्ब्राह्मणेषु श्रूयमाणराजसूयब्राह्मणरीत्या रत्नि इति नाम । रत्निषु राजमहिष्यः पुरोहितश्च अन्तर्भावं प्राप्नुवन्ति । तथा राष्ट्रवीरेषु राजपुत्रो राजभ्राता चान्तर्भावं प्राप्तौ । यतस्ते राज्ञः सन्निहिता बन्धवः । तक्षरथकारौ च रत्निषु अन्तर्भावं प्राप्तौ (तै.सं 1-7-3 मै.सं4-3 8 शत. ब्रा. 5-3) पञ्चविंशब्रह्मणे (19·1-4) सूतग्रमणीक्षत्रसंग्रहीतार उक्ताः । जैमिनीय-ब्राह्मणेऽपि ग्रामण्यादय उक्ताः । ऐतिहासिकरीत्या ऋग्वेदकालीनजनसमुदायस्याल्पत्वात् राज्यतन्त्रमपि नातिप्रवृद्धमासीत् । उत्तरकाल एव राजतन्त्रस्य प्रवृद्धत्वात् बहवोऽधिकारिपुरुषा आसन् इति च वदन्ति । अस्मद्रीत्या पुनः ऋग्वेदकाल एव राजतन्त्रमतिप्रवृद्धमेव दृश्यते । तत्र च राज्ञोऽधिकारनिर्वाहार्थं बहव आसन्नेव । केचन एव तत्रोल्लिखिताः । यजुर्वेदान्तर्गत-

तैत्तिरीयकठमैत्रायणीसंहितासु तथा तैत्तिरीयब्राह्मणशतपथब्राह्मणयोश्च रत्नीनां नामनिर्देशः क्रमश उक्तः। परं तु किञ्चिदिव भेदो दृश्यते। अतश्चात्र विमर्शनस्यावसरोऽस्ति॥

॥ रत्निनः॥

तैत्तिरीयसंहितारीत्या एते रत्निनः। (1) ब्राह्मणः (ब्रह्म) (2) राजन्यः (3) महिषी (4) परिवृत्ती (5) सेनानीः (6) ग्रामणीः (7) सूतः (8) क्षत्ता (9) संग्रहीता (10) भागदुघः (11) अक्षावापः इति निर्दिश्यन्ते। तैत्तिरीयब्राह्मणे परं वावाता अधिकत्वेनोक्ता। महिषीपरिवृत्त्योः मध्ये मैत्रायणी-संहितारीत्या च इमे रत्निनः क्रमेण (ब्रह्म-राजा-महिषी-परिवृत्ति-सेनानी-संग्रहीता-क्षत्ता-सूतः-वैश्य-ग्रामण्यः तक्षरथकारौ अक्षावाप इति निर्दिश्यन्ते। अत्र ग्रामणीस्थाने तक्ष इति पठ्यते। तक्षरथकारौ नूतनौ। काठकसंहितारीत्या रत्निनः क्रमेणैवं पठ्यन्ते—पुरोहितः राजा महिषी परिवृत्ती सेनानीः संग्रहीता क्षत्ता सूतः वैश्यग्रामणीः भागदुघः अक्षावापः गोव्यच्छः। इति। अत्र ब्राह्मणस्थाने पुरोहितः पठ्यते। वावाता न निर्दिष्टा। मैत्रायणीसंहितावत् वैश्यग्रामणीरुक्तः। तथा गोव्यच्छः नूतनया प्रतिपादितः। तक्षरथकारौ नान्तर्भावितौ। शतपथब्राह्मणरीत्या अयं क्रमो रत्निनां दृश्यते। सेनानीः पुरोहितो राजा महिषो सूतो ग्रामणीः क्षत्ता संग्रहीता भागदुघः अक्षावापः फलागलः परिवृत्तिः इति। अत्र फलागलः नूतनः। परिवृत्तिर्न स्थानं लभते। ब्रह्मस्थाने पुरोहितश्च पठ्यते। अत्र रत्निनां मुख्यत्वं ब्राह्मणेषु विस्तरेण व्याख्यातम्। तस्य तस्य स्थानस्य प्राधान्यं सूचयितुमेव तत्तद्गृहं गत्वा इष्टिः कार्येति ब्राह्मणं वदति। एकस्मिन्नेव काले एकस्मिन्नेव प्रदेशे यदि सर्वा अपि इष्टयः कृता भवेयुः तदा सर्वेऽपि अरत्निनो भवेयुः। कस्यापि प्राधान्याभावात्। अतः प्रतिदिनं एकैकस्य गृहं गत्वा तत्र तत्रेष्टिः कार्या इति वदति। "यत्समाहृत्य निर्वपेत् अरत्निनः स्युः। यथायथं निर्वपति रत्नित्वाय। यत्सद्यो निर्वपेत् यावतीमेकेन हविषाऽऽशिषमवरुन्धे। तावतीमवरुन्धीत्। अन्वहं निर्वपति" (तै. ब्रा. 1.7.3.1)। इष्टिमात्रकरणे रत्निनो बलवत्तरा भवेयुः। राजात्र अबलो भवेत्। तन्निवृत्त्यर्थं रत्निहविषामनन्तरं पुनः सुत्रामेष्टिश्च राज्ञो गृहे विहिता। यन्न प्रतिनिर्वपेत्; रत्निन आशिषोऽवरुन्धीरन् प्रतिनिर्वपति। अरत्न्यपेक्षया राजा उत्कृष्टः। रत्निनश्च राजापेक्षया अधमा एव। तादृशोत्कर्षापकर्षसंरक्षणार्थमेवेष्ट्यन्तरं विहितम्। तत्तद्रत्निगृहे विहितानामिष्टीनां तत्तद्रत्न्यनुगुणदेवताश्च विहिताः। तथा तत्र तत्र दक्षिणाश्च तदनुगुणेनैव विहिताः। शतपथब्राह्मणे दृश्यमानं रत्निहविर्ब्राह्मणं किञ्चिदिव विस्तृतं दृश्यते। राजनीतिसंबद्धाश्च बहवो अंशा निरूपिताः। एकैकं रत्निं प्रशंसत् ब्राह्मणम् एकैकं स्थानं रत्नमिति वदति। तथैतादृशेष्टिकरणेन तं तं स्वस्मात्

अनपक्रामिणं कुरुते इति वदति । यद्यपि तत्र तत्र दक्षिणा विहिताः केनचिदभिप्रायेण । "भूमा वै विट्" इति प्रतिपादयद्ब्राह्मणं प्रजानां पाल्यमानानां सङ्ख्याबाहुल्यं वदति । क्षत्तुः प्रस्तावे "प्रसविता वै क्षत्ता" इत्युच्यते । अनेन तस्याज्ञादानं कार्यमिति गम्यते । यद्यपि तैत्तिरीयब्राह्मणे अक्षावापगृहे इष्टिर्विहिता, अथापि शतपथब्राह्मणरीत्या नाक्षावापगृहे इष्टिः कार्या । अक्षावापस्य गोविकर्तस्य च गृहाद्धान्यं सम्पाद्य राजसूयकर्तृ राज्ञो गृह एवेष्टिः कार्या इति प्रतिपाद्यते । फलागलगृहे नेष्टिः, चतुर्गृहीताज्यहोम एव । फलागलः प्रहितः । तस्य चोष्णीषवेष्टितं धनुः लोहितचर्ममया बाणवन्तो लोहितोष्णीषा एतान्यायुधानि अलंकाराश्च । रत्नीनां मध्ये राजा महिषी च संगृहीतौ । तयोरपि राज्याङ्गत्वेन मुख्यत्वं ज्ञापयितुं पुरोहितस्य मुख्यत्वं पूर्वमेवोक्तम् । पुरोहितोऽत्रोल्लेख्यः । राजमहिषीति अश्वमेधराजसूययागप्रकरणेषु राज्ञः पत्न्याः पत्नीनां वा व्यवहारो दृश्यते । तासामपि राज्यतन्त्रसम्बन्धो वर्तत इति ज्ञायते । रत्निहविष्षु महिषीगृहेऽपि काचनेष्टिर्विहिता । अश्वमेधप्रकरणे सूचीभिरश्वस्य असिपथा मार्गकल्पने राजपत्न्याः सम्बन्ध उक्तः । "महिष्यभ्यनक्ति" (3-9-6-4) इति । ऋग्वेदेऽपि "महिषी जजान" इति पदप्रयोगो दृश्यते । अत्रापि राजमहिषीपरत्वं वक्तुं शक्यते । राष्ट्रीरेषु महिष्यप्यन्तर्भाविता । महिष्यपेक्षया अन्ये अपि द्वे पत्न्यौ राजसूयाश्वमेधकर्मसंबद्धे दृश्येते । एकस्या वावाता इति नाम । अपरस्याः परिवृक्तिरिति नाम । तासां मध्ये महिष्या एव प्राधान्यं दृश्यते । वावातापरिवृक्त्योर्महिष्यपेक्षयाधमत्वमेव । तैत्तिरीयब्राह्मणे (1-7-3-3) वावाता उल्लिखिता । "भगाय चरुं वावातायै गृहे" इति । अनेन ज्ञायते सा भर्तृसौभाग्यमनुभवन्ती आसीदिति । ऐतरेयब्राह्मणे (3-2-2) इन्द्रस्य प्रिया जाया वावाता प्रासहनाम इति वावातायाः प्रस्तावोऽस्ति । तस्याः प्रियत्वविशेषणात् वावाता राज्ञः प्रिया पत्नीति ज्ञायते । तथा परिवृत्ती नाम जाया तृतीया । सा वावातापेक्षया जघन्या इति ज्ञायते । तस्याः तृतीयात्वेन निर्देशः तैत्तिरीयब्राह्मणे शतपथब्राह्मणे च दृश्यते । परिवृत्ती तथा वावातापि रत्निष्वन्तर्गते । चतुर्थी अपि जाया फलागलीनामिका अश्वमेधसम्बन्धे उल्लिखिता । तैत्तिरीयब्राह्मणरीत्या तिस्रो जाया राज्ञः । शतपथब्राह्मणरीत्या पुनः चतस्रो जाया राज्ञः । "चतस्रो जाया उपक्लृप्ता भवन्ति । महिषी वावाता परिवृत्ती फलागली इति" (शत. ब्रा. 13-4-1-8) । अत्र परिवृत्ती अप्रजा जाया इति । फलागली च शतपथे श्रूयमाणफलागलाख्यरत्निनः सुता इति च वक्तुं शक्यते । एताश्च महिष्यादयः बह्वीभिः स्त्रीभिः सेविता इति दृश्यते । "चत्वारि शतानि अनुचरी" इति । शत. ब्रा. 13-5-2) । "महिष्याः शतं राजन्याः पुत्र्यः अनुचर्यो भवन्ति । परिवृत्त्याः शतं सूतग्रामण्यदुहितरः अनुचर्यो भवन्ति । फलागल्याः शतं क्षत्रसंग्रहीतॄणां दुहितरः अनुचर्यो भवन्ति इति" (शत.ब्रा.13-5-2) । ताश्च स्वलङ्कृताः । वाधूलसूत्रानुसारेण कालिमागधानां पत्न्योऽपि परिवृत्त्याः परिचरणार्थमुक्ताः ॥

॥ सेनानीः ॥

राज्ञः सेनानयनार्थे सेनायाः कार्यनिर्वाहार्थं च सेनानीः इति कश्चनाधिकारी श्रुतः । तादृशाधिकारिपुरुषा ऋग्वेद एव प्रस्तुताः । सेनानां प्रस्तावः सेनान्यः प्रस्तावश्च ऋग्वेदादारभ्य प्रवृत्तः । "प्रायः सेनानीरथ नृत्स्योऽस्ति" (ऋ. सं. 7-20-5-19-6) प्रसेनानीः शूरोऽग्रे रथानां गव्यं न्नेति हर्षतेऽस्य सेना" इति । अत्र द्वयोः स्थलयोः सेनान्यः प्रस्तावो दृश्यते । द्वितीये सेनानीदर्शनेन सेनाया हर्षो द्योत्यते । "यो वः सेनानीः परसेनामोहनार्थं कल्पा विहिताः । इन्द्राणी सेनाया देवता । सेनाया युद्धार्थं सज्जीकरणार्थं यागोऽपि विहितः । "यस्य सेना संशितेव स्यात्" इति । सेनाया देवता एवेन्द्राणी इति वर्णनव्याजेन सेनाबृहत्त्वमपि वर्णितम् । "त्रिंशदस्या जासनं यो जनानि" इति ॥

मन्युसूक्ते सेनान्यः प्रस्तावो वर्तते । सेनायाः प्रस्तावश्च दृश्यते । शतपथब्राह्मणरीत्या रत्निषु सेनान्योऽग्रगण्यत्वं सूच्यते । अन्येषु ब्राह्मणेषु पुना रत्निषु पुरोहितः प्रथमत्वेन गृहीतः । अत्र च सिविल्-अधिकारिणां प्राधान्यं सूचितम् । शतरुद्रीयप्रकरणेषु श्रूयमाणो रथपतिः पत्तीनां पतिः इति निर्देशः सेनाभागपतित्वमेव वदति । "पत्तीनां पतये नमः" "रथेभ्यो रथपतिभ्यश्च वो नमः" इति । केचित् व्रातपदस्य गणपदस्य च सेनापरत्वं वदन्ति । परं त्विदं न सङ्गच्छते । व्रातपदस्य गणपदस्य च सामान्यजनपरत्वमेव न्याय्यमिति प्रतीयते । ऋग्वेदे पठ्यमान "विश्या इव व्राः" इति वाक्यं विशामेव समूहं वदति । तथा गणशब्दश्च विशां गणमेव वदति । न योद्धृगणम् । गणपतिशब्दः सेनानीशब्दश्च विभिन्नमेवार्थं प्रतिपादयतः ॥

॥ सूतः ॥

सूतो रत्निष्वन्यतमः । अयं च राज्ञ उपकारकोऽधिकारी । सूतशब्दश्चाथर्ववेदे पठितः । अथर्व.सं. (3-5-7) । केषाञ्चिन्मते सूतोऽपि राजकृत् । "महतो गणस्य राजा व्रातस्य प्रथमो बभूव" (10-34-10) । अत्रास्मिन्नक्षसूक्ते सेनानी-प्रस्तावः "महतो गणस्य सेनानीः" इति सूच्यमानं सेनासमूहं सेनान्यं च ज्ञापयति । "सेनानीर्नः सहुरेहूत एधि" (ऋक्सं. 10-84-2) इति मन्युसूक्ते पठ्यते । मन्योरेव सेनानीत्वमाह्वानकाले तदागमनं च सूच्यते । सेनाशब्द इतस्ततः सञ्चरत्सु कलहपरेषु जनेषु प्रयुक्तः । परं तु सुप्रतिष्ठितयोद्धृषु प्रयुक्तः । तेषां नेता च सेनानीः । सेनानीवत् सेनापतिशब्दोऽपि प्रयुक्त ऐतरेयब्राह्मणे (8-23) । अत्यारातिः जानन्नपि वसिष्ठं प्रति एवं वदति—यदि चोत्तरकुरून् जयेयम् अथ त्वं हे व पृथिव्यै राजा स्याः । सेनापतिरेव तेऽहं स्याम्—इति । सेनापतिरपि राज्ञोऽवर इत्यनेन ज्ञायते । यजुःसंहितासु शतरुद्रीयमन्त्रेष्वपि सेनान्यः प्रस्तावोऽस्ति । "नमो हिरण्यबाहवे सेनान्ये" । (कापिष्ठलकठ. 27-2, तै. सं. 4-5-2 वाज. सं. 14-7 काठ. सं. 17-12 जै. सं 2-9-31) । सेनानीर्ग्रामण्या सह यजुः संहितायां प्रतिपादितः (4-4-31) । सेनानीग्रामण्यौ इति पञ्चवारं पुनः पुनः पठितम् । ग्रामणीः समाधानकाले कार्यकर्ता । सेनानीश्च युद्धकाले कार्यकारी । द्वावप्यत्र प्रस्तुतौ । अथर्ववेदेऽपि "अग्निरिव मन्यो भक्षितः सहस्व प्रसेनानीर्नः सहुरेहुत एधि" (4-31-2) इति । अपि च रथसूक्ते सेनारक्षणार्थं प्रार्थना श्रूयते । अथर्ववेदे स्वसेनाप्रोत्साहनार्थं प्रोक्तः सूतः किंजातीय इति न निर्णेतुं शक्यते । सूतशब्दस्य सारथिपरत्वं प्रायः सर्वैरप्युच्यते । परं तु मैत्रावरुणीसंहितापर्यालोचने (4-3-8) इदं च ज्ञायते । अयं न सारथिः । परं तु राज्ञः सन्निहितोऽधिकारी इति ॥ "सूतमुखा वै विट् क्षत्रमुपतिष्ठते" इति प्रतिपादितम् । अनेनायं सूतो राज्ञः सन्निहितोऽधिकारीति सूच्यते । यदि च विशः सूतमुखेन किञ्चिदावेदयन्ति राज्ञे तत्तेषां समृद्धं भवति । "सूतमुखां वा वास्मै एतद्विशं मुखतः अन्नाद्यायोपदधाति" (मै. सं. 4-3-8) । सूतः शतरुद्रीयमन्त्रेषु प्रस्तुतः यजुःसंहितासु । तस्य चाहन्त्यत्वेन विशेषणं वर्तते । "सूतायाऽहन्त्याय" इति । सूतश्च ग्रामण्या सहानेकेषु स्थलेषु प्रतिपादितः । "शतेन सूतग्रामणीभिः सह होता" (तै. ब्रा. 3-8-52) । अथर्ववेदेऽपि सूता ग्रामणीभिः सह प्रतिपादिताः । (3-5-7) राज्ञोऽनुचरत्वेन सूतग्रामण्यः प्रतिपादिताः । (शत. ब्रा. 3-4-1) "अराजानो राजकृतः सूतग्रामण्यः"

इति सूतग्रामण्यः प्रतिपाद्यन्ते । शतपथब्राह्मणरीत्या सूतः अराजा, किं तु राजकृत् । ग्रामणी-सम्बन्धे वैश्य इति विशेषणात् अयमपि वैश्यजातीय इति केचिद्वक्तुमिच्छन्ति। (गोशाल) ॥ किं तु नेदं सम्यक् । यथा वा वैश्यस्य ग्रामण्य इति स्पष्टं प्रतिपाद्यते नैवं सूतविषये वर्तते । सूतश्चाष्टसु वीरेषु जैमिनीयपञ्चविंशब्राह्मणयोरन्तर्भावितः । बृहदारण्यकेऽपि (4-3 38) "तद्यथा राजानं प्रति यान्तं उग्राः प्रत्येनसः सूतग्रामण्यः अभिसमायान्ति" इति राजानुचरत्वं सूतस्य प्रतिपाद्यते । सूतसवः (बोधाश्रौत.सू. 18-4) विहितः । तस्याप्यभिषेक उक्तः । तथा स्थपतिसवोऽपि साभिषेकं प्रतिपादितः (18-3) । अनेन ज्ञायते एतयोरधिकारस्थानयोः मुख्यत्वमस्ति इति ॥

॥ ग्रामणीः ॥

ग्रामणीरपि रत्निष्वन्यतमः । अस्य राजवत् मुख्यत्वं दृश्यते । "तस्माद् ग्रामणीः
सजातैः पर्यूढः" इति सजातसम्बन्धसत्त्वात् वैदिकराजतन्त्रे इदं स्थानं सुप्राचीनम् ।
प्राचीनतमे हि काले इतस्ततः संचरतां जनानां जनसमूहानाम् अयं नेता अभूत् ।
तदा तस्य युद्धसम्बन्धश्चासीत् । यदा पुनः कस्मिंश्चिद्देशे जनाः प्रतिष्ठिताः, राज्यतन्त्रं
च प्रतिष्ठितमभूत्, तदा तस्य युद्धसम्बन्धो निवृत्तः । सेनानीतत्त्वं च तदा प्रादुरभूत् ।
तदा अस्य जनसमुदायरक्षकत्वमेव (सिविल्-अधिकार एव) । प्रतिग्रामं ग्रामणीरस्ति ।
तस्योपकारार्थं तत्तद्ग्रामकार्यनिर्वाहार्थं च ग्रामसभा कल्पिता । बहवो ग्रामण्यः "शतेन
सूतग्रामणीभिः" इति । ग्रामणीश्च राज्ञा नियुक्त एव, रत्निष्वन्तर्गतत्वात् । तथा
स्फ्यप्रदानकर्मण्यप्यन्तर्भावितत्वात् महैश्वर्यवानयम् ॥

ग्रामणीविषये वक्तव्यमन्यत्र विस्तरेण निरूपितं—ग्रामः सजाताश्च—इत्यत्र ।
प्राप्तश्रीकाणां प्रस्तावे ग्रामणीरपि प्रतिपादितः ॥

"त्रयो वै गतश्रियः शुश्रुवान् ग्रामणी राजन्याः" इति । अत्र ब्राह्मणराजन्ययोः
सत्त्वात् ग्रामणीपदमपि वैश्यपरमिति केचिदभिप्रयन्ति । परं त्वत्रेदं बोद्धव्यम्——न हि सर्वे
वैश्या ग्रामण्यः, अथ वा सर्वेषां वा ग्रमणीनां वैश्यत्वं वा । ग्रामणीस्थानस्य सर्वजाति-
साधारणत्वात् वैश्योऽपि ग्रामणीर्भवेत् । न तु सर्वेषां वैश्यानां ग्रामणीत्वं ग्रामणीनां वा
वैश्यत्वम् । ग्रामणीत्वं ग्रामनेतृत्वमिति निश्चीयते । तथापि एतादृशाधिकारो जनस्य राज्ञो
वा आगत इति समालोचनीयम् । ग्रामण्यं न सजाता वृतवन्तः । परं तु यो ग्रामणीत्वेन
राज्ञाङ्गीकृतः अथ वा नियुक्तः तस्य कार्यनिर्वाहे साहाय्यमेवाकुर्वन् । अत एतादृशस्य
पुरुषस्य राज्ञो नियोग एव । ग्रामशब्दस्य जनसमुदायपरत्वमेवेति अस्माभिः पूर्वमेव चिन्तितम् ।
ग्रामशब्दस्य तत्तत्स्थलानुरोधेन देशपरत्वं जनसमुदायपरत्वं च न्याय्यमेवेत्यस्माभिः
प्रतिपादितम् । यतो ग्रामशब्दः प्रथमं समुदायपरः, तदनन्तरं समुदायवत्स्थलपरः । अतश्च
ग्रामणीशब्दोऽपि उभयत्रापि विषये नेतृत्वपर एव । पुरुषमेधे "तूणवद्धं ग्रामण्यं पाणिसङ्घातं
नृत्ताय" इति तूणवाद्यवादकत्वं पाणिसङ्घातकत्वं चोक्तम् । अनेन ज्ञायते ग्रामणीष्वेवंविधा
अप्यभूवन्निति । तावता न सर्वेषां ग्रामणीनां तूणबद्धत्वं पाणिसङ्घातकत्वं सम्भवति । केचिदत्र
"नृत्ताय" इति श्रवणात् नृत्तसम्बन्धं ग्रामण्यो वक्तुमिच्छन्ति । तदपि न समीचीनम् । नृत्तस्यात्र

देवतात्वात् तूणबद्धत्वेनैव नृत्तसम्बन्धस्य चरितार्थत्वात् । वाजसनेयसंहितारीत्या महसो ग्रामण्यश्च सम्बन्धो दृश्यते । "ग्रामण्यं महसे" (30-20) इति । अत्र महश्शब्दः पूज्यत्वाभिमानिदेवतापरः; न बलपरः । अतश्चेदं स्थानं च पूज्यमिति गम्यते । तैत्तिरीय-संहितायां पञ्चचोडाइष्टकप्रकरणे ब्राह्मणे सेनानीग्रामण्यौ इति सेनान्यो ग्रामण्यश्च द्वन्द्वनिर्देशो भवति । तेनैवमभ्यूहितुं शक्यते—सेनानीर्युद्धसम्बन्ध्यधिकारवान् । तेन सहोक्तो ग्रामणीश्च तत्समानः समाधानकालाधिकारीति । उभावपि संगत्य ग्रामरक्षणं कुरुत इति । काठकसंहितायां ग्रामणीसम्बन्धे प्रतिपाद्यमानं ब्राह्मणवाक्यम् अस्मदवधानार्हम् । अत्र चैवं श्रूयते (काठ. सं. 10-4) "अग्नये वैश्वानराय द्वादशकपालं निर्वपेत् । यः कामयेतानेन राज्ञा वा ग्रमण्या वेदं सस्यमाददीयेति । सँवत्सरो वा अग्निर्वैश्वानरः सँवत्सरोऽन्नाद्यस्य प्रदाता । तमेव भागधेयेनोपधावति । सोऽस्मा अन्नाद्यं प्रयच्छति । सँवत्सरं हि अन्नमनुप्रजायते" (10-3) इति । अत्र राजा च ग्रामणीश्चैकस्मिन्नेव स्थाने प्रयुक्तौ । राज्ञो यथा वाधिकारपरत्वं तथा ग्रामण्योऽपि अधिकारपरत्वमेत्र न्याय्यम् भवति । राज्ञः केन्द्राधिकारो ग्रामण्यः परः प्रादेशिकोऽधिकार इत्यपि च वक्तुं शक्यते । ग्रामणीशब्दस्याल्पप्रदेश-सामुदायिकव्यवहारनेतृपरत्वं सम्भावितम् । राजापेक्षया न्यूनाधिकारत्वतोऽस्य पुरुषस्य सिविल्-अधिकार एव, न युद्धसम्बन्धाधिकारः । यजुःसंहितायां त्रयस्त्रिंशदहर्ब्राह्मणे "सर्वे एत्र प्रबाहु गृध्नुवन्ति । सर्वे ग्रामणीयं प्राप्नुवन्ति" (7-4-5-4) इति प्रतिपाद्यते । वृद्धया समं ग्रामणीयत्वस्योल्लेखादुत्कृष्टोऽयमधिकार इति गम्यते । मैत्रायणियसंहितायाम् (1-6-5) वैश्यस्याधानमन्त्रवाक्यं विदधत् ब्राह्मणमेवं प्रतिपादयति—"ग्रामणीर्हीत्र खलु वै वैश्यो भद्रो भवति ग्रामणीध्यमस्मा अवरुन्ध" इति । अनेन ज्ञायते ग्रामणीत्वप्राप्त्या वैश्यस्य समृद्धिर्भवति इति । वैश्यस्य धनप्राप्तिर्मुख्य उद्देशः । तादृशैश्वर्यप्रसिद्ध्ग्रामणीत्वपदप्राप्त्या सिध्यतीति । शतपथब्राह्मणं परं ग्रामण्यो गृहे मारुतं सप्तकपालं हविर्विदधत् 'विशो वै मरुतो वैश्यो वो ग्रामणीः तस्मान्मारुतो भवतीति' वदति । यदि वयं वैश्यशब्दस्य जातिपरत्वं ब्रूमः तर्हि वैश्यानामेव ग्रामणीत्वमिति नियमोऽपि भवति । यदि च जन-परत्वं सामान्यतोऽङ्गीकुर्मः तदा ग्रामण्यो जनप्रतिनिधित्वमेव । 'वैश्यो वै ग्रामणीः' इति लभ्यते । अत्रापि ब्राह्मणं "भूमा वै विट्" इति प्रजानां निरतिशयं बाहुल्यमेव प्रतिपादयति (5-3-1-6) । अत्रैव छन्दसीष्टका उपधानब्राह्मणे (8-3-6) एवं प्रतिपाद्यते । "तस्मादिदमपि एतर्हि आहुः । न वा एषो अलं श्रियै धारणाय राज्याय वा ग्रामणीभ्याय वा" इति । जैमिनीय-ब्राह्मणेऽपि (1-8-4) "सोमयागसम्बन्धिप्रसर्पणमन्त्रे सोमस्य राज्ञो राज्याय मम ग्रामणेयाय" इति पठ्यते । अत्र राज्येन समानतया ग्रामणीत्वमुक्तम् । अतः सर्वाभिलाषपदमिदमिति निश्चीयते ॥

राजवत् अयमपि श्रीमानिति गम्यते । सूतेन सह ग्रामणी राजकृत्त्वेन प्रतिपादितः । परिवृत्त्या अनुचरीणां प्रस्तावे ग्रामणीनां दुहितरोऽप्युक्ताः । कल्पसूत्रानुसारेण ग्रामणीपत्नीनामपि स्थानमस्ति । अयं च ग्रामणी राष्ट्रधारकवीरेषु अन्तर्भावितः । जैमिनीयब्राह्मणे "यत्रैव सजातो भवति तद् ग्रामणीर्भवति" इत्युच्यते । अनेन सजातानां ग्रामणीनां च सम्बन्धः स्पष्टं प्रतीयते । अस्मिन्नेव ब्राह्मणे "अषाढं सावेतसं प्रति कश्चन प्रश्नः क्रियते । तत्रैवं दृश्यते । यत्त्वं शार्कराक्षाणां ग्रामण्य एवासि । केन त्वमिदं प्रापिथाः" इति । तेन ज्ञायते—तत्तज्जनसमूहानां पृथक् पृथक् ग्रामणीरासीदिति । वैश्याधानमन्त्रेषु यजुःसंहितासु मनोस्त्वाग्रामण्ये । व्रतपत इति मन्त्रः पठ्यते । अत्र ग्रामणीशब्दो मनुना सह प्रयुक्त इति द्रष्टव्यः (तै.ब्रा. 1-1-2-5) । अश्वमेधेऽश्वप्रोक्षणकाले शतसूतग्रामणीभिः सह होता पश्चात् प्राचीतिष्ठन् प्रोक्षति इत्युक्तम् (तै. ब्रा. 3-8-5-2) अत्रापि तेन सह ग्रामणीः उक्तः ॥

॥ क्षत्ता ॥

क्षत्तृनामकोऽधिकारिविशेषः । स च रत्निष्वन्तर्भूतः । सर्वास्वपि संहितासु अयं श्रुतः । तस्य च कार्यविशेषो न ज्ञायते । द्वाराध्यक्षोऽयमिति केचिद्वदन्ति । सायणस्तु अन्तःपुराध्यक्ष इति वदति (शत.ब्रा. 3-1-7) । कोशाध्यक्ष इति केचिद्वदन्ति । आयव्ययाध्यक्ष इत्यन्ये । मन्त्रिदूतः प्रतिहारिदूत इति बहुधा व्याख्यातः । सारथेरयमनुचर इति केचिद्वदन्ति । ऋङ्मन्त्रेष्वपि क्षत्तुर्व्याहारो दृश्यते । ऋक्सं. (6-13-2) "क्षत्ता वामस्य देवभूरेः" इति । अत्र क्षत्तृशब्दस्य दातृपरत्वमुक्तं सायणेन । ब्राह्मणे क्षत्तुः सवितृसम्बन्धदर्शनात् अयमाज्ञाकारीति ज्ञायते । "सावित्रं द्वादश कपालं क्षत्तुर्गृहे प्रसूत्यै" (तै.ब्रा.1-7-3-3) । अथर्ववेदेऽपि (3-24-7) "उपोहश्च समूहश्च क्षत्तारौ ते प्रजापते" इत्युच्यते । अत्र उपोहसमूहसम्बन्धेन क्षत्तुः कार्यमपि मुखान्तरेण सूच्यते । अत्र धनादीनां सङ्ग्रहो वृद्धिकरणं च क्षत्तुः कार्यमिति प्रतीयते । आचार्यसायणोऽपि अत्रानुकूलः । य एवमाह—"उपोहः, उप समीपम् ऊहति प्रापयति धान्यादिकम् इति उपोहः" । एतत्संज्ञो देवः समूहः प्राप्तं धनं समूहयति अभिवर्धयति इति समूहकरणसमर्थो देवः समूहः । परस्परसमुच्चयार्थौ-तावुभौ ह प्रजापते ते तव क्षत्तारौ सारथी अभिमत-कार्यसम्पादकौ । अत्र क्षत्तृशब्दो द्विवचनान्ततया प्रयुक्तः । तथा (तै.सं-5-17-14) क्षत्तुराभरणमुल्लिखितम् । "नास्य क्षत्ता निष्कग्रीवः सूनानामेत्यग्रतः" इति । अत्र सायणः क्षत्तृपदस्य सारथिपरत्वमेवाभिप्रैति । क्षत्तुः अलंकारविशेषो निष्कग्रीव इति प्रतिपाद्यते शतपथब्राह्मणे "प्रसविता वै क्षत्ता" (5-3-1-7) इति प्रतिपादनात् आज्ञादानेऽस्याधिकार इति ज्ञायते । शतरुद्रीये "क्षत्तृभ्यः संग्रहीतृभ्यश्च वो नमो नमः" इति प्रस्तावो वर्तते । अत्र संग्रहीत्रा सह क्षत्ता उक्तः । क्षत्तृबाहुल्यं चोक्तम् ॥

॥ संग्रहीता ॥

संग्रहीतापि रत्निष्वन्तर्भावितः । स च ब्राह्मणानुसारेण रथवाहनसम्बन्धे नियुक्तः । सह सङ्ग्रहीत्रा रथवाहने रथमादधतीति (तै. सं. 1-7·9·6) । जयस्वाल्महाशः संग्रहीतृपदस्य कोशसंग्रहीतृपरत्वमभिप्रैति । भट्टभास्करमतानुसारेण रज्जुभिर्नियन्ता कुमाराध्यक्षोऽपि संभावितः (तै. सं. 1·8·9·2. कठ. सं· 15·4. मै.सं· 2-6-5.) । संग्रहीतृशब्दस्य धनाध्यक्षपरत्वम् आचार्यसायणोऽपि अनुमन्येत । बहवः संग्रहीतारो वर्तन्त इति यजुर्वेदीयशतरुद्रीयेभ्यो ज्ञायते । (तै.सं. 4·5·4-2 कठ.सं. 17·13. मै.सं 2·9·4, वाज.सं. 14·26.) ऐतरेयब्राह्मणे किंचन चरित्रं प्रसिद्धं दृष्टान्तत्वेन प्रदर्शितम् । नियुत्वान् इन्द्रसारथिरिति व्याख्यानावसरे (ऐत ब्रा. 2-25) । अत्रैवं दृश्यते—"तस्माद्धाप्येतर्हि भरताः सत्त्वानां वित्तिं प्रयन्ति । तुरीये हैव संग्रहीतारो वदन्ति । अनुनैव अनुक्रोशेन यदद:" इति । शतपथब्राह्मणरीत्यापि सङ्ग्रहीतृपदस्य सारथिपरत्वमेव ज्ञायते । "समानं हि रथं अधितिष्ठतः" (शत.ब्रा. 5-3-1 8)। मैत्रायणीसंहितारीत्यापि सङ्ग्रहीतृपदस्य रथसङ्ग्रहीतृपरत्वमेव ज्ञायते "तं न संग्रहीता अन्वतिष्ठत्" (शत.ब्रा. 5·4-3 23) । जैमिनीयब्राह्मणानुसारेण ब्राह्मणानामपि सङ्गृहीतृत्वं संभवति ॥

॥ भागदुघः ॥

भागदुघोऽपि रत्निषु अन्यतमः । शब्दार्थेनैव ज्ञायते अयं राज्ञः जनेभ्यो भागहारीति । अत्र भागदुघ्शब्दः अर्थान्तरमभिद्योतयति । यथा दोग्धा गाम् अहिंसन् दोग्धि एवमेव जनान् अहिंसन्नेव भागार्थं दोग्धि इति । (शत.ब्रा.5-3-1-9) "पूषा वै देवानां भागदुघः" इत्युच्यते । मैत्रायणीसंहितायां "पुष्टिमेवास्य भागे दधाति" इति । भागदुघसम्बन्धिहविः प्रस्तूयते । एतादृशयागकरणेन यजमानभागे, अथ वा राज्ञो भागे पुष्टिर्भवति इति "भागधुक् हि कोशं पूरयन् पुष्टिं दधाति" इति ॥

॥ अक्षावापः ॥

अक्षावापशब्दोऽर्थत एव द्यूतकारीति ज्ञायते। अयं च रत्निषु अन्यतमः। परं तु इदं ज्ञातव्यम्—नायं साधारणो द्यूतकारी; परं तु राज्ये वर्तमानानां द्यूतकार णाम् अग्रगण्य इति। तेषां नेता इत्यपि ज्ञायते। राजसूये च द्यूतसम्बन्धो राज्ञः स्पष्टं प्रतिपादितः। "अक्षैर्दीव्यति राजन्यं जिनाति" इति। परं तु अक्षावापशब्दस्यान्योऽप्यर्थो वर्णितः जयस्वालमहाशयेन, यश्चार्थः खण्डितोऽन्यैः। जयस्वालमहाशयमतानुसारेणाक्षावाप आयव्ययविमर्शकः (Accountant General.)। एतादृशार्थपरत्वं निरूपयितुं सः अक्षशब्दस्य परिगणन-परफलकपरत्वं महता प्रयासेन निरूपयति। शतपथब्राह्मणरीत्या अक्षावापगोविकर्तस्य च गृहे न यागः अपि तु तयोः गृहात् गवे धुगधान्यं संहृत्य यजमानगृहे यागः कार्यः। अत्र च विवरणावसर एवमुक्तम्—'ते वा एते द्वासती रत्ने एकं करोति सम्पदम्। सम्पदः कामाय' इति। अनेन ज्ञायते गोवितर्कोऽक्षावापश्चैकमेव कार्यं कुर्वीत इति। (शत. ब्रा. 5-3-1-10)। मैत्रायणीसंहितायां 'रुद्र इव हि एतौ, पशू अभिमन्येते' इति द्वयोरपि पश्वभिभवपरत्वमुक्तम्। अत्र शतपथे एवं निरूपणं कृतम्। "अथ श्वोभूते अक्षावापस्य च गृहेभ्यो गोविकर्तस्य च गवेधुकाः संभृत्य सूयमानस्य गृहे रौद्रं गावीधुकं चरुं निर्वपति। ते वा एतेऽनुसती रत्ने एकं करोति। संवदः कामाय। तद्यदेतेन यजते यां वा इडां सभायां घ्नन्ति रुद्रो हैतामभिमन्यते। अग्निर्वै रुद्रोऽधिदेवनं वा अग्निः तद्वा अस्य एकं रत्नं यदक्षावापश्च गोविकर्तश्च" (5-3-1-10)। अत्र समुच्चितयोर्गोविकर्ताक्षावापयोः एकरत्नत्वम् अवधानार्हम्। राज्यतन्त्रतत्त्वरीत्यास्य मुख्यत्वं दृश्यते। विभिन्नकार्यवतोरपि एकरत्नित्वम्। तथाधिदेवनस्य प्रस्तावोऽपि अक्षावापस्य द्यूते सम्बन्धं स्पष्टयामास ॥

॥ फलागलः ॥

अयमपि रत्निष्वन्यतमः । यद्यप्ययं रत्निः अथापि नास्य गृहे यागः । अपि तु "जुषाणो अध्वा राज्यस्य वेतु स्वाहा" इति होम एव विहितः । परं तु तदलंकाराः तत्र प्रतिपादिताः । अयं च फलागली लोहितोष्णीषवान् धनुर्बाणादिमांश्च । इममेव फलागलिम् अनृतइती इति आपस्तम्बो वदति । अयं च राज्ञो दूरगामी । "अध्वानं वै प्रहित एति" इति शतपथब्राह्मणे दर्शनात् (5-3-1-11) ॥

॥ गोविकर्तः ॥

अयं च रत्निष्वन्यतमः । यद्यपि शब्दार्थतोऽयं गोघातुको भवति । "क्षुधे गोविकर्तं" (तैत्ति. ब्रा. 3-4-14) इति प्रतिपादनात् अस्य क्षुन्निवारकत्वमपि गम्यते । परं त्वस्य पदस्य अर्थः व्याध इति जयस्वाल् अभिप्रैति । शतपथब्राह्मणे च 'यां वा इमां सभायां घ्नन्ति रुद्रो ह एता अभिऽयते' इति वदत् गोघातकपरत्वमेव सूचयति ॥

॥ तक्षा ॥

तक्षा रथकारेण साकं रत्निष्वन्तर्भावं मैत्रायणीसंहितारीत्या प्राप्तः । (4-3-8) "वैष्णवस्त्रिकपालः तक्षरथकारयोर्गृहे" इति (4-3-8) । तक्षाख्यं स्थानम् एकं वा बहु वेति विचारणीयम् । न ह्येकस्य राज्यस्यैक एव तक्षा इति वक्तुं शक्यते । बहूनामपि तक्ष्णाम् आवश्यकत्वात् । अत एव शतरुद्रीयमन्त्रेषु तक्षबहुत्वमुक्तम् । "तक्षभ्यो रथकारेभ्यश्च वो नमः" । इहापि रथकारेण सहैव तक्षशब्दस्य प्रयोगोऽस्ति । अतो बहूनां तक्ष्णां मध्ये एको राज्ञा नियुक्तो भवति । तस्यैव राज्ञा सम्बन्धः । अथर्ववेदे तक्षप्रस्तावोऽस्ति । 'यत्वाशिकः परावधीत् तक्षा हस्तेन वास्या" इति (10 6-3-1) तक्ष्णो रत्निष्वन्तर्भावे वैदिकराज्यतन्त्रे शिल्पतत्त्वस्य दत्तं प्राधान्यं प्रकटीकृतम् ॥

॥ रथकारः ॥

अयमपि रत्निष्वन्यतमः । मैत्रायणीसंहितारीत्याऽयं च तक्ष्णा सहोक्तः । शतरुद्रीयमन्त्रेषु "रथकारेभ्यश्च वो नम" इति दर्शनात् बहवो रथकाराः सन्तीति ज्ञायते । एकः परं राज्ञा नियुक्तः । रथकारस्य रत्नित्वदर्शनात् राज्ञा क्रियमाणशिल्पादिभिश्च सूचितो रथकारो धीवनाद्यन्वितः कर्मकर्तृभिः सहाथर्ववेदे प्रस्तुतः । "ये धीवानो रथकाराः कर्मारा ये मनीषिणः" (3·5-6) । रथकारस्याधानकर्माप्यस्ति । "ऋभूणां त्वा देवानां व्रतपते पिते नादयामीति रथकारस्य" (तै.ब्रा. 1-1·2·6) । भगवान् जैमिनी रथकारस्य त्रैवर्णिकबहिर्भूतत्वं महता प्रयासेन निर्णीतवान् रथकाराधिकरणे । आपस्तम्बादिकल्पसूत्रकाराः पुनः त्रैवर्णिकेष्वेव वृत्तिकर्शनेन ये रथकरणं वृत्त्युपायतया अङ्गीकृतवन्तः तेषामेव रथकाराधानमित्यभिप्रयन्ति ।

॥ बलिः ॥

प्रभूतराज्यनिर्वाहार्थं राज्ञो धनमपेक्षितम् । प्रजास्वन्तर्भूतत्वेन राज्ञोऽन्यप्रजावत् एव धनादिकं वर्तते । एवं सति, कथं वा तेन राज्यव्यवहारः कर्तुं शक्यते ? यथा वा राजानो जनसामुदायिकव्यवहारनिर्वाहार्थं कल्पिताः, एवमेव तद्व्यवहारसिद्ध्यर्थं जनैरेव तदा तदा स्वैः सम्पादितेभ्यो द्रव्यादिभ्यो भागो राज्ञे दीयते । तेन धनेन राजा राज्यनिर्वाहं करोति । अधिकारिपुरुषेभ्यो वेतनं च ददाति । वेतनदानं च वेदेष्वेव प्रतिपाद्यते । प्रजाभ्यो राजा साक्षाद्धनं वा प्राणिजातं वा स्वकरत्वेनादत्ते । "इममाभज ग्रामे अश्वेषु गोषु" इत्यादीनां पर्यालोचने गवादयो राज्ञो भागत्वेन जनैः कल्पिता इति ज्ञायते । तथा यदा च सुवर्णरजतादिकं धनव्यवहारे समायातं तदा सुवर्णरजतादिकमपि करत्वेन राज्ञे दत्तमिति ऊह्यते । राजभिः कृतं दानं प्रशंसन्तः ऋषयः स्वर्णमपि तैर्दत्तमिति सूचयन्ति । (ऋक्सं. 10-62-9-11) । "सहस्रधा ग्रामणीः सावर्ण्यस्य दक्षिणा विसिन्धूरिव पप्रथे । शतं राज्ञो नाधमानस्य निष्कान्" (ऋक्, सं. 1-12-6-2) । "शतं निष्कान् सहस्रशः" (20-1-27) । तत्र तत्र राज्ञो विहितेषु यागेषु सुवर्णानां हिरण्यानां च दक्षिणात्वेन विहितत्वाच्च राज्ञि बहुधनं वर्तत इति निश्चीयते । उदमयनाम्नो राज्ञोऽश्वमेधं वर्णयद्ब्राह्मणमेवं वदति । "देशाद्देशात् समूलानां सर्वासामाढ्यदुहितॄणां दशाव अददात् सहस्राणि आत्रेयो निष्कम् (ऐत. ब्रा. 8-22) । अत्र बह्व्य आढ्यानां दुहितरो देशाद्देशात् समागताः । ताभ्यश्च राजा सहस्रं सहस्रमाददात् । राज्ञा दत्तं सुवर्णं निष्काभरणत्वेन परिकल्प्य ता निष्ककण्ठ्योऽभूवन्नित्युच्यते । 'शतं तुभ्यमिति स्मैव प्रताम्यति । सहस्रं तुभ्यमित्युक्त्वा प्राणान् स प्रत्यपद्यत' । अयं च राजपुरोहितो दत्त्वा श्रान्तः सन् "परिचारका यूयं दत्त" इति उक्तवान् । शतं शतं दत्त्वा प्रशान्तः सहस्रं सहस्रम् इति वदति । अतश्च सुवर्णहिरण्यादिभिः समृद्धा एव राजान इति ज्ञायते । एतच्च करद्वारैव तेषामागतम् । तथान्यदेशीयैर्जनैर्युद्धं कृत्वाहृतं धनादिकमपि तेषां हस्ते वर्तते । तत्र लब्धस्य धनस्य उदज इति नाम "तस्माद्राजा संग्रामं जित्वा उदाजमुदजते" । तथा युद्धेषु च राज्ञामुद्धार इति कश्चन भागः परिकल्पितः । तदपि राजहस्ते वर्तते । प्रजाभिर्दत्तस्य करस्य बलिरिति नाम । बलीनां प्रस्तावः साक्षात् परम्परया च मन्त्रब्राह्मणेष्वस्ति । कुत्रचित् प्रजाभी राज्ञे दीयमानः कर उक्तो बलिशब्देन । अन्यत्र देवताभ्यो दीयमानं

रूपकत्वेन बलित्वेनोक्तम् । तादृशमन्त्रब्राह्मणभागान् प्रदर्शयामः । "हरन्त्यस्मै विशो बलिम्" (तै. ब्रा. 2-7-18-3) । "तस्मादिमा विशः क्षत्रियाय बलिं हरन्ति" (शत. ब्रा. 1-3-2-15) ॥ "वैश्यो वा राज्ञे बलिं हरेत्" (11-2-6-14) । अयं च बलिव्यवहारः ऋग्वेद एव दृश्यते । जना अपि बलिहृदिति व्यवह्रियन्ते । "विशश्चक्रे बलिहृतः सहोभिः" (ऋक्. सं. 7 6-5) । अत्र स्वबलेन अग्निः प्रजा बलिहृतः अकरोत् इति सूच्यते । "अथोत इन्द्रः केवलीर्विशो बलिहृतस्करत्" (10-173 6) । अत्र इन्द्रो राज्ञे प्रजा बलिहृतः अकरोत् इति सूच्यते । प्रजानां बलिहृत्त्वमत्रापि प्रतिपाद्यते । (अथर्वसं. 11-4-19) । "यथा प्राणबलिहृतः तुभ्यं सर्वा इमाः प्रजाः" (अथर्वसं. 11-4-19) । अपरुद्धस्य राज्ञः पुनराह्वानकाले मन्त्रे "बलिं प्रति पश्यास उग्राः" । (अथर्व. सं. 3-4-7) । इत्युच्यते । अनेन ज्ञायते राज्ञो जनानां च बलिविषये विवादः संवृत्त इति । यदा च राजा राज्यनिर्वाहार्थं बहुं बलिं प्रजाभ्य आकाङ्क्षितवान् तदा प्रजा राजानं त्यक्तवन्तः । यदा च राज्ञ आवश्यकतां विज्ञाय जनाः पुनराह्वानार्थं गताः तदा जना एवं वदन्ति 'हे राजन्! पश्य बहुबलिः अस्माभिर्दीयते" इति । अन्यत्रापि बलिप्रस्तावो देवता-सम्बन्धेऽस्ति (ऋक्सं. 1 70 4) "भरन्त विश्वे बलिं स्वर्णः" । अत्र सर्वे जना बलिमाहरन्तु इति प्रार्थ्यते । तत्र बलेः स्वर्गसदृशत्वं सूचितम् । "तुभ्यं भरन्ति क्षितयो यविष्ठ । बलिमग्ने अन्तित ओत दूरात्" (5-1-10) । अनेन समीपदेशाद्वा दूरदेशाद्वा राज्ञे बलिः सर्वदा आहर्तव्य इति सूच्यते । "भरन्त्यस्मै संयतः पुरः प्रस्रवणा बलिं" (ऋक्सं. 8-100-9) । "अपमित्यमप्रतीतं यदस्मि यमस्य येन बलिना चरामि" (अथर्वसं. 6-11-717) । "अथो अह्न एवैष बलिर्ह्रियते" (तै. ब्रा. 1-2 3-27) । "इन्धानास्त्वा सुप्रजसः सुवीराः ज्योक् जीवेम बलिहृतो वयं ते" (तै. सं. 1-6-2-2) । अत्र च बलिदानेन प्रजानां क्षेमाभिवृद्धिर्भवतीति सूच्यते । "सर्वेऽस्मै देवा बलिमाहरन्ति" (तै. सं. 1-5-7) । बलिहार इति प्रजा उच्यते । "अमूस्त आदधानि प्रजयापर्य एनान् बलिहाराय मृडतात् मह्यमेव" (अथर्वसं. 11-1-20) । दिवश्येननाम्न्यः काश्चनेष्टयः तैत्तिरीयब्राह्मणे (3-12-27) विहिताः । तत्राग्निर्बलानिति देवता । तत्र सर्वाणि भूतानि बलिं हरन्ति इति सर्वेभ्यो बल्यादानं प्रतिपादितम् । "द्विषन्तं भ्रातृव्यं बलिं हारयति" (शत.ब्रा.1-5-318) । अत्र शत्रुभ्योऽधरीकरणानन्तरं करादानं स्वजनेभ्यो बल्याहरणं च प्रतिपाद्यते । "वृत्रायोदराय बलिं हरन्ति" (शथ. ब्रा. 1-6-3-17—शत. ब्रा. 11-2-6-14) । यथा श्रेयसे पापीयान् बलिं हरेत्" (P. B. 15-7-4) । तद्यथा "श्रेष्ठाय बलिं ह्रियमाणं पन्थानं पर्यनुवेदयति गत्यै" । अत्र राज्ञे बलिं दातुमागतस्य मार्गोपदेशः क्रियते । बलिहरणविषये वैश्यानां पृथगेव प्राधान्यं वेदेषु प्रतिपाद्यते" (ऐ ब्रा. 7-29) । यतो वैश्यः प्राप्तश्रीर्महैश्वर्यवान्

तस्माद्राजा तदा तदा वैश्यान् बलिमाकाङ्क्षति । ऐतरेयब्राह्मणे वैश्यसदृशाः पुत्रा जायेरन्निति वदद्ब्राह्मणं वैश्यमेवं विशेषयति "अन्यस्य बलिहृत्, अन्यस्य अद्यः यथा कामजेयः" इति । अनेन वैश्येन कृषिवाणिज्यव्यापारैः यत्संपादितं तत्र राज्ञो विशेषाधिकारो वर्तत इति ज्ञायते । अन्यत्र च "वैश्यो वा राज्ञे बलिं हरेत्" (शत.ब्रा. 1-2-6-14) रीत्या यदा राज्ञो धनावश्यकता भवति तदा "यत्ते परोहितं तदा हर" इति वैश्यं वदति । यदि स न ददाति बलात्कारेण वैश्याद्राजा बलिं समाहरति । अत्र च कारणमपि ब्राह्मणे प्रतिपादितम् । "वैश्यस्यैश्वर्यं क्षत्रियाधानम्" इति क्षत्रियस्यैव वशे सति वैश्यं पशव उपतिष्ठन्त इति । शतपथब्राह्मणे च असकृद्राजा अत्तृत्वेन प्रतिपादितः । प्रजाश्चाद्याः प्रतिपादिताः । प्रजा बहवो राजा चैकः । अत्ता एकः । अद्याश्चापरिमिताः । अयमत्तृ-अद्यभावो बलिदानप्रयुक्त एव । (शत. ब्रा. 1-3-2-14—3-3-2-8) । कथं वा राज्ञे प्रजा बलिमाहरन्? बलात्कारेण वा स्वयमेव वा आहोस्विदुभयथापि वेति ब्रूमः । स्वकार्यं जानन्तो जनाः स्वैरेव सृष्टस्य राजतत्त्वस्य रक्षणार्थं स्वयमेव बलिमाहरेयुः । यदि च कदाचित् प्रजा बलिं नाहरेयुः तदा बलात्कारस्यापि आवश्यकता अस्त्येव । "विशश्चक्रे बलिहृतः सहोभिः" इत्यादीनां पर्यालोचने बलात्कारस्यापि आवश्यकतासीत् इति ज्ञायते । बलिविषये काठकसंहितायां काचनाख्यायिकैवं श्रूयते "प्रजापतिः प्रजा असृजत । ता अस्मादपाक्रामन् । ता ऊर्ध्वं आयन् । ता अकामयत उप मा वर्तेरन्निति । सोऽतप्यत । स आत्मानं मेधाया लभत । ता एनमुपावर्तन्त । ता अस्मादभिययुः । तान्याचन्त । तस्मात् पशवो न्यक्नाः । ता आरादचरन् । ता एनं बलिभिरुपायन् देवयजने । पृथिवी बर्हिरोषधयः । प्रोक्षणीभिराप इध्मेन च यूपेन वनस्पतयः पशुभिरजावयः आशिरा चाज्येन च गाव एते वै देवा बलिहृतः यज्ञः प्रजापतिः तस्मा एते सर्वा हैवं बलिं हरन्ति आस्मै बलिं हरन्ति य एवं वेद" इति ॥

अत्र प्रजापतये सर्वेऽपि प्राणिनो बलिमाहरन्निति प्रतिपाद्यते । इदं च राज्ञे बह्वीभिः प्रजाभिर्बहुविधबलेराहरणस्य प्रदर्शनम् । तथा तैत्तिरीयब्राह्मणे (2-2-10) कश्चनेतिहासः पठ्यते । तत्र चेन्द्रस्य राजत्वं पूर्वं प्रतिपाद्य स कथं वा प्रजा अपालयदिति प्रतिपाद्यते । एवं हि अत्र कथा वर्तते "स प्रजापतिरेव भूत्वा प्रजा आवयत् । ता अस्मै नातिष्ठन्त अन्नाद्याय । ता मुखं पुरस्तात् पश्यन्तीः । दक्षिणतः पर्यायन् । स दक्षिणः पर्यावर्तत । ता मुखं पुरस्तात् पश्यन्तीः । दक्षिणतः पर्यायन् । स दक्षिणतः पर्यावर्तत । ता मुखं पुरस्तात् पश्यन्तीः । दक्षिणतः पर्यायन् । स दक्षिणतः पर्यावर्तयत । ता मुखं पुरस्तात् पश्यन्तीः । मुखं दक्षिणतः पश्चात्पर्यायन् स पश्चात्पर्यवर्तयत । ता मुखं पुरस्तात् पश्यन्तीः । मुखं दक्षिणतः । मुखं पश्चात् । मुखमुत्तरतः । ऊर्ध्वा आयन् । ता उपरिष्टान्यवर्तयत । ताः सर्वतोमुखो भूत्वा अवयत् । ततो वै तस्मै प्रजा अतिष्ठन्तान्नाद्याय" इति अत्र राज्यप्राप्त्यनन्तरं

इन्द्रो राज्यकार्यनिर्वाहार्थं करं दातुं प्रजां प्रार्थयामास । परं तु प्रजा नैच्छन्त । कराहरणार्थं कञ्चन पुरुषमपि प्रेषयामास । भीताः प्रजाः तं दृष्ट्वा प्राचीं दिशं त्यक्त्वा दिशां दक्षिणाम् आगताः । तत इन्द्रो दक्षिणस्यां दिशि अपि पुरुषं प्रेषितवान् । ततः प्रजाः पश्चिमां दिशां जग्मुः । एवमुत्तरस्यां दिशायामपि ऊर्ध्वदिशायामपि पुरुषं प्रजिगाय । राजपुरुषं सर्वत्र निशाम्य गतिमन्यामपश्यन्तः इन्द्राय करं ददुरिति प्रतिपाद्यते । अनेन करदानमवर्जनीयमिति गम्यते । यतो राज्ञि वर्तमानं सर्वमपि प्रजानां स्वम् । अत एव भूमिदानकाले प्रजानाम् अनुमतिमादायैव राज्ञा दानं कर्तव्यमिति सूच्यते । "यस्मा उ क्षत्रियः विशा संविदानः अस्यामवसानं ददाति । तत्सुदत्तं भवति (शत.ब्रा. 7-1-1-44) बलिभागः कः? इति न स्पष्टं प्रतीयते । "स नाकमभ्यारोहति । यत्र शुल्को न क्रियते । अबलेन बलीयसे । परलोके शुल्को न विद्यते" (अथर्वसं. 3-29-3) इति वदता मन्त्रेण अस्मिँल्लोके शुल्कास्तित्वं मुखान्तरेण प्रतिपादितम् । अस्मिँल्लोके अधिकबलाय राज्ञे न्यूनबलेन सामन्तराजेन वा प्रजाभिर्वा शुल्कं दातव्यमिति सूचितम् । प्रजानामैश्वर्ये षोडशतमो भागो राज्ञे दातव्यः करत्वेन इति अथर्ववेदमन्त्राधारेण केचिदभिप्रयन्ति । "यद्राजानो विभजन्त इष्टापूर्तस्य षोडशं यमस्यामी सभासदः" (अथर्वस०........) इति षष्ठो भागः कर इति अर्वाचीनराजनीतिसंप्रदायानुसारेण निर्णेतुं शक्यते ॥

॥ राजसम्बन्धिनः ॥

राजवत् राजकुटुम्बस्थानम् । राजपितुः, मातुः भ्रातुः पुत्रस्य च मानार्हत्वं तत्र तत्र सूचितम् । यत एव राजाख्यं स्थानमत्यन्तमुत्कृष्टम्, अत एव राजसम्बन्धि सर्वमपि प्रजानां बहुमानार्हं भवति । जातितत्त्वाश्रयविभागानुसारेण केचन क्षत्रियत्वेन निरूपिताः । तेषां तावद्धर्माः स्मृतिषु प्रतिपादिताः, युद्धकरणं च स्मृतिषु प्रतिपादितम् । युद्धकरणं च तेषां जातिधर्मः । परं तु प्रजापालनार्थराजाख्यस्य स्थानस्यार्हाः क्षत्रियेष्वपि केचिदेव । कानिचन कुटुम्बानि परम्परया प्रजापालने नियुक्तानि भवन्ति । यदा च राजकुटुम्बे राज्यस्यार्हा नासन् तदा राजस्त्रियोऽपि राजस्थाने नियुक्ताः । यदा च न केचन वर्तन्ते राजकुटुम्बे सन्निहिताः तदा अन्ये क्षत्रिया राजस्थानं प्राप्नुवन्ति । राजकुलव्यवहारो जैमिनीयोपनिषदि वर्तते (3·28·4) । ये च जना राजकुलोत्पन्नाः, अपि तु तद्धर्मविहीनाः ते राजन्यबन्धुत्वेन व्यवहृताः यथा वा ब्राह्मणबन्धुरिति शतपथब्राह्मणे (1-2-4-2) "द्वाभ्यां राजन्यबन्धवः । रथेन शरेण च राजन्यबन्धवः" इति । "अनोयं राज्यबन्धुरवादीत् हन्त एनं ब्रह्मोपमाह्वयामः" इति । "पञ्चमा राजन्यबन्धुः प्रश्नान् राजन्यबन्धुः" व्यवहारः कृतः । तदेतत् देवव्रतं राजन्यबन्धवो मनुष्याणां अनुत्तमां गोपायन्ति । तस्मादेतेषु वीर्यवान् जायते । "अमृतवाका वयसां साक्षिप्रश्नेन" (शत.ब्रा. 10-5-2-10) । "आगहि आद्रवेति इति वैश्यस्य च राजन्यबन्धोश्च" (शत.ब्रा.1-1-4-12)। राजपिता ऐतरेयब्राह्मणे निर्दिष्टः । राज्ञोऽभिषेककाल उत्क्रोशो विहितः । (अथर्वसं.18-12)। तत्र राजपितरमिति निर्देशो दृश्यते । तत्राभिषिक्तो राजा जनानां पितृस्थानं लभते इति वा, अथ वा भाविकालस्य राज्ञः पिता भवति इति वा उभयथापि व्याख्या सम्भवति । अन्यत्र च "आस्य यजमानस्य वीरो जायताम्" इति वीरस्य राजपुत्रस्य प्रार्थना वर्तते । 'आस्य पुत्रः प्रतिरूपो जायते । (अश्वः पशूनां मध्ये अनुरूपतमः प्रजापतेः । तादृशाश्वालम्भनेन राज्ञः प्रतिरूपः पुत्रो जायते इति व्याख्यातम्) । तथाभिषेकसंस्रावं तत्प्रियतमाय पुत्राय प्रयच्छति इति वदद् ब्राह्मणं तादृशप्रदानस्य पितृवीर्य-अनुसन्ततिरेव पुत्रे, प्रयोजनमिति प्रतिपादयति । "इदं मे वीर्यं पुत्रम् अनुसन्तनवत्" (शत. ब्रा. 5-4-2-8) । उभयथापि राजपितुः पूज्यता सूच्यते । स राजपुत्रोऽपि बहुमानं लभते । परं तु राज्यतन्त्रे न किमपि स्थानं तेषां निर्दिष्टम् । बहुमानार्हत्वेन राजपुत्रा अपि निर्दिष्टा इत्येव वक्तव्यम् । अश्वमेधे शतं तल्प्यराजपुत्रा निर्दिष्टाः (तै. ब्रा. 3-8-9-3) । अत्र तल्प्यत्वविशेषणं

विवाहादिसम्बन्धार्हत्वं सूचयति । अनेन ज्ञायते राजस्वपि केषुचिदेव विवाहादिव्यवहारा विहिता अवर्तन्त इति । अश्वरक्षणार्थं प्रेष्यमाणेषु पुरुषेषु राज्ञः पितुः अनुजायाः पुत्रो राजमातुः अनुजायाः पुत्राश्च । (तै. सं. 3-8-4-1,3-8-5-1) । ऋग्वेदेऽपि (10-40-3) अश्विनौ राजपुत्रत्वेन वर्णितौ । यथा वा राजपुत्राणां महताऽऽडम्बरेणागमनं एवमागन्तव्यमिति (10 40 3) । "राजपुत्राः कवचिनः शतं राजन्या निषङ्गिणः शतं सूतग्रामण्यः पुत्राः इषुमर्षिणः शतं क्षत्रसंग्रहीतॄणां पुत्रा दण्डिनः शतं अश्वशतं निरष्टनिरवणं यस्मिन्नेवम् अविशाय रक्षन्ति" (शत. ब्रा. 13·4 2 5) । तत्र राजपुत्रसूतग्रामणीपुत्रक्षत्रसंग्रहीतॄणां पुत्राणामपि प्रस्तावोऽस्ति । काठकसंहितायां (28) ध्रुवग्रहरक्षणे राजपुत्रो नियुक्त इति दृश्यते । "राजपुत्रो गोपायति । राजन्यो वै प्रजानामधिपतिः" (14 8) इति राजप्राश्नाति, राजपुत्रो वीर्यं, राजपुत्रोऽपि राष्ट्रवीरेषु अन्तर्भूतः । "अष्टौ वै वीरा राष्ट्रं समुद्यच्छन्ति । राजभ्राता च राजपुत्रश्च पुरोहितश्च महिषी च सूतश्च ग्रामणीश्च संग्रहीता च एते वै राष्ट्रं समुद्यच्छन्ति । एतेष्वेव अभ्यषिच्यते" । राजमातुरपि कौषीतकीब्राह्मणे प्रस्तावोऽस्ति (37·6) ॥ तथा शाङ्खायनश्रौतसूत्रेऽपि (17-5 34) ॥

॥ राजकृतः ॥

अथर्ववेदे राजकृतां प्रस्तावोऽस्ति । तृतीये काण्डे पञ्चमे सूक्ते "ये राजानो राजकृतो स ता ग्रामण्यश्च ये" इति राजकृतः राजकृतव्यवहारो दृश्यते । परं तु के ते राजकृत इति न स्पष्टं प्रतीयते । ऐतरेयब्राह्मणे च राजकर्तृणाम् उत्क्रोशप्रस्तावोऽस्ति । अभिषेककाले आसन्द्यामासीनं राजानं प्रति राजकर्तार उत्क्रोशन्ति । तत्रापि के ते राजकर्तार इति न स्पष्टम् । ऐतरेयब्राह्मणे (8-15-5) शतपथब्राह्मणे (3-4-17) अत्र उभयत्रापि राजकृतां प्रस्तावोऽस्ति । तत्र यथा राज्ञो अराजानो राजकृतः सूतग्रामण्य इति सूतग्रामण्यां राजकृत्त्वं प्रतिपाद्यते । अत्राराजानो राजकृत इति राजकृताम् अराजत्वं स्पष्टमुक्तम् । अथर्ववेदे ये राजानो राजकृत इति राज्ञामेव राजकृत्त्वं दृश्यते । इदं च सम्भाव्यते यदि च यः कोऽपि राजा भवितुमभिलषति तस्यान्यराजभिः अङ्गीकार आवश्यकः । "यस्मै वै राजानो राज्यमनुमन्यन्ते स राजा भवति न स यस्मै न" (शत. ब्रा. 94-1-13) । परं तु शतपथब्राह्मणरीत्या अराजान एव राजकृत इत्यूहितुमपि प्रसक्तिरस्ति । अथापि कथं वा एते राजकर्तारः समागता इत्येतद्विचारणीयं भवति । कथं तेषां राजकर्तृत्वमायातमिति न ज्ञायते । अथापि सभासमितिस्थाने केचन राजकर्तृत्वेन प्रतिपादिता इति वयं ब्रूमः । अथर्ववेदरीत्या परम् एवमभिप्रायवर्णनं दुःशकं भवति । यतो राजकर्तृत्वं सभासमितिद्वारा जनानामेव वक्तुमुचितं भवति । अथर्ववेदे पूर्वसूक्ते जनानां प्राधान्यमुक्त्वा समनन्तरसूक्ते राजकर्तार इति केषाञ्चिन्नूतनप्रवेशः सर्वथा नाङ्गीकारार्हः । अतश्च राजकृच्छब्देन जनप्रतिनिधीनां केषाञ्चिदेव ग्रहणमुक्तमित्युत्पश्यामः ॥

॥ राजानुचराः ॥

राज्ञामनुचरा विद्यन्ते । तैत्तिरीयसंहितायां राजानुचरा इति निर्देश एव दृश्यते । “यावद्भिर्वै राजानुचरैरागच्छति । सर्वेभ्यो वै तेभ्य आतिथ्यं क्रियते” (6 2-1) इति । ते च सूतग्रामण्य इति ब्राह्मणान्तरेभ्यो ज्ञायते । इभ-उपस्ति-इत्यादिशब्दा अनुचरार्थे प्रयुक्ताः । ऋग्वेदे इभशब्दः प्रयुक्तः । “इभ्यान्न राजा वनान्यत्ति” (1-65-8) । “याहि राजेमवाँ इभेन” (4·4 1) । “तव वृक्षा उपस्तयः” (ऋक्सं. 10-97-23) । “उपस्तीन् पर्ण मह्यं सर्वान् कृण्वभितो जनान्” (अथर्वसं. 3-5 6) । उपस्तिर्वा अन्ये वा अनुचरा राजायत्तसत्ताकाः । “स्तोमस्तोमस्योपस्तिर्भवति भ्रातृव्यमेवोपस्तिं कुरुते” (तै.सं.3-3-5) । “भ्रातृव्यमेवास्योपस्तिं करोति” (कठ.सं. 31-9) । अत्रोपस्तिशब्दा युद्धपराजितराजपरा इति ज्ञायते । यत्र यत्र राजा गच्छति तेऽपि राज्ञा सह गच्छन्ति । “अथ.सं.3-5-7) । अत्राधुनिकाः जिह्मर्प्रभृतयो ग्रीकउदाहरणेन पराजिता अनार्या एवोपस्तिशब्देनोच्यन्त इति वदन्ति । इदं चात्रावश्यं ज्ञातव्यम्—ग्रीग्देशीयेतिहासे “दास” इति केचिज्जना वर्तन्ते । नैव तेषां ग्रीकराज्यतन्त्रे सम्बन्धः । एतादृशोदाहरणेनार्या अपि अनार्यान् दासीकृतवन्त इत्यभिप्रायं मनसिकृत्य तदनुसारेणैव सर्वत्र कल्पयन्ति । परन्तु ग्रीग्देशे दासव्यवहारस्य सत्यत्वमस्तु । वैदिकदेशीयेतिहासे एतादृशवादस्य अवकाशः सर्वथा नास्ति । वैदिकराज्यतन्त्रे प्रजात्वेनाङ्गी-कृतानां सर्वेषामेवाधिकारः सर्वदा सूच्यते । अत उक्तस्य शब्दस्यानार्य एवार्थ इति वक्तुं न शक्यते । पर्णमणिमन्त्रे यत्र चोपस्तिशब्दः प्रयुक्तः तत्र धीवानो रथकाराश्चोक्ताः । अथर्ववेदीय (3-13 8 7) पैप्पलादशाखायां चत्वारोऽपि वर्णा उपस्तिशब्दसंगृहीताः । ‘उपस्तिरस्तु वैश्य उत शूद्र उतार्थः सवान्तान् पर्णरन्धय उपस्ति कृणु मे दिनम्” । अत्र, अस्मिन् मन्त्रे सर्वेषामपि वैश्य-शूद्र-तक्षरथकारकर्मारा उपस्तित्वेन प्रथममन्त्र उक्ताः । अस्मिन् मन्त्रे सर्वेषामपि वैश्य-शूद्र-आर्याणाम् उपस्तित्वं प्रतिपाद्यते । अतश्च राज्ञा साकं ये गच्छन्ति ते उपस्तिशब्देनोच्यन्ते । स्वमहिमप्रकाशार्थं पराजितानपि राजा स्वेन साकं नयति ॥

॥ अभिषेकः ॥

राज्ञो वरणानन्तरं राज्ञो राजत्वसिद्ध्यर्थमभिषेककर्म विहितम् । अस्य च विवरणम् ऐतरेयपञ्चविंशशतपथब्राह्मणेषु क्रियते । 'राजेत्येतान् अभिषिक्तान् आचक्षते' इति दर्शनात् अभिषिक्तस्यैव राजत्वम् । "राजानो भविष्यन्ति अभिषेचनीयाः" (शत.ब्रा. 13-4-2-17) इति दर्शनात् अभिषिक्तानामेव राजत्वं नान्येषाम् इति सुस्पष्टं ज्ञायते । "विशो अभिषेचनीयाः" (शत. ब्रा. 13-4-2-17) इति दर्शनात् विशामभिषेक इति ज्ञायते । अत्र विट्शब्दो न वैश्यजातिपरः । अपि तु पाल्यमानप्रजापर एव । यद्यप्यैतरेयब्राह्मणकाले जातितत्त्वं पुरस्कृत्य जनसमुदायव्यवहारः प्रथितः, अथापि विट्शब्दस्य राजशब्दस्य च राज्यतन्त्ररीत्यैवात्रापि मुख्यत्वं दृश्यते । परं त्विदं न स्पष्टं प्रतीयते—राज्ञः (Election) एलक्षन्काले जातितत्त्वमासीद्वा न वेति । य एत्र विड्मी राजत्वेनोद्धृताः तेषामेवाभिषेक इति निश्चीयते । यद्यपि अभिषेककर्म अलौकिकमेव; अथापि राज्यतन्त्रतत्त्वानां जनतन्त्रतत्त्वानां चात्र संमिलितत्वात् अभिषेकसम्बन्धिमन्त्रब्राह्मणानि किञ्चिद्विमृशामः । अभिषेककर्म राजसूयसम्बन्धितया स्वतन्त्रतया च द्विधा दृश्यते । राजाभिषेकानन्तरमेव राज्ञो राजत्वं भविष्यति । तदनन्तरमेव राजसूयादिकर्मसु अस्याधिकारः । ऐतरेयब्राह्मणे अभिषेककर्म एवं प्रतिपाद्यते । अत्र हि 8-12. ऐन्द्रो महाभिषेकः सविस्तरं प्रतिपाद्यते । तदनन्तरं 8,15,14,17,18,19.20 ब्राह्मणै राजाभिषेकः सविस्तरं प्रतिपादितः । अत्र सर्वजयार्थं सर्वलोकलाभार्थं सर्वेषां राज्ञां श्रैष्ठ्यादिप्राप्त्यर्थं च ऐन्द्रो महाभिषेको विहितः । अत्र क्षत्रियमाभिषिञ्चेदिति श्रवणात् क्षत्रियेष्वेव एकस्य राजत्वेन उद्धारः सूचितः । अत्र च राज्ञा कर्तव्यः शपथो विचारार्हः । यदि च पुरोहिताय राजा द्रुह्येत् तदा जन्मप्रभृति मरणान्तं यद्यत्सत्कार्यं कृतं (इष्टापूर्तं) यत् लोकान्तरसम्पादनं च कृतं तत्सुकृतम् आयुः प्रजां च वृञ्जीय इति राज्ञा कर्तव्यः शपथः । एवमेव राजा शपथं कृत्वा अभिषिक्तो भवति । अयं च शपथः पुरोहितमात्रविषय इति व्याख्यातारोऽभिप्रयन्ति । जयस्वालमहाशयः परं अत्र पुरोहितविषयत्वस्य अश्रवणात् जनानुद्दिश्यैव राज्ञा शपथः क्रियत इति वदति । न्याय्यं चैतत् । न हि पुरोहितः स्वार्थं राजानमभिषिञ्चति । अपि तु राज्यतन्त्रनिर्वाहार्थमेव । अतश्च द्रोहो न पुरोहितमात्रे पर्यवस्यति । यतः पुरोहितो जनानां प्रतिनिधित्वेनैव स्थित्वाभिषेकं करोति । पुरोहितद्वारा अपि जनानुद्दिश्यैवायं शपथ इति वक्तुं शक्यते । अभिषेकार्थभागेषु चतुर्विधा वृक्षविशेषा

उक्ताः—न्यग्रोधः, औदुम्बरः, अश्वत्थः, प्लक्षः इति । एतद्वृक्षचतुष्टयं प्रशंसद् ब्राह्मणम् एकैकस्य वृक्षस्य मुख्यत्वं प्रतिपादयति । "क्षत्रं वा एतद्वनस्पतीनाम्" इति न्यग्रोधः स्तुतः । न्यग्रोधसम्बन्धेन 'क्षत्रमेवास्मिन् तद्दधाति' इति । अत्र क्षत्रधारकत्वं सूचितम् । औदुम्बरस्य भौज्यत्वं प्रतिपाद्य 'भौज्यमेवास्मिन् दधाति' इत्युक्तम् । अश्वत्थस्य साम्राज्यत्वमुक्त्वा 'साम्राज्यमेवास्मिन् तद्दधाति' इत्युक्तम् । प्लक्षस्य स्वाराज्यत्वं वैराज्यत्वं च प्रतिपाद्य तत्सम्बन्धेन 'स्वाराज्यवैराज्ये अस्मिन्नुपदधति' इत्युच्यते । तथा अभिषेके उपयोक्ष्यमाणव्रीहिमहाव्रीहिप्रियङ्गुयवानपि राज्यतन्त्रसम्बन्धेनैव ब्राह्मणं प्रशंसति । 'व्रीहयः क्षत्रम् महाव्रीहयः साम्राज्यम्, भौज्यं प्रियङ्गवः' इति प्रशंसानन्तरं यवान् सेनान्यत्वेन प्रशंसति ब्राह्मणम् । अत्र सेनानेतृत्वं राज्ञोऽस्तीति ज्ञायते । अत्र सेनानेतृत्वं सेनानीद्वारा कदाचित् साक्षाद्वा भवतु । व्रीह्यादिद्रव्याणि अङ्कुरार्थमेव सम्पादनीयानि । 'औदुम्बर्यामासंद्यां राजानम् आरोपयित्वा अभिषेकं कुर्वन्ति । सम्भारसम्भरणानन्तरम् आसन्द्याः अभिमन्त्रणं कृत्वा तदनन्तरमेवारोपणं कार्यम् । अत्र च वसु-रुद्र-आदित्यविश्वेदेवा मरुतः अङ्गिरसः साध्याश्च आरोहेण उपकुर्वन्तु' इति प्रार्थ्यते । अत्र 'वसवः साम्राज्याय, रुद्रा भौज्याय, आदित्याः स्वाराज्याय, विश्वे देवा वैराज्याय, मरुतश्चाङ्गिरसश्च पारमेष्ठ्याय, साध्या आप्त्याश्च राज्याय महाराज्यायाधिपत्याय सावश्याय आतिष्ठाय आरोहन्तु' इत्युच्यते । तदनन्तरम् आसीनं राजकर्तारोऽभ्युत्क्रोशन्ति । 'न वा नभ्युत्कृष्टः क्षत्रियो वीर्यं कर्तुमर्हति' इति दर्शनाद्राज्ञि वीर्याधानार्थमभ्युत्क्रोशः । न केवलं राजकर्तारः अभ्युत्क्रोशन्ति ते जनानपि एवमभ्युत्क्रष्टुं आज्ञापयन्ति—"इमं जना अभ्युत्क्रोशतः" इति । तत्र जनतन्त्रतत्त्वसम्बन्धः सुस्पष्टं प्रतीयते । राजकर्तारोऽपि जनाङ्गीकारार्थमेवाभ्युत्क्रोशं कुर्वन्ति । अत्र च राज्ञोऽधिकारं सूचयितुं 'सम्राजं साम्राज्यं भोज्यं स्वराज्यं स्वाराज्यं विराजं वैराज्यं परमेष्ठिनं पारमेष्ठ्यं राजानं राजपितरम्' इति विशेषणान्युक्तानि । अभ्युत्क्रोशनार्थान्येतानि । तदनन्तरमनेन अभिषेकेण किं राज्यस्य जनानां च भवति? इत्येतदपि अभ्युत्क्रोशमन्त्रे प्रतिपाद्यते । 'क्षत्रमजनि क्षत्रियोऽजनि । विश्वस्य भूतस्य अधिपतिः अजनि । विशां अत्ता अजनि । अमित्राणां हन्ता अजनि । ब्राह्मणानां गोप्ता अजनि । धर्मस्य गोप्ता अजनि' इति अभ्युत्क्रोशप्रकारः । अत्र 'क्षत्रमजनि क्षत्रियमजनि' इत्ययमंशो राज्यतन्त्रतत्त्वस्य प्राधान्यं वदति । अभिषेकानन्तरम् अभिषिक्तराजद्वारा राज्यतन्त्रतत्त्वस्योत्पत्तिरेव सञ्जात इति प्रतिपाद्यते 'विश्वस्य भूतस्याधिपतिरजनि" इति राज्ञोऽधिकारस्य सर्वसाधारणत्वं प्रदर्श्यते । 'विशाम् अत्ता अजनि' इति विट्क्षत्रिययोः परस्परोपकार्योपकारकभावः सूचितः । „'ब्राह्मणानां भोक्ता अजनि इति एतद्वाक्यं ब्राह्मणप्रशंसार्थमुक्तम् । न हि राज्ये ब्राह्मणमात्रं वर्तते; सर्वासामपि जातीनां सद्भावात् । 'धर्मस्य गोप्ता अजनि' इत्ययमंशो राज्ञः कृत्यमवगमयति । धर्मशब्दस्यार्थो

धर्मविशेषाश्च तत्र तत्र श्रुतिषु स्मृतिषु प्रतिपादिताः। यद्यप्यस्य राज्ञो धर्माधर्मनिर्णये नाधिकारोऽस्ति तथापि धर्मरक्षणार्थं यद्यत्कर्तव्यं तत्सर्वं करोति। एतदेव राज्ञो मुख्यत्वं यद्धर्मगोप्तृत्वम्। न धर्मप्रवर्तकत्वम्। जनतन्त्रतत्त्वरीत्यापि जनानामपि न धर्माधर्मनिर्णायकत्वम्; जनसमुदाययोगक्षेमार्थानां धर्माणामनादित्वात्। धर्मरक्षणप्रकाशविशेष एव। ते स्वाभिप्रायमाविष्कुर्वन्ति तदनन्तरं पठ्यमानमन्त्रः ऋग्वेदे पठितः। "निषसाद धृतव्रतो वरुणः पस्त्यास्वा साम्राज्याय सुक्रतुः" (1-25-10) इति। परं त्वैतरेयब्राह्मणे पठ्यमाने मन्त्रे 'साम्राज्याय भौज्याय स्वाराज्याय वैराज्याय पारमेष्ठ्याय राज्याय महाराज्यायाधिपत्याय स्वावश्याय आतिष्ठाय' इत्यधिको मन्त्रभागः पठ्यते। अनेन ज्ञायते मन्त्रोत्पत्तिकालापेक्षया अनन्तरकालेषु राज्यतन्त्र एते अधिकांशाः समुत्पन्ना इति। तैत्तिरीयब्राह्मणेऽपि "साम्राज्याय सुक्रतुः" इत्येव मन्त्रभागं गृहीत्वा 'साम्राज्यमेवैनं सुक्रतुं करोति' इति विवृतम्। तेन तद्ब्राह्मणकालेऽपि भौज्यादिकं नासीदिति ज्ञायते। अयमेव मन्त्रो वाजसनेयसंहितायां पठितः, व्याख्यातः शतपथेन च। परं त्वत्रापि 'साम्राज्याय सुक्रतुः' (5-4-4-5) इत्येव पठ्यते। अत्र च राज्याय इति एवैतदाह इति साम्राज्यपदं च राज्यपरतयापि व्याख्यातम्। अभिषेकमन्त्रेऽपि साम्राज्य-भौज्य-स्वाराज्य-वैराज्य-पारमेष्ठ्य-राज्यमहाराज्य-आधिपत्यपदप्रयोगो दृश्यते। अयं चाभिषेको राजसूयाभिषेकाद्भिन्नः; स्वतन्त्रश्च। अत्र च साम्राज्यादिशब्दानां प्राधान्यं राज्यतन्त्ररीत्या सुस्पष्टमेव। परं तु राजसूयाभिषेके एतादृशपदानाम् अदर्शनात्तदुत्तरकालीनराज्यतन्त्राभिवृद्धिमेव एतद् द्योतयति। सम्राट्-विराट्-स्वराट्इत्यादिपदानि राज्यतन्त्ररीत्या मुख्यत्ववन्त्येव ॥

॥ पुनरभिषेकः ॥

सोमयागानन्तरं पुनरभिषेको राज्ञः कर्तव्य इति ऐतरेयब्राह्मणे विहितम्। पुनरभिषेकस्य प्रयोगः ऐतरेयब्राह्मणे एव प्रतिपादितः। अस्मिन्नभिषेकेऽपि राज्यतन्त्रतत्त्वसम्बन्धिव्यवहारा दृश्यन्ते। आसन्द्यां व्याघ्रचर्मास्तरणं विदधत् ऐतरेयब्राह्मणं 'यथा वा व्याघ्र आरण्यानां पशूनाम् क्षत्रम् एवमयं राजन्यो मनुष्याणां क्षत्रम्' इति वदति। आरोहणमन्त्रेऽपि राज्य-साम्राज्य-भौज्य-स्वाराज्यादीनां प्रस्तावोऽस्ति। अभिषेकमन्त्रेषु तृतीयमन्त्रे 'महान्तं त्वा महीनां सम्राजं चर्षणीनां देवी जनित्र्यजीजनद्भद्रा जनित्र्यजीजनत्' इति पठितम्। अत्र सम्राट्पदप्रयोगो दृश्यते। व्याहृतीभिरभिषेककाले कल्पभेदो विहितः। यदि च राजा द्विपुरुषं राज्यमिच्छेत् तदा भूर्भुवः इति व्याहृतीभ्यामभिषिञ्चेत्। यदा च त्रिपुरुषं राज्यमिच्छेत् तदा भूर्भुवःस्वः इति व्याहृतीभिरभिषिञ्चेत् इति कल्प उच्यते। अत्र द्विपुरुषं त्रिपुरुषम् इति दर्शनात् पुत्रपौत्रपर्यन्तं राज्यसम्बन्धो वर्तत इति वक्तुं शक्यते। न तावता जनतन्त्रतत्त्वेनास्य विरोधः। त्रिपुरुषराज्यकामनायामपि जनानामस्मिन्नादर आवश्यक एव। यदि च तेऽमुं नाङ्गीकुर्युः तदास्य कामना निहता भवेत्। पुत्रपौत्रप्रपौत्रपर्यन्तं जनाङ्गीकारप्रर्थनापरैव। पुनरभिषेकाङ्गहोमनिरूपणावसरे ब्राह्मणेन किञ्चित् प्रतिपाद्यते। सोमयागं कृतवतः क्षत्रियादूर्क् अन्नाद्यम् ओषधीनां रसो ब्रह्मवर्चसम् इरा पुष्टिः प्रजापतिः एतानि व्युत्क्रामन्ति। एतेन क्षत्रस्वरूपस्यैव हानिर्भवति। ओषधीनां प्रतिष्ठा च क्षत्राधीना। एवमुक्त्वा अन्ते ब्राह्मणम् "ब्रह्म प्रपद्ये स्वाहा" "क्षत्रं प्रपद्ये स्वाहा" इत्याहुतिद्वयं विदधाति। आभ्यामाहुतिभ्यां 'ब्रह्मक्षत्रे सन्दधाति' इत्युच्यते। दूर्वां प्रशंसद् ब्राह्मणम् एवं वदति—अभिषिक्तो राजा यद्यप्येकस्मिन्नेव स्थले वसति, परं तु स्वाधिकारं स्वपुरुषद्वारा तत्र तत्र विनियुञ्जन् तत्र तत्रापि स्थित एव भवति इति। "नितत उपद्दीह क्षत्रियः राष्ट्रवान् भवति प्रतिष्ठित इव (अथ. ऋक्सं. 8-8-1)। अभिषेकाङ्गत्वेन सुरापानं च विहितम्। स्वपीतावशिष्टसुरा च मित्रसम्पादनार्थम् अन्यस्मै दातव्येत्युक्तम्। तैत्तिरीयब्राह्मणे अथर्ववेदे चाभिषेकः पृथक् पठितः। तैत्तिरीयब्राह्मणद्वितीयकाण्डे पञ्चदशषोडशसप्तदशानुवाका अभिषेकार्थान् मन्त्रान् प्रतिपादयन्ति। तत्रैतेषां मन्त्राणां विनियोजकं ब्राह्मणं नास्ति। परं तु सूत्रकार आपस्तम्ब एतेषां मन्त्राणां विनियोगं स्वसूत्रे वदति। प्रथमं सप्ताहुतयः यजमानायतने शार्दूल-चर्मास्तरणम, अभिषेकोऽभिमन्त्रणं राज्ञो रथारोहणम् आदित्यदर्शनम् अभिषेकाङ्गवपनं च विहितम्। होममन्त्रेषु श्रुतान् विषयान् विमृशामः। 'भूतो भूतेषु चरति प्रविष्टः

स भूतानामधिपतिर्बभूव । तस्य मत्यै चरति स राजसूयम् । स राजा राज्यमनुमन्यतामियम् ।' अत्र राजभूताधिपतिः स्वपुरुषद्वारा सर्वेषु भूतेषु सञ्चरति, तस्य भृत्यौ चरति राजसूयम् । इति राजसूयप्रस्तावोऽपि वर्तते । प्रसिद्धश्च राजसूयाख्यो यागो राजसम्बन्धीति । स राजा राज्यमनुमन्यताम् इति राज्याङ्गीकारप्रार्थनापि वर्तते । षष्ठे मन्त्रे 'अयं भातु शवसा पञ्चकृष्टीः' इति सर्वेष्वपि जनेषु अस्य भानं प्रार्थितम् । शार्दूल-चर्मणि आसीनं राजानं व्याघ्रवत् सर्वा अपि दिशो विश्रयस्व इति प्रार्थयन्ते । अत्र "विशस्त्वा सर्वा वाञ्छन्तु मा त्वद्राष्ट्रमधिभ्रशत्" इत्ययं मन्त्रोऽपि पठ्यते । अत्र जनतन्त्रतत्त्वरीत्या एवायं राजा जनैः सर्वैरपि वाञ्छितो भवत्विति सूच्यते । पुरोहिताभिमन्त्रणं चात्र विहितम् । अत्र "अस्मद्धितं वद" इति "नमस्ते ऋषे गद" इति भागेन सूच्यते । "अव्यधायै त्वा" "स्वधायै त्वा" इति प्रार्थनाद्वयं वर्तते । शत्रुसकाशात् व्यथाराहित्यार्थं एषा प्रार्थना । स्वधाया अपि प्रार्थना वर्तते । अत्र स्वधाशब्दः स्वस्मिन् धीयते इति स्वधा, इत्यस्मिन्नर्थे भवति । यथा वा राज्ञः इतरानपेक्षाधिकारो भवेत्ता-दृशाधिकारश्च प्रार्थ्यते । "एवा ब्रह्मन्त वेदस्तु" इत्यनेन मन्त्रभागेन इदं ब्रह्मशक्तिं प्रति प्रार्थना इति सूच्यते । अत्र 'समुद्रन्न सह वं तस्थिवांसम्' इति राजस्थानस्य समुद्रवत् गाम्भीर्यं प्रतिपाद्यते । 'मर्मृज्यन्ते द्वीपिनमप्स्वन्तः' इति अभिषेककालेन आच्छादितो राजा जलमध्यवर्ती गजत्वेन निरूपितः । अत्र जनपदानुवीक्षणार्थं कश्चन मन्त्रो विहितः । मन्त्रस्त्वेवं पठ्यते—"अन्नवतामोदनवतामामिक्षवताम् एषां राजा भूयासम्" इति । अत्र अन्नादिसमृद्धानां जनानां जनपदानां वा अयं राजा भवति । इमे एवाभिषेकमन्त्रा अथर्ववेदे (4-7) पठिताः । परं तु यजुर्वेदवत् न कृत्स्ना मन्त्राः पठिताः । एतेषां मन्त्राणां प्रयोगविधानं अथर्ववेदब्राह्मणेषु न दृश्यते । कौशिकसूत्रकारः परं प्रयोगं कल्पयति । "भूतो भूतेषु इति राजानम् अभिषेक्ष्यन् महाशान्ति—उदकं करोति" (कौ.सू. 2-8) इति । तथा राजसूये आसन्द्यारोहणे राजाभिषेके च एतत्सूक्तं विनियुक्तम् । (वै.सू. 7-1-11) अत्र प्रथमे मन्त्रे 'भूतो भूतेषु पय आदधाति । स भूतानामधिपतिर्बभूव' इति मन्त्रभागोऽस्ति । अत्राभिप्रायविशेषोऽस्मिन् मन्त्रे प्रतिपाद्यते । यतो राजा भूतेषु अन्नसमृद्धिं करोति, अत एव स भूतानामधिपतिर्भवतीति । 'तस्य मृत्युश्चरति राजसूयम्' इति मन्त्रभागो यजुर्वेदवदेव । मृत्युशब्दश्च राजसूयशब्दश्च यजुर्वेदे अथर्ववेदे च समान एव । राजसूयस्य मृत्युत्वं प्रतिपाद्यते । परं तु कथं वा राजसूयस्य मृत्युत्वमिति न स्पष्टं भवति । अथापि अत्र श्रूयमाणस्य राजसूयपदस्य अभिषेकपरत्वं व्याख्याय 'मृत्युवदयं धर्माधर्मविवादपुरःसरं जनानां पालनं करोती'ति व्याख्यातारो मन्यन्ते । "विशस्त्वा सर्वा वाञ्छन्तु" इति । अयमपि मन्त्रभागः समानः । राज्ञो बिडधीनत्वम् अत्रापि प्रतिपाद्यते । षष्ठे मन्त्रे राज्ञोऽमित्रवर्धनत्वं

सवितरि प्रार्थ्यते । अत्र श्रूयमाणराजसूयशब्दः यजुर्वेदेषु प्रतिपाद्यमानं विस्तृतं राजसूयकर्म न प्रतिपादयति इति व्याख्यातारोऽपि अभिप्रयन्ति । अतोऽभिषेककर्म प्राचीनतमे• काले अल्पीय एवासीत् । तदनन्तरमेव अनेकेष्टिसोमयागसहितं बृहत्कर्माभिवृद्धमिति निश्चीयते । अथर्ववेदमन्त्रे न पुरोहितस्य वरणं तदर्थप्रार्थना वा दृश्यते । अनेन ज्ञायते अथर्ववेदे यजुर्वेदे च प्रोच्यमानाभिषेकः प्राचीनतमः । एतादृशाभिषेकः ऋग्वेद एव प्रस्तावितः इति केचित् । अयमभिषेकः ऋग्वेदकालात् परं समुत्पन्न इति अभ्यूहस्यापि अवकाशोऽस्ति । वेदद्वययोः श्रूयमाणाभिषेकमन्त्रे राजस्थानस्य जनतन्त्रतत्त्वसम्बन्धं सर्वथास्तीति निश्चिनुमः ॥

॥ राजसूयः ॥

राजसूयकर्म यजुर्ब्राह्मणेष्वेव दृश्यते । मन्त्रसंहितायां मन्त्राः पठिताः । ब्राह्मणभागेषु च विवरणं कृतम् । वाजसनेयसंहितायाम् राजसूयकर्मार्था मन्त्राः पठिताः (10-35-11) । तथान्ययजुःसंहितास्वपि तैत्तिरीय (1-8 कठ 15. मैत्रायणीयादिषु 2-6) पठितः राजसूयब्राह्मणं च शतपथब्राह्मणे (5-3) तैत्तिरीयब्राह्मण (2-7-8-9) मैत्रायणीयसंहिता-ब्राह्मणे च (4 3) विस्तरेण पठितम् । राजसूयप्रस्तावः अथर्ववेदे तथा ऐतरेयब्रह्मणेऽप्यस्ति (18 15) । राजसूययागे बह्वय इष्टयो विहिताः । चातुर्मास्यं च तदङ्गत्वेन विहितम् । अभिषेचनीयः सोमयागोऽत्र प्रधानः । दशपेयाद्यसोमयागश्चात्र विहितः । अत्र च राजसूयकर्मणि राज्यतन्त्रतत्त्वसम्बद्धानि बहूनि कर्माणि वर्तन्ते । तथा राजसूय-ब्राह्मणे राज्यतन्त्रतत्त्वसम्बद्धा बहवोऽभिप्राया आविष्कृताः । राजसूययागे रत्निहविः सर्वेष्वपि ब्राह्मणेषु विहितम् । एतस्य च राज्यतन्त्ररीत्या मुख्यत्वं पूर्वं प्रतिपादितम् । तथाभिषेचनीयाख्यः सोमयागो मुख्यः । यत्र चाभिषेकः प्रधानः । तथा तत्रैव रफ्यप्रदानकर्म इति किंचन विहितम । यत्र च अधिकारिणां क्रमः सुस्पष्टं प्रतिपादितः । तथा सात्यदूतानां हविः इति किञ्चन कर्म च विहितम । सात्यदूतानां हविरिति नाम न तैत्तिरीयब्राह्मणे दृश्यते । परं तु मैत्रायणीयसंहितायां "अथैते सत्यदूताः" (4-9) इत्यारभ्य प्रतिपादितम् । अत्र दूतैः अन्यराजं प्रति वक्तव्यमप्युक्तम् । "वाचा सत्यं प्रहिणोति" "अभ्यषिक्षि राजा भुवम्" इति । तथान्ये राजानोऽपि अस्मै श्रद्धधत इति चोक्तम् । तदन्ते राजा दूतम् अन्यराजभ्यः प्रहिणोति । इदं च सात्यदूतानां हविः तैत्तिरीयब्राह्मणे प्रतिपादितम् । रफ्यप्रदानकर्म राजापेक्षया अवराणाम् अधिकारिपुरुषाणाम् अवरोहार्थं विहितम् । तत्र च क्रमोऽपि विहितः । तैत्तिरीयब्राह्मणे रफ्यप्रदानकर्म सामान्यतया विहितम् । नात्र रफ्यादातॄणां क्रमः प्रतिपादितः । "इन्द्रस्य वज्रोऽसि" इति मन्त्रेण रफ्यं ब्राह्मणो राज्ञे प्रयच्छति । तेन राजानं ब्राह्मण आत्मनोऽबलीयांसं कुरुते । अत्र राजा राजभ्रात्रे प्रयच्छति । राजभ्राता सूताय स्थपतये वा एतौ च ग्रामण्ये ग्रामणीः सजाताय इति । अत्रानेन रफ्यदानेन पूर्वस्मात् पूर्वस्मात परः अबलीयान् भवति । अत्र च सूतस्थाने स्थपतिः आगच्छति । परं तु रत्निषु स्थपतिर्नान्तिर्भावितः । तथा अन्ते सजाताय रफ्यदानं विहितम् । ग्रामण्यपेक्षया सजातो न्यून इति गम्यते । (शत. ब्रा. 5-4-15) । मैत्रायणीयसंहितायां (4-5) रफ्यदानकर्म विहितम् । अत्र

नाधिकारिपुरुषाणां प्रस्तावो नास्ति । 'वज्रेण वा एतद्राष्ट्रं रन्धयते तम् अवरस्परं प्रयच्छति । तेन अवरस्परं राष्ट्रं रन्धयमाण एति । तस्मा एतै एतस्मै अवरस्परं रन्धा बलिं हरन्ति' इत्येतावन्मात्रं प्रतिपादितम् । सूत्रकारा येन क्रमेण रत्निहविः कृतं तेनैव क्रमेण रत्निभ्य एव स्फ्यदानं कर्तव्यमिति वदन्ति । अत्र पुनः प्रहित इति कश्चन निरूपितः । अत्रैवं क्रमः, 'ब्रह्मा राज्ञे स्फ्यं प्रयच्छति, राजा पुरोहिताय, पुरोहितः प्रहिताय, प्रहितः रत्निभ्यः' (सत्य. श्रौ. सू.13 6) इति । अत्रोक्तः प्रहितः अधिकारिविशेष इति गम्यते । राजसूययागेष्विदमसकृत् प्रतिपाद्यते । अयं राजा राजसूयकरणेन राजसूयमध्ये अभिषेकप्राप्त्या च विशां प्रियो भवति इति । 'तस्माद्वा एषां विशां प्रियः विशो हि मध्यतोऽभिषिच्यते' इति । अनेन ज्ञायते राजाभिषेकः सर्वेषां जनानां मध्य एव कर्तव्य इति । तथा 'विशश्चैवास्मै राष्ट्रञ्च समीची दधाति' इति । यथा राज्यं प्रधानं तद्वद्विशो हि प्रधानभूता इत्ययमर्थोऽपि प्रतिपाद्यते । तथा ब्रह्मक्षत्रसहयोगो "ब्रह्मन्नेव क्षत्रमन्वारम्भयन्ति । ब्रह्मन्नेव क्षत्रं प्रतिष्ठापयति" इत्यादिवाक्येन प्रतिपाद्यते । राजसूयसम्बन्धिब्राह्मणेषु राज्यतन्त्रसम्बद्धाः केचनाभिप्रायाः प्रतिपादिताः । तानत्र प्रतिपादयामः । सुत्रामयज्ञं प्रतिपादयद् ब्राह्मणं 'य एव उपवादी योऽभिदासति तत एनं सुत्रामा त्रायते' इति वदति । अत्र राज्ञो यः अपवादी भवति यश्च राजानं हिंसितुमिच्छति ततो रक्षणं प्रार्थितम् । मैत्राबार्हस्पत्यमेव राष्ट्रप्रतिष्ठासिद्ध्यर्थं ब्राह्मणं विदधाति । 'क्षत्रं वै मित्रः । ब्रह्म बृहस्पतिः । ब्रह्मणि वा एतत् क्षत्रं प्रतिष्ठापयति द्रढिम्ने अशिथिरत्वाय' इति । शिथिलस्य राष्ट्रस्य प्रतिष्ठासिद्ध्यर्थमयं याग इत्युक्तम् । देवसुवां हवींषि मारुतम् एकविंशतिकपालं विदधत् ब्राह्मणं मरुतां विट्त्वात् तद्यागकरणेन विश एव राजा प्रियो भवतीति वदति । तस्माद्वा एव विशः प्रियः विशो हि मध्यतः सूयते । विचित्राणाम् अपां सम्भरणम् अभिषेकं च विधाय तदुपपादनावसरे तादृशापामभिषेकेणैव चित्रमस्मिन् दधाति । तस्माद्वा, एषः अभिषिक्तः चित्रं राजेति प्रतिपादितम् । राज्ञि सर्वविधरससम्पादनार्थम् अपाम् ओषधीनां च रसं संभरति इति विधाय तादृशाभिषेकेण रसमस्मिन् राज्ञि दधाति । 'तस्माद्वा एतमाहुः राजा पुण्यः' इति । अनेन ज्ञायते चित्रालङ्कारेण वाचा कार्यैश्च राजा विचित्रो भवति । तथा सर्वविधजनानामाश्रयत्वात् सर्वैरपि प्रकारैः अस्यानुभाव्यत्वं च भवति । अपां ग्रहणकाले प्रतीपं गच्छन्तीनाम् अपां तथा परस्परं सङ्घर्षवताम् अपां च ग्रहणं विधाय एतादृशाब्ग्रहणेन 'ओजसा वा एतद्वीर्येण राष्ट्रे ओजो वीर्यं दधाति' इत्युच्यते । स्थावराणामपां ग्रहणं विधाय तत्र राष्ट्रशान्ती राष्ट्रान्निर्गमश्च फलत्वेन प्रतिपादितः । अग्रामोषधीनां रसस्य ग्रहणं विधाय राष्ट्रे रसं दधाति इति प्रतिपाद्यते । 'राष्ट्रे रसं दधाति, राष्ट्रे ब्रह्मवर्चसं दधाति' हा दुनीनाम् अपां ग्रहणं विधाय तेन

विशो वीर्यमवरुन्धे' इत्युच्यते । यदि चाभिषेकानन्तरं विशो राज्ञे विपरीता भवेयुः तदा सर्वदा राष्ट्रे कलहः स्यात् । ततश्च विशां वीर्यावरोध आवश्यकः । पयसो ग्रहणेन 'राष्ट्रे पयो दधाति धृतस्य ग्रहणेन राष्ट्रमनाधृष्यं करोति' इत्यपि प्रतिपाद्यते । राष्ट्रमतिमृष्टं तपोजमित्युच्यते । राज्ञोऽभिषेककाले ब्राह्मणो वैश्यः क्षत्रियश्च अभिषेककर्तृत्वेन विहिताः । तत्र अश्वत्थेन वैश्योऽभिषिञ्चति इत्युक्त्वा 'विश एवैतेन वीर्यमवरुन्धे' इति प्रतिपादयति । अत्र जन्य इति कश्चन प्रस्तावितः । स च नान्यः मित्रराज्ञः । यतोऽन्यराजैरपि अभिषेकः कार्य एव । जन्यं विदधत् तैत्तिरीयब्राह्मणं 'मित्राण्येवास्मै कल्पयति' इति वदति । मैत्रायणीयराजसूयब्राह्मणेऽपि जन्येनाभिषेकं विधाय स च जन्यो मित्र इति प्रतिपादयति । तादृशजन्यस्यावश्यकतां प्रतिपादयद् ब्राह्मणं 'मित्रेणैव क्षत्रं व्यवतृतं मित्रेण वा एतत्क्षत्रं व्यवतनोति द्राढिम्ने अशिथिलत्वाय' इति मित्राणामावश्यकतां प्रतिपादयति । अत्र 'न्यग्रोधेन जन्यः अभिषिञ्चति । न्यग्रोधः यथा विततो वर्तते तत्र तत्रावरोहाभिरुपकृतश्च । एवमेवायं मित्रैरुपकृतो राज्यं शास्ति । मित्रवदेव राज्यं दृढमशिथिलं च भवति' इति । अभिषेकानन्तरं राजानं विड्भ्य आवेदयन्ति । एतादृशावेदनेन राजा विशां प्रियो भवतीत्युच्यते । "तस्माद्वा एष विशां प्रियः । विशो ह्येनमावेदयति । अत्रैवेदं देवा सपत्नं सुवध्वं महते क्षत्राय महत आधिपत्याय महते जानराज्याय । एष वो भरता राजा सोमोऽस्माकं ब्राह्मणानां राजा" इति मन्त्रः पठितः । महते जानराज्याय इति भागो जनतन्त्रतत्त्वमूलकः ॥ ब्राह्मणेऽपि "महते जनानां राज्यं यः" इति व्याख्यातम् । अत्रान्यसंहितासु "एष वो भरतो राजा" इति प्रतिपादितम् । परं तु मैत्रायणीयसंहितायां "एष ते जन ते राजा" इत्युच्यते । तस्य विवरणं चैवं कृतम्—जनताया एव एनमावेदयति इति । "राजा दुष्पराणोदः" इति पार्थहोमे प्रतिपादितम् । सर्वदिग्जयार्थं किञ्चन कर्म विहितम् । 'दिशामभिजित्यै' इति किञ्चन फलं विहितम् । तेन 'सर्वास्वपि दिक्षु राज्ये प्रतिष्ठितो भवति' इति तैत्तिरीयब्राह्मण उक्तम् । मैत्रायणीयराजसूयब्राह्मणे पुनः 'तेन क्षेत्रे धृतो भवति' इत्युच्यते । 'तस्माद्वा एतमाहुः पयस्वी राजा पुण्यः' इति मरुद्भ्यो गर्भिणीं पशुं विदधद् ब्राह्मणं 'राजा विशां गर्भः' इति वदति । 'विशो वा एतद्गर्भं करोति । तस्माद्वा एष विशः प्रियो विशो हि गर्भ' इति । यथा वा गर्भः प्रियो भवति एवमेवायं राजा विशां प्रियो भवतीत्युच्यते । 'आदित्यां मह्यं गर्भिणीम् आलभते' इति विधाय भूमिम् अदितित्वेन प्रतिपाद्य तस्या गर्भत्वेन राजानं प्रतिपादयति । दुष्पराणोदत्वं च प्रतिपादितम् ॥ माध्यन्दिनसवने पञ्चदशस्तोमं तृतीयसवने एकविंशस्तोमं च विदधद् ब्राह्मणं 'विश्यैव क्षत्रं प्रतिष्ठापयति' इति वदति । शतपथब्राह्मणे ये समालोचनार्हा राज्यतन्त्रसम्बन्धिविषया वर्तन्ते, तान् विलिखामः । 'क्षत्राणां क्षत्रपतिरेधि' इति विवृतम् । राजसूये कर्मणि 'राजानं दण्डैर्घ्नन्ति' तत्रैवं प्रतिपाद्यते । तं दण्डैर्घ्नन्तो दण्डवधमभिनयन्ति । 'तस्माद्राजा अदण्ड्यः' इति । अपां ग्रहणकाले 'राष्ट्रदास्थ राष्ट्रममुष्मै दत्त' इति । 'परस्त्यासु चक्रे वरुणः'

इति मन्त्रभागं विवृण्वद् ब्राह्मणं 'विशि राजा प्रतिष्ठितः' इत्यभिप्रायमावेदयति । 'विशो वै पस्त्या विक्षु चक्रे वरुणः प्रतिष्ठाम्' इति । आवित् वाचा प्रकरणे इन्द्रायावेदनं विहितम् । तत्र चान्येषां राज्ञाम् आवेदनमावश्यकम् । तेषामङ्गीकारश्चावश्यक इति सूचितम् । 'क्षत्रं वा इन्द्रः तदेनं क्षत्रायावेदयति' इति । अभिषेकसंस्नातस्य ब्राह्मणस्य पात्रे आनयनं विधाय ब्राह्मणस्य यशो राजाधीनमिति प्रतिपादयति । 'तस्माद्ब्राह्मणो राजानमनु यशः' । राजसूये च दिशो व्यवस्थापनं अक्षैर्देवनम् अभिषेक इत्येतानि कर्माणि मुख्यानि । 'अक्षैर्दीव्यति राजन्यं जिनाति' इत्युच्यते । 'देवसुवां हविः अग्नीषोमीयं पशुपुरोडाशम् अनु विहितम् । तत्रैतादृशयागकरणेन राज्ञ आवश्यका विषया भवन्तीत्युच्यते । अग्नये गृहपतये अष्टाकपालं विधायैवं वदति ब्राह्मणं 'श्रीर्वै गार्हपतम् । यावत ईष्टे तदेनं अग्निरेव गृहपतिः गार्हपतमभिप्रणयति । इन्द्राय ज्येष्ठाय यागं विदधदिन्द्रः ज्यैष्ठ्यम् अभिपरिणमयति' इति वदति । वरुणाय धर्मपतये यागं विधायानेन यागेन राजा धर्मस्य पतिर्भवतीति वदति । 'वरुण एव धर्मपतिः धर्मस्य पतिं करोति परमता वै सा यो धर्मस्य पतिरसत् यो हि परमतां गच्छति । तं हि धर्मः उपयन्ति' इति । तैत्तिरीयब्राह्मणे च इमे अभिप्राया दृश्यन्ते । राज्ञो हस्तग्रहणकाले 'प्रतित्यं नाम राज्यमधायि' इति एको मन्त्रभागो वर्तते । तद्विवरणावसरे राज्यमेवास्मिन् प्रतिदधाति इति विवरणं कृतम् । सर्वोऽपि जनसमूहो राजानुवर्ती भवतीति 'सर्वव्रातमेवैनं करोति' इत्युच्यते । राज्ञः सर्वानुभाव्यत्वं स्वदयत्येवैनम् इत्युच्यते । तथा 'राष्ट्रमेवास्मै गृह्णाति सेनामेवास्य संश्यति विशमेवास्मै पर्यूहति राष्ट्रं वर्चस्वी ब्रह्मवर्चसी वशी इन्द्रियावी पयस्वी तेजस्वी' इति प्रतिपादितम् । 'तेजसा चैव इन्द्रियेण च उभयतो राष्ट्रं परिगृह्णाति' इति राष्ट्रबलप्रतिपादनं कृतम् । 'विश्यस्मिन् राष्ट्रे' इति मन्त्रविवरणावसरे 'विशैवैनं राष्ट्रेण समर्धयति' इत्युक्तम् । अत्र राज्ञो विशा समृद्धिः प्रतिपादिता । 'ब्रह्मन्नेव क्षत्रं प्रतिष्ठापयति । क्षत्राणामेवैनं क्षत्रपतिं करोति । राष्ट्रमेवास्मिन् ध्रुवमकः' । एतादृशा अभिप्रायाः समालोचनार्हाः । यदा 'राजा विष्णुक्रमान् क्रमते तदा क्षत्रियस्य (यः क्षत्रियः प्रतिहितः सोऽन्वारभते)' । प्रतिहितस्य अन्वारम्भणं विहितम् । एतादृशक्षत्रियान्वारम्भणेन राष्ट्रमेव भवतीत्युच्यते । प्रतिहितः प्रतिहितत्वेन कुत्रचिद्विहितः । अयं च प्रतिहितो भूतपूर्वराजस्य शत्रुरिति ज्ञायते । तम् अबलीयांसं कर्तुं पुरोहितः तस्मै स्फ्यं प्रयच्छति । रथारूढो राजा स्वमहिमप्रकटनार्थम् एकं राजन्यं जिनाति । अत्रेदमुच्यते— 'राजन्यं जिनाति । अनाक्रान्त एवाक्रमते' इति । अन्यत्रापि 'राष्ट्र एव विशमनुबध्नाति' इति विशां राष्ट्रे बन्धः प्रतिपादितः । विडपेक्षया राज्ञ उत्कृष्टत्वं च 'तस्माद्राष्ट्रं विशम् अतिवदति' इत्युक्तम् । अगर्भां मारुतीं पशुं विधाय तस्य प्रयोजनं विशां निरिन्द्रियत्वकरणमेवेति प्रतिपादितम् ॥

॥ अश्वमेधः ॥

अश्वमेधयागश्च राज्यतन्त्रतत्त्वसंबन्धी यागः । अनेन च राजा सर्वास्वपि दिक्षु स्वाधिकारं स्थापयति । प्राचीनतमे हि काले अन्यराजसु स्वाधिकारप्राप्त्यनन्तरं यथा युद्धादिकं विहितम् एवमश्वमेधयागोऽपि विहितः । अत्र च राजा स्वाधिकारप्रदर्शनार्थमश्वं प्रहिणोति दिक्षु । राजपुत्राश्चाश्वरक्षणार्थं प्रहिताः । अत्र यः कोऽपि राजा सञ्चरन्तमश्वं निरुन्ध्यात् तेन तदा युद्धं कार्यम् । एतच्च राज्ञः सम्राट्त्वप्रकटनमेव । यदि च यः कश्चन राजा अश्वमेधयागेन प्रतिष्ठितो भवेत् अन्ये राजानस्तस्मै स्वयमेवानमन्ति । अश्वस्य रक्षकत्वेन ये प्रहिताः तैरपि अप्रमादेन अश्वो रक्षितव्यः । अस्मिन् विषये शतपथब्राह्मणं कञ्चनाभिप्रायमावेदयति । तच्चावधानार्हमेव । राजान एवाश्वरक्षकत्वेन प्रहिताः । यदि च तेऽश्वं रक्षन्ति समाप्तिपर्यन्तं तेषां राज्यमपि भविष्यति । ते च राजानो भविष्यन्ति । अभिषेचनीयाश्च भविष्यन्ति त इत्युक्तम् । ये च आन्तम् अश्वं न रक्षन्ति तेषां राष्ट्रं न भविष्यति । अराजानश्च भविष्यन्ति । तथा आभिषेचनीयाः विशस्ते भविष्यन्ति इत्युक्तम् । "ये वा एतस्य उदचं गमिष्यन्ति राष्ट्रं ते भविष्यन्ति । राजानो भविष्यन्ति अभिषेचनीया अथ य एतस्य उदचं न गमिष्यन्ति राजन्या विशः अनभिषेचनीयाः तस्मान्मा प्रमदत्" (शत. ब्रा. 13-4-2-14) इति । तैत्तिरीयब्राह्मणेऽपि एवमेव दृश्यते । परं त्वश्वरक्षकाणां राज्ञाम् अश्वरक्षणेन अन्यदपि राष्ट्रं भविष्यतीत्युक्तम् । यतः तेषां सामर्थ्यं प्रकटीकृतं तत एवान्यराष्ट्रस्था जना अपि इमं राजतया वृणीयुः इति । अत एवोक्तम् 'राष्ट्रादेव ते राष्ट्रं गच्छन्ति' इति । यदि चाश्वं ते न रक्षेयुः तदा स्वराष्ट्रादेव ते भ्रश्यन्ते । असमर्थस्य राजस्थानानर्हत्वात् इति । प्रबलस्यैव राज्ञोऽश्वमेधयागो विहितः । यदि चाबल एव सन्नश्वमेधयागं करोति तदाश्वस्यारक्षणेन अश्वमेधयागसमाप्त्यभावात् अयं पराभूतो भविष्यतीत्युक्तम् । एवमेव शतपथब्राह्मणेऽपि दृश्यते (13-1-6-3) । अत्र च 'शतं कवचिनो रक्षन्ति' इति अश्वरक्षणं विहितम् । अन्यत्र (3-4 2-17) 'राजान एव रक्षकाः' इत्युक्तम् । 'परा वा एष सिच्यते । यो बलोऽश्वमेधेन यजते' इति । 'यदमित्राश्वं विदेरन् । हन्येतास्य यज्ञः' इति । अतश्चाश्वमेधयागो राज्यतन्त्रे ऐक्यसिद्ध्यर्थमेव । अत एव सूत्रकाराः 'राजा सार्वभौमः अश्वमेधेन यजेत' इति वदन्ति । (आ. श्रौ. सू. 20-11) ॥

यद्यपि अश्वमेधमन्त्रा यजुःसंहितासु पठिताः, अथापि अश्वमेधब्राह्मणं तैत्तिरीय-शतपथयोरेव दृश्यते विस्तरेण; यतोऽश्वमेधो राजसम्बन्धियज्ञः। अतोऽत्र राज्यतन्त्रसम्बद्धा बहवोंऽशाः प्रतिपादिताः। तैत्तिरीयब्राह्मणरीत्या प्रथमं साङ्ग्रहणेष्टिर्भवति। इयं च साङ्ग्रहणेष्टी राज्यतन्त्रसम्बद्धा दृश्यते। अश्वमेधयागं करिष्यन् राजा संवत्सरकालपर्यन्तं राज्य-व्यवहारात् च्युतो भविष्यति। अतो जनतानां संग्रहणार्थं साङ्ग्रहणीष्टिनामिका काचनेष्टिर्विहिता। "साङ्ग्रहण्येष्ट्या यजते इमां जनतां सङ्गृह्णामीति" इति। साङ्ग्रहणेष्ट्यां कर्तव्य उपहोमो यजुःसंहितायां द्वितीयकाण्डे (2-3-9) पठितः। तत्र ये सजाताः कुमाराः समनस इति सजातकुमाराणां मनःसङ्ग्रहणं प्रार्थितम्। तथा स्त्रीणां मनः-सङ्ग्रहणं च प्रार्थितम्। 'तानहं कामये हृदा। ते मां कामयन्तां हृदा' इति। परिपालक-परिपाल्यमानयोः परस्परप्रेम्णैव सम्बन्ध इति प्रतिपादितम्। याः स्त्रियः समनसः ता अहं कामये हृदा ता मां कामयन्ताम्। हृदेति च परस्परप्रेमैव पाल्यपालकयोरुक्तः। अश्वस्नानकाले राज्ञः पितृष्वस्रीयो मातृष्वस्रीयश्च प्रस्तावितः। महर्त्विजः अश्वं प्रोक्षन्ति। प्राच्यां दिशि शतेन राजपुत्रैः सहाध्वर्युः प्रोक्षति। दक्षिणस्यां दिशि अराजभिरुग्रैः सह ब्रह्मा प्रोक्षति। प्रतीच्यां दिशि शतेन सूतग्रामणीभिः सह होता प्रोक्षति। उदीच्यां दिशि शतेन क्षत्तृसङ्गृहीतृभिः सह प्रोक्षति। अत्र च ऋत्विग्भिः सहाधिकारिपुरुषा राजपुत्रादयः प्रतिपादिताः। अश्वरक्षणार्थं राजपुत्राः प्रेष्यन्ते। अष्टादशिनः पशून् विधाय आरण्यपशूनां संस्थां निन्दद्ब्राह्मणवाक्यम् अभिप्रायविशेषं प्रतिपादयति। 'व्यध्वानः क्रामयेयुः। विदूरं ग्रामयोः ग्रामान्तौ स्याताम्' इति। अनेन राजमार्गे बहवो जनाः गच्छन्ति। गच्छतां जनानां सङ्घर्षश्च सम्भावित इति। तेन जनसङ्ख्याबाहुल्यं च सूच्यते। तथा प्रतिग्रामं सीमा वर्तते। एकग्रामस्य सीम्नः समीप एवान्यग्रामारम्भः। ग्रामयोर्विदूरत्वे मध्ये जनसञ्चाररहितप्रदेशो भवेत्। तेन भयं भवेदिति च रथे ध्वजस्थापनं विहितम्। तादृशध्वजस्थापनेन अन्येषां राज्ञां यश एनं गच्छतीत्युच्यते। "केतुं कृण्वन्न केतवे" इति ध्वजं प्रतिमुञ्चति। 'राष्ट्रं वै श्रीः। राष्ट्रं वै भारः। राष्ट्रमेवास्मै पर्यूहति। श्रीर्वै राष्ट्रस्य मध्यम्। क्षेमो वै राष्ट्रस्य शीतो वातः। विशं चैवास्मै राष्ट्रं च समीची दधाति' इत्येतादृशाभिप्रायो राज्यतन्त्रसम्बद्ध एव। विशां राष्ट्रस्य च सम्बन्धे किञ्चित् प्रतिपादितम्। 'तस्माद्राष्ट्राय विशः सर्पन्ति। राष्ट्रमेव विश्या हन्ति। तस्माद्राष्ट्रं विशं घातुकम्'। अत्र प्रजाः स्वरक्षणाय राष्ट्रतत्त्वमेव सर्पन्ति इत्युच्यते। तथा राष्ट्रं विड्भिः संयोजितम्। राष्ट्रं च रक्षणाय विशं प्रति गच्छति इति च सूच्यते। वीणागानविधानप्रकरणे सूच्यमानाः केचनाभिप्रायाः समालोचनमर्हन्ति। "न वै ब्राह्मणे श्री रमते"। "न वै ब्राह्मणे राष्ट्रं रमते" इति। राष्ट्रं श्रीश्च ब्राह्मणस्य न वर्तत इत्युक्तम्। यदा खलु राजा कामयेत तदा राजा ब्राह्मणं जयतीति। अनेन वैदिकराज्यतन्त्रे ब्राह्मणस्य यादृशं स्थानं वर्तत इति सूचितम्।

ब्रह्मक्षत्रशक्तिसंभूते एव ऐश्वर्यं राष्ट्रं च परिगृह्य रक्षति इत्युक्तम् । 'तथा हास्य ब्रह्मणा च क्षत्रेण चोभयतः श्रीः परिगृहीतं भवति । तथा हास्य ब्रह्मणा च क्षत्रेण चोभयतो राष्ट्रं परिगृहीतं भवति' । 'इष्टापूर्तं वै ब्राह्मणस्य' इति ब्राह्मणस्य यजनयाजनादि मुख्यमिति प्रतिपादितम् । 'युद्धं वै राजन्यस्ये'ति युद्धमुख्यत्वं प्रतिपादितम् । शतपथब्राह्मणेऽपि अश्वमेधब्राह्मणं तैत्तिरीयसंहितावदेव राज्यतन्त्रसम्बन्ध्यभिप्रायमाविष्करोति । वीणागानविषयकं ब्राह्मणं तथा अश्वसंवेशनमन्त्रब्राह्मणमपि एकमेवाभिप्रायं विवृणोति । "यद्धरणीयवमत्ति" (13-2-9) इति मन्त्रभागस्य विवरणकाले विशो यवस्थानीयाः । राष्ट्रं हरिणस्थानीयमिति अन्नादनभावः स्पष्टं निरूपितः । "विडैव यवः" । "राष्ट्रं हरिणः" । "विशमेव राष्ट्राय अद्यं करोति । तस्माद्राष्ट्री विशमत्ति" इति प्रतिपाद्यते । "विशो वै राष्ट्राय वाञ्छन्ति । अश्वरक्षितारश्चैव मुक्ताः" । (शत. ब्रा. 13-4-2-5) "तस्यैते पुरस्तात् रक्षितार उपक्लृप्ता भवन्ति । राजपुत्राः कवचिनः शतं राजन्या निषङ्गिणः शतं सूतग्रामण्यः पुत्रा इषुमर्षिणः शतं क्षत्रसंगृहीतॄणां पुत्रा दण्डिनः शतं अश्वशतं निरष्टन्निरमणं यस्मिन्नेवम् अभिसृज्य रक्षन्ति । एवमश्वमेधयागस्यापि राज्यतन्त्ररीत्या मुख्यत्वमस्ति ॥

॥ स्थानाधिकारिणः ॥

संस्कृतिप्रारम्भकाले हि जनसङ्ख्याया न्यूनत्वात् एकेनैव राज्ञा साक्षादेव जनसमुदाय-निर्वाहकरणं सुशकमासीत् । गच्छता कालेन यदा प्रजासमुदायोऽत्यन्तमभिवृद्धिं प्राप्तः तदा राज्ञा साक्षादेव निर्वाहकरणं दुःशकमभूत् । राजा प्रतिगृहं गत्वा जनानां योगक्षेमं विचारितवान् इत्यादिवृत्तान्तोऽत्यन्तप्राचीनकाले हि सम्भवति । तथा एकस्मिन्नेव देशे प्रजा यदासन् तदापि प्रतिगृहगमनादिकं सम्भावितमभूत् । यदा च प्रजावासप्रदेशस्यापि विस्तारः सञ्जातः तदापि राज्ञा प्रतिप्रदेशं प्रतिदिनगमनमपि असम्भावितं भवति । अतश्च राजा निर्वाहसौकर्याय स्वस्थानेऽधिकारपुरुषानपि नियुनक्ति । राज्यं बहुधा विभज्य स्वस्थाने कार्यनिर्वाहाय तस्मिंस्तस्मिन् प्रदेशेऽधिकारिपुरुषा नियुक्ताः । तत्तत्प्रदेशेष्वेतेषामधिकारः । तेषामधिकारश्च प्रादेशिकः । एकस्य ग्रामस्यैकोऽधिकारी । दशानां ग्रामाणामेकोऽधिकारी । एकग्रामाधिकार्यपेक्षयाऽस्योत्कृष्टत्वम् । अधिकारप्रदेशश्च विस्तृत एव । तथा शतग्रामाणामेकोऽधिकारी । तस्य चाधिकारः शतेषु ग्रामेषु । स च दशग्रामाधिकार्यपेक्षयोत्कृष्टः । एतेषां सर्वेषामुपरि राजा वर्तते । एवं विभागो निर्वाहसौकर्यायैव । एते च रत्न्यपेक्षया भिन्ना एव । रत्निनां स्वस्वविषयेऽधिकारो राज्ञा दत्तः । अत्र परं तत्तत्प्रदेशेषु अधिकारसत्त्वात् प्रदेशभेदेनाधिकारिभेदोऽधिकारभेदश्च । क्षत्रतत्त्वस्याधिकार एव एवं विभक्तः । एतादृशाधिकारिणः तेषामधिकारस्य भेदश्चात्र निरूप्यते— गृहपतिः, कुलपतिः, व्रातपतिः, पूर्पतिः, ग्रामणीः, विश्पतिः, स्थपतिः, दशपतिः, शतपतिः, राष्ट्रपतिः— इत्यादिस्थानानि प्रादेशिकाधिकारवन्ति । एतादृशाधिकारविभजनेनाधिकारस्थानविभजनेन च जनानां संरक्षणं सम्यक् क्रियते । समुदायव्यवस्था च सुरक्षिता भवति । तत्र तत्राधिकारपुरुषाणां सत्त्वात् प्रजाव्यतिक्रमस्यावकाश एव न स्यात् । तत्र गृहपतिकुलपती यद्यपि राज्ञा न नियुक्तौ, अथापि गृहपतेः कुलपतेश्चाधिकारो राज्ञाङ्गीकृतः । भार्यारक्षणादिषु गृहपतेरधिकारः । पुत्रपौत्ररक्षणादिषु कुलपतेरधिकारः । कुलधर्माश्च कुलपतिना रक्ष्यन्ते । गृहपतिकुलपतिनिर्देशौ वेदेषु बहुषु स्थलेषु प्रयुक्तौ ।

॥ व्रातपतिः ॥

तत्र कुलापक्षयो महत् व्राताख्यं स्थानम् । बहूनि कुलानि यदि केनचित् कारणेन समुदायतां प्राप्तानि तदा तेषां पत्युर्व्रातपतिरिति निर्देशो भवति । अयं च विभागो जनसमुदाये स्वभावतो दृष्टः । तस्य तस्य एकः पतिः । सोऽपि राज्ञा न नियुक्तः । परं तु तस्याङ्गीकार एव । तस्य च तत्तत्समुदायधर्मरक्षणमेव कार्यम् । बहूनि व्रातानि एकस्मिन् समुदाये व्रातपतयः स्वस्वसमुदायवैलक्षण्यं रक्षन्ति । शतरुद्रीयमन्त्रेषु 'व्रातेभ्यो व्रातपतिभ्यश्च वो नमः' इति निर्देशः व्रातानां तत्पतीनां च बहुत्वं बोधयति ॥

व्रातानां पतिः व्रातपतिः इत्युच्यते । व्रातशब्दश्च सेनापरः । (ऋग्वेदे 1-163-8; 3-26-6; 5.53.11; 9.14.2; 964.2; 10 34.12; 10.34.8; 10.57.5); ॥ एतेषु स्थलेषु व्रातशब्दः प्रयुक्तः । 'व्रातसाहाः' (ऋक्सं. 6-75-9) इत्यपि प्रयोगो दृश्यते । परं तु अयं व्रातशब्दो जनसमुदायवाची दृश्यते । यतः ऋग्वेद एव (3.26.6.) 'व्रातं व्रातं गणं गणं' इति प्रयोगो दृश्यते । (10-34-8); समुदायमात्रपरतयापि प्रयोगो दृश्यते । 'त्रिपञ्चाशः क्रीडति व्रात एषाम्' । अत्र अक्षसमुदायो व्रातशब्दार्थः । 'जीवं व्रातं स चेमहि' (9-14-2) "पञ्च व्राता अपस्य वः" । अत्र व्रातशब्दो जनसमुदायवाची । मरुद्देवता गणशः परिगणिताः । जनानां समुदायविषये मरुतां गणो दृष्टान्तत्वेनोक्तः मरुतां गणो वेदेषु प्रसिद्धः । ते च देवविशो यथा विशो गणशः परिगणिताः एवं मरुतोऽपि परिगणिताः । मरुतां समुदायवाचकत्वेन गणशब्दो व्रातशब्दश्च प्रयुक्तः । अतोऽस्य व्रातशब्दस्य समुदायपरत्वं सुष्ठूक्तम् । अत्र च "रात्" महाशयानामाशयोऽवधानार्हः । यतः तन्मतेन व्रातशब्दः गिल्ड् परः । शिल्पकाराणां समुदाये प्रयुक्त इति तस्याभिप्रायः । यतो गणशब्दापेक्षयायं भिन्नः । व्रातशब्दस्यायमप्यर्थो भवति । व्रातपतिशब्दो बहुवचनेऽपि प्रयुक्तः । बहवो व्राताः तेषां पतयश्च बहवः । "व्रातेभ्यो व्रातपतिभ्यश्च वो नमः" 'सर्वे व्राता वरुणस्याभूवन्' (तै. सं. 1-8-10-2) । अत्र व्रातशब्दो राज्यतन्त्ररीत्या प्राधान्यवानिति निश्चीयते । राज्यतन्त्रप्रधानराजसूययागे एवंविधस्यार्थस्य सत्त्वात् । पञ्चविंश-ब्राह्मणे 'व्राताय प्रतिपदं कुर्यात्' इति कल्पविशेषः प्रतिपादितः । अत्र विशिष्य व्रातशब्द-प्रयोगः कश्चन विशेषं सूचयति । व्रातशब्दः परस्परसख्यवतां जनसमुदाये एव प्रयुक्तः इत्यभ्यूहस्यावकाशोऽस्ति । सायणोऽपि व्रातशब्दार्थस्तु परस्परसखिभूतयजमानसमुदाय इति व्याचख्यौ । (पञ्च. ब्राह्म. 6-9-24-25; 17-1-5) "विषम इव वै व्रातः" इति । जनसमुदाये वैविध्यं च प्रतिपादितम् । (अथ. सं. 2-9-2) "जीवानां व्रातमप्यगात्" ॥

॥ व्राजपतिः ॥

ऋग्वेदे व्राजपतिप्रयोगो दृश्यते । "परि त्वा आसते निधिभिः सखायः कुलपानव्राजपतिं चरन्तम्" (ऋक्. सं. 170-2) । अत्र सूचिता उपमा अवधानार्हा । चरन्तं व्रजपतिं कुलपाः सखाय उपासते इति प्रतिपादनेन व्राजपतिः स्वसखिभिः उपास्यत इत्ययमर्थो लभ्यते । जिह्मर्महाशयानामाशयानुसारेणायं व्राजपतिर्ग्रामणीः एव । व्रातशब्दवत् व्राजशब्दोऽपि वेदे सेनापरत्वेन प्रयुक्तः । (अथ. सं. 1-161-1) "येऽमावस्यां रात्रिम् उदस्थुः व्राजमात्रिणः" । व्राजशब्दवत् व्राइतिशब्दोऽपि जनसमुदायवाचकतया प्रयुक्तो दृश्यते ॥

व्राशब्दोऽपि सेनापरतया व्याख्यातः । (ऋक्. सं. 1-124-8) 'समानगा इव व्राः' । यथा गणशो जनाः सवनार्थं गच्छन्ति एवं सूर्यस्य रश्मयो गच्छन्ति इत्युच्यते । (ऋक्. सं. 1-126-5) "विश्या इव व्राः" । अत्र जनानां समुदायो व्रातशब्देन प्रतिपाद्यते । (ऋक्.सं.4-1-16) "मृगं न व्रा मृगयन्ते" । (ऋक्. सं. 8-2-6-1) । अत्र व्राशब्दो जनसमुदायमात्रवाची । (ऋक.सं. 10 123 2) "समानं योनिमभ्यनूषत व्राः । व्राशब्दः, व्राजशब्दः, व्रजशब्दः व्राजपतिशब्द इति एते सर्वेऽपि शब्दा जनसमुदायवाचकाः । योद्धृणामपि जनसमुदायरूपत्वात् कुत्रचित्तद्वाचकतयापि प्रयुक्ताः । यथाकथंचित् व्रजपतिव्राजपतिशब्दौ अधिकारवत्पुरुषे प्रयुक्तौ इत्यत्र न मनागपि संशयं करोति । अथर्ववेदेऽपि व्राशब्दः सेनापर इति "रात्" महाशयानामाशयः ॥

॥ पूर्पतिः ॥

पूर्पतिशब्दः ऋग्वेद एव प्रयुक्तः। (1-173-10.) ''मित्रायुवो न पूर्पतिं सुशिष्टम्'' । अत्र च यथा मित्रेच्छवः सुशासने वर्तमानं पूर्पतिं पूजयन्ति इति दृष्टान्तः कृतः । अत्र पूर्पतिशब्दो राजा वा आहोस्वित् पुरां पतिर्वा इति चिन्तनीयम् । यः कोऽपि वा भवतु । अयं पुना राज्ञो भिन्न इति निश्चितम् । राज्ञ एव पूर्पतित्वमुच्यत इति वादः क्लिष्टः । अतश्च पूर्पतिशब्देन ग्रामण्यपेक्षया भिन्नो राजापेक्षया च भिन्नः कश्चन प्रतिपाद्यते । यद्यपि पूर्शब्दस्य योद्धॄणां वासस्थानपरत्वं स्पष्टमेव प्रतीयते । परं तु पूर्पतिशब्दस्य तादृशस्थानाधिपतिपरत्वम् इष्टमेव । स चाधिकारिविशेषः । प्रथमं तावत् पूर्शब्दस्य योद्धृस्थानपरत्वमेवासीत् । पश्चादयं शब्दो नगरपरः परिणत इति पाश्चात्या अस्मदीया आधुनिकाश्च वदन्ति । युद्धव्यवहारसम्बन्धोऽपि दृश्यते । परं तु पूर्पतिः सेनान्यपेक्षया भिन्न एव । सेनानीर्युद्धे प्रवृत्तानां योद्धॄणां नेता । अयं पुनः सेनानिवासस्थानस्याधिपतिः । अथापि ऋग्वेदे श्रूयमाणे मन्त्रे श्रुतः अयं पूर्पतिः सेनान्यपेक्षया भिन्नो राजसदृश इत्यपि ज्ञायते । अयं च सिविल् अधिकारी इति सुस्पष्टं प्रतीयते । ग्रामण्यपेक्षया चायं भिन्नः । वैदिककोशकारास्तु ग्रामणीसमानार्थक इति वदन्ति ॥

॥ ग्रामणीः-ग्रामी ॥

ग्रामणीरित्येकमधिकारिस्थानम् । स च ग्रामाधिपतिः । अत्र ग्रामशब्दो नगरप्रतिद्वन्द्वितया न प्रयुक्तः; यतो नगरग्रामभेदोऽर्वाक्कालिक एव । पश्चात्काले यत् नगरशब्देनोच्यते तदेव वेदेषु ग्रामशब्देनोच्यते । अतश्च ग्रामशब्देन केवलजनावासस्थानस्यैव ग्रहणम् । एकैकस्य राज्यस्य बहवो ग्रामा अवर्तन्त । प्रतिग्रामं ग्रामनिर्वाहाय कश्चन पुरुषो नियुक्तः । स च राज्ञा नियुक्तः । राज्ञा नियुक्तरत्निमध्येऽपि तस्य पाठात् । तस्यापि सहायं कर्तुं ग्रामसभा अथ वा सजाता आसन् । (तस्माद्ग्रामणीः सजातैः पर्यूढः) (यः परस्तात् ग्राम्यवादीव स्यात् तस्य सभायाः ।) राजापेक्षया अयं न्यूनः । अथापि साधारणजनापेक्षयाऽयमुत्कृष्टः । ग्रामणीरिति तस्य नाम । ग्रामणीत्वप्राप्तिः पुराभिलाषापदमभूत् । (सर्वे ग्रामणीयं प्राप्नुवन्ति) त्रयस्त्रिंशदहाख्ययागस्य ग्रामणीत्वप्राप्तिः फलमुच्यते । तथान्यत्र (जै. ब्रा.) मम ग्रामण्याय इत्युच्यते । ग्रामणीत्वं ग्रामित्वं चैकमेव । ग्रामित्वप्राप्त्यर्थं ब्राह्मणेषु कर्माणि विहितानि । ग्रामकाम इति जैमिनीयब्राह्मणे एवं पठ्यते (2-271) "अथ होचुरषाढं सावससं-यत् त्वं शार्कराक्षाणां वा व ग्रामण्य एवासि केन त्वमिदं प्रापिथेति । स होवाच पूर्वैवाहं तदुपास" इति (2-271) । अत्र ग्रामणीः सन् कथं राज्ञोऽपि पूज्योऽभूः इति पृच्छ्यते । तथा 'धूर्षु किमुपास्से' इति पुनः प्रश्नः क्रियते । 'किं त्वत् धूर्षूपास्स' इति । तत्रैवं प्रत्युक्तम् । 'जानमिति । य आसां जातमुपास्तेऽर्कं स भवती'ति । पुनः प्रश्नः । तत्राप्येवं प्रतिवचनं दत्तम् । "यत्रैव सजातो भवति तद् ग्रामणीर्भवति" इति । अतः सजातप्राप्त्या ग्रामणीत्वं भवतीति प्रतीयते । सजातप्राप्त्या अषाढः सावसोऽपि ब्राह्मणो ग्रामणीरासीदिति गम्यते । तथा वैश्यस्यापि ग्रामणीत्वमासीत् (वैश्यस्य ग्रामण्यो गृहे) न क्षत्रियो ग्रामणीत्वेन श्रुतः । उत्तरत्रापि (1-272) तस्मिन्नेव ब्राह्मणे—'अषाढः सावयसः जगतीं भूमानं प्रजातिमुपास' इति वदति । तादृशोपासनस्य फलप्रतिपादनकाले 'भूमा वै प्रजापतिः जगतीच्छन्दसाम्' इति निरूप्य 'भूमानमेव प्रजया पशुभिर्गच्छति' इत्युच्यते । अनेन ग्रामणीत्वं बहुमानविषयमित्यपि गम्यते । ग्रामणीश्च रत्निष्वन्तर्भावितः । राजसूये स्फ्यप्रदानकर्मणि च ग्रामणीः सङ्गृहीतः । रत्निनो राज्ञा राज्यनिर्वाहाय नियुक्ता अधिकारिणः । तद्विवरणं च रत्निनिरूपणावसरे कृतम् । अन्यत् सर्वं ग्रामविषये सजातविषये च वक्तव्यं 'ग्रामः सजाताश्च' इत्यत्र निरूपितम् ॥

॥ स्थपतिः ॥

स्थपतिशब्दोऽपि अधिकारिवाचकः । अथर्ववेदे अन्येषु वेदेषु चोदाहृतः । अथर्ववेदे परं स्थपतिशब्दो न साक्षात् अधिकारिपरतया प्रयुक्तः । क्रमीणां प्रस्तावे राज्ञः स्थपतीनां च प्रस्तावो वर्तते । (अथर्व.सं 5-23-11) ("हतो राजा क्रमीणां उतैषां स्थपतिर्हतः") । अत एव ज्ञायते राजवत् अयमपि अधिकारिपुरुष इति । यजुःसंहितासु रुद्राध्याये स्थपतिनिर्देशो वर्तते । "रोहिताय स्थपतये" (तै.सं. 4-5-22;) (काठ.सं.17-12) पञ्चविंशब्राह्मणे च स्थपतिसव इति कश्चन यागो विहितः । स्थपतेरभिषेकश्च सूचितः । "स एष स्थपतिसवः यं स्थापत्यं अभिषिञ्चेरन् । स एतेन यजेत । गच्छति स्थापत्ये । य एवं वेद" (पञ्चविंशब्राह्म. 17-11-6-7) । सायणश्च धर्मस्थापकः स्थपतिः इति अभिप्रैति । "देवा वै सत्रमासत । बुधेन स्थपतिः (पञ्चविं. ब्रा. 24-28-2-1) (शत.ब्रा.12-8-1-17) "रेवोत्तरश्चोग्रस्थपतिः । दुष्टरीतुं पौंस्यायनं पुना राज्ये स्थापयामासेती'तिहासश्च श्रूयते । अयं च स्थपतिः "गवर्नर्"पदवाच्यः इति ब्लूम्फिल्ड्महाशयो वदति । प्रधानप्राड्विवाक इति वैदिककोशकर्तारो मन्यन्ते । तस्य नीतिनिर्णयो राज्यकार्यनिर्वाहे चाधिकारः समस्ति । राजसूयस्रुप्रदानकर्मणि अस्य सम्बन्धसत्त्वात् स्थपती राज्ञा नियुक्तः पुरुष एव । अयं च राजभ्रात्रपेक्षया समनन्तरः ग्रामण्यपेक्षयोत्तरश्च । (तं) राजभ्राता सूताय वा स्थपतये वा प्रयच्छति । तं सूतो वा स्थपतिर्वा ग्रामण्ये प्रयच्छति (शत. ब्रा. 5-4-4-16-17) । इदं स्थापत्यं सर्ववर्णसाधारणम् । निषादा अपि स्थपतय आसन्निति ज्ञायते । 'एतया निषादस्थपतिं याजयेत्' इति श्रवणात् । मीमांसासूत्रकारो जैमिनिः स्वसूत्रे महता प्रयासेन निषादजातीयानामपि स्थपतित्वं स्थापयामास ॥

॥ विश्पतिः ॥

विश्पतिशब्दः सिविल्अधिकारिवाची । एतादृशं स्थानम् ऋग्वेदकालादारभ्य (1-12-2) श्रूयते । विश्पती राजापेक्षया भिन्नः । अयं च (Contonment) स्थानस्याधिकारी इति जिम्मर्महाशयोऽभिप्रैति । यतो विश्पतिर्लोके दृष्टः अत एव देवता अपि विश्पतित्वेन स्तुताः । बहुषु स्थलेषु अग्निर्विश्पतित्वेन स्तुतः । "सस्तु विश्पतिः" (ऋक्सं.7-55-5) इत्यादिस्थलेषु लौकिकविश्पतिप्रस्तावोऽस्ति । ऋक्संहितायाम् (7-39-2) अस्मिन् मन्त्रे विश्पतिरुदाहृतः । 'प्रवाव्राजसुप्रया बर्हिषेद्धाः विश्पतीव बिरीटनुयाते । विशामक्तोरुषसः पूर्वहुतो वायुः । एषा स्वस्तये नियुत्वान् । विशां गणे विश्पतीव' इति विश्पतेरौपम्यमपि सूचितम् । प्रथमं विश्पतिशब्दो विशां पतित्वेन कश्चन कल्पयित्वा तत्रैव प्रयुक्त आसीत् । उत्तरकाले यदा कल्पितः तदा सोऽपि विश्पतिशब्देन प्रतिपादितः । परं तु राज्ञो राष्ट्रपतित्वेन तस्याधस्तात् विश्पतिस्थानमपि संरक्षितम् । वैदिककोशकर्तारो विश्पतिशब्दस्य राजपरत्वं वदन्ति । किं च विश्शब्दस्यापि सजातशब्दपर्यायत्वं च वदन्ति विश्पतिशब्दविवरणावसरे । नेदं समञ्जसम्; सजातशब्दस्य विड्विशेषपरत्वात् विट्शब्दस्य च जनसामान्यपरत्वात् । अन्यत्र च, 'विश्पतिं शश्वतीनां' इति श्रवणात् प्रतिष्ठितानां जनानां पतिरेव विश्पतिरिति गम्यते ॥

॥ दशपतिः ॥

शतपतिवत् दशपतिरपि स्थानविशेष एव । जैमिनीयब्राह्मणेऽस्य प्रस्तावोऽस्ति (1-172) 'दाशस्पत्यं श्रैष्ठ्यकामः कुर्वीत । देवासुरा अस्पर्धन्त । ते देवा इन्द्रमुपाधावन् । त्वयाधिपत्येनेदं जया वेति । स इन्द्रोऽकामयत जयमासुरानिति । तेनाऽस्तुवत । ततो वै देवा असुरानजयन् । तस्मै विजित्यासीना च दशपतये । दशपतय आ इत्येवोद्धारानुदहरन् । तदेव दाशस्पत्यदाशस्पत्यत्वम्' इति यजुर्ब्राह्मणे श्रूयमाणे मन्त्रे । य एक एत् ॥

॥ शतपतिः ॥

शतपतिशब्दोऽपि अधिकारिवाचकः । (तै. ब्रा. 2-8-4-2) "य एक इच्छत पतिर्जनेषु" (मै. सं. 4-14) । जनेषु शतपतिरपि प्रदर्शनमेत्र अधिकारसूचकम् । स च शतानां ग्रामाणां पतिर्भवतु । स्मृतिषु शतानां ग्रामाणां पतिः शतेशः इति सूचितो मनुस्मृतौ । स च न्यायसभापती राजार्थं द्रव्यसङ्ग्रहीता च स्यात् ॥

॥ राज्यतन्त्रवैविध्यम् ॥

मन्त्रब्राह्मणभागेषु विविधानि राज्यतन्त्राणि श्रूयन्ते। "राज्यं" "साम्राज्यं" "वैराज्यं" इत्यादि राज्यतन्त्रसम्बद्धा व्यवहारा बहुलमुपलभ्यन्ते। तथा "राजा" "अधिराजः" "एकराट्" "सम्राट्" "स्वराट्" इति राज्ञां निर्देशोऽपि वर्तते। अत्र च कतिविधानि राज्यतन्त्राणि इति विमर्शस्यावकाशो भवति। तत्र राज्यमिति व्यवहारः ऋग्वेदादारभ्यैव प्रवृत्तः। यत्र चाभिषिक्तः पुरुषो राजा भवति तत्रापि राज्ञ उपकारकरणार्थं सभासमित्यादय उपक्लृप्ताः। एकस्मिन् राज्ये एकजातीया एव जनाः प्राचीनतमे काले आसन्। पश्चात् परं बहुजातीया अपि जनाः तत्रान्तर्भाविताः। एतद्राज्यं (Political-Unit) पोलिटिकल् यूनिट् इति कथ्यते। तत्र राजा कुत्रचिज्जनैर्वृतः, अन्यत्र परम्पराप्राप्तराजत्ववान्। केषुचित् स्थलेषु न कस्यचिदेकस्य पुरुषस्य राजत्वेन व्यवहारः, अपि तु एकस्य कुटुम्बस्यैव राज्येऽधिकारः। तत्रैको राजा भवति। अन्ये पुनः तस्योपकुर्वन्ति। तथैकस्यैव राज्ञ एकाधिकराज्येष्वपि अधिकार आसीदिति ज्ञायते। द्वयोः त्रयाणां वा राज्यानामेक एव राजा आसीत्। तथा अधिराज इति किञ्चन स्थानम्। तत्रानेकेषां राज्ञामुपरि कस्यचिदधिकारः, स एवाधिराज इत्युच्यते। अधिराजस्य स्वकीयं किमपि राज्यं वर्तते। परं त्वन्ये केचन राजानः स्वोपर्यपि तस्याधिकारसूचनार्थं करदानादिकं कुर्वन्ति। एकराट् स्वराट् इत्यादिव्यवहारा राजसम्बन्धिन एव। परं तु तयोर्व्यवहारयोः कीदृशं मुख्यत्वमस्तीति निश्चित्य वक्तुं न शक्यते। "एकराट्"-शब्देन सदृशानां बहूनां मध्ये एकस्य राजत्वमिति अर्थः सूच्यते। यत्र च राजकुटुम्बस्थानां बहूनामधिकारे समेऽपि एकस्य प्राबल्यमङ्गीकृतम् तद्विषयो वायं व्यवहारः स्यात्। अथ वा अनेकेषां राज्यानामधिपतयो बहवो राजानः सन्ति। तत्रैकस्याधिकोऽधिकारः, अन्येषां पुनः किञ्चिन्न्यूनाधिकार इत्यपि वक्तुं शक्यते। तथा "स्वराट्"शब्दो राज्ञोऽन्यादृशं स्वातन्त्र्यं बोधयति। यः पुनः सभासमितिनिरपेक्षं राज्यं करोति स एव स्वराट्शब्दवाच्यो भवति। तथा जनवरणनिरपेक्षं स्वबलेनैव राज्यं प्राप्तवान् सोऽपि स्वराट्शब्दवाच्यः। एतादृशराजप्रधाने राजतन्त्रेऽधिकारिपुरुषो जनाभिप्रायप्राधान्यं चाङ्गीकृतप्रायमेव। एकस्मिन् राज्ये यदि ग्रामः एक एव स्यात् तदा सभा वा समितिर्वा प्रजाभिप्रायाविष्करणार्था सर्वथा वर्तते। राजा च जनानामभिप्रायं समितिद्वारा ज्ञात्वा कार्यं निर्वहति। राज्यं चाधिकारसौकर्यार्थं बहुधा विभक्तम्। तत्र तत्र चाधिकारिपुरुषा राज्ञा नियुक्ताः कार्यनिर्वाहं कुर्वन्ति। यदा चैकस्मिन् राज्ये बहवो ग्रामाः तदा प्रतिग्रामं ग्रामणीर्वर्तते। स च

तद्ग्राममात्रविश्रान्तसभयोपकृतः । केषुचिद्विषयेषु राजाज्ञानिरपेक्षं ग्रामकार्यं निर्वहति (Local Self Government) । यदि दशाधिका ग्रामाः तदा दशपतिः इति कश्चनाधिकारी भवति । यदि चैकस्मिन् राज्ये शताधिका ग्रामाः तदा दशाधिपानामुपरि शतपतिरिति कश्चनाधिकारी वर्तते । तदुपरि राज्ञोऽधिकारः ॥

एकाधिकराज्येष्वपि अयमेव नियमः समस्ति । राज्ञामुपरि वर्तमानस्याधिराजस्य स्वाधीवर्तमानेषु राज्येषु अधिकारः, परं तु तस्य श्रैष्ठ्यसूचनार्थं करग्रहणमेव अङ्गीकृतम् ॥

राजतन्त्रे सम्राट्तत्त्वं बौद्धमतानुसारिसम्राट्अशोकादारभ्यैव प्रवृत्तमिति सर्वेऽपि ऐतिहासिका ऐकमत्येनोद्घोषयन्ति । परं त्विदं न सङ्गच्छते । सम्राट् साम्राज्यमिति व्यवहारः ऋङ्मन्त्रेष्वेव प्रारब्धः । तथा राज्यसाम्राज्ययोर्भेदोऽपि सुस्पष्टं प्रतिपादितः ॥

"अवरं हि राज्यं परं साम्राज्यं" इति शतपथब्राह्मणे स्पष्टमुच्यते । तथा जनकस्य राज्ञः सम्राट्त्वेन व्यवहारो बृहदारण्यके वर्तते । ऐतरेयब्राह्मणे ऐन्द्रमाहाभिषेकप्रकरणे जनमेजयादयो राजानः सार्वभौमत्वेनोल्लिखिताः । अतः सम्राट्त्वमपि वैदिकराज्यतन्त्रस्य न नूतनम् ; अथ वा वैदेशिकम् । बहूनां राज्यानां तात्कालिकः सार्वकालिकश्च समाहारः (Federation and Confederation) सूचितः वशउशीनराणां काशिविदेहानां कुरुपाञ्चालानां च समाहारः सार्वकालिकः । सुदासा युद्धं कर्तुं दशसङ्ख्याकानि राज्यानि तात्कालिकसमाहारं प्राप्तानीति श्रूयते । तात्कालिकसमाहारे सार्वकालिकसमाहारे वा राज्ययो राज्यानां वा स्वस्वाधिकारत्यागः किञ्चिदेवासीदिति सूच्यते । सभायां वा समित्यां वा संहतराज्यप्रतिनिधयः सर्वेऽपि समागता इत्यभ्यूह्यते । तत्रापि राज्ययोर्द्वयोर्वा त्रयाणां वा सामान्या विषया विचारिताः ॥

जनतन्त्रतत्त्वरीत्या केषुचिद्राज्येषु राज्यतत्त्वमासीदिति निश्चयात् जनैर्वृताः जनाधिपतयोऽप्यासन्निति दृश्यते । परं तु जनैर्वृतस्य कियत्कालपर्यन्तमधिकार इति न सुस्पष्टं प्रतीयते । अथापि यावज्जनाभिप्रायानुकूल्यं तेषां स्थितिरासीदित्यत्र न संशयलेशोऽपि । यावन्मरणं तेऽपि राजवत् मन्यन्ते । प्रायः तेषामधिकारोऽपि राज्ञ इव वर्तते । जनाधिपतयो जनराजान इत्युच्यन्ते जनराजशब्दः ऋग्वेदेऽपि प्रयुक्तः । सुबन्धुनाम्ना राज्ञा विंशतिसङ्ख्याका जनराजानो युद्धमकुर्वन्निति उच्यते । अभिषेकप्रकरणेऽपि "जानराज्याये"ति पठ्यते । अतो जनतन्त्रानुसारिराज्यतत्त्वमपि वेदोक्तमेव ॥

॥ इतः परं राज्यतन्त्रतत्त्ववैविध्यप्रतिपादकान् मन्त्रब्राह्मणभागान् सविमर्शं प्रदर्शयामः ॥

राज्यतन्त्रतत्त्ववैविध्यप्रतिपादकानि वाक्यानि मन्त्रब्राह्मणेषु बहूनि सन्ति । क्वचिद्वि-विधानां राज्यतन्त्राणां प्रस्तावमात्रं क्रियते । क्वचिच्च तद्विवरणम् । एतादृशवाक्यानां मध्ये ऐतरेय-ऐन्द्रमाहाभिषेकप्रकरणे दृश्यमानं निरूपणं समालोचनार्हमेव । अत्र विविधानि

राज्यतन्त्राणि सोदाहरणं प्रस्तुतानि । अत्र ह्येवं श्रूयते—(ऐ. ब्रा. 8-14) "अथैनं प्राच्यां दिशि वसवो देवाः षड्भिः चैव पञ्चविंशैरहोभिः अभ्यषिञ्चन् । एतेन च तृचेन एतेन च यजुषा एताभिश्च व्याहृतिभिः साम्राज्याय । तस्मादेतस्यां प्राच्यां दिशि ये के च प्राच्यानां राजानः साम्राज्यायैव ते अभिषिच्यन्ते । सम्राडित्यनेन अभिषिक्तानाचक्षते । एतामेव देवानां विहितिम् अनु । अथैनं दक्षिणस्यां दिशि रुद्रा देवाः षड्भिश्चैव पञ्चविंशैरहोभिः अभ्यषिञ्चन् । एतेन च तृचेन एतेन च यजुषा एताभिश्च व्याहृतिभिः भौज्याय तस्मादेतस्यां दक्षिणस्यां दिशि ये के च सत्त्वतां राजानो भौज्यायैव ते अभिषिच्यन्ते । भोजेत्येनानभिषिक्तानाचक्षते । एतामेव देवानां विहितमनु । अथैनं प्रतीच्यां दिश्यादित्याः षड्भिश्चैव पञ्चविंशैरहोभिः अभ्यषिञ्चन् । एतेन तृचेन एतेन च यजुषा एताभिश्च व्याहृतिभिः स्वाराज्याय । तस्मादेतस्यां प्रतीच्यां दिशि ये के च नीच्यानां राजानो ये अपाच्यानां स्वाराज्यायैव ते अभिषिच्यन्ते । स्वराडित्येनान् अभिषिक्तानाचक्षते । एतामेव देवानां विहितिमनु । अथैनमुदीच्यां दिशि विश्वे देवाः षड्भिश्चैव पञ्चविंशैरहोभिः अभ्यषिञ्चन् । एतेन तृचेन एतेन च यजुषा एताभिश्च व्याहृतिभिः वैराज्याय । तस्मादेतस्याम् उदीच्यां दिशि ये के च परेण हिमवन्तं जनपदा उत्तरकुरव उत्तरमद्रा इति वैराज्यायैव ते अभिषिच्यन्ते । विराडित्येतानभिषिक्तानाचक्षते । एतामेव देवानां विहितमनु । अथैनमस्यां ध्रुवायां मध्यमायां प्रतिष्ठायां दिशि साध्याश्चाप्त्याश्च देवाः षड्भिश्चैव पञ्चविंशैरहोभिः अभ्यषिञ्चन् । एतेन तृचेन एतेन च यजुषा एताभिर्व्याहृतिभीः राज्याय । तस्मादस्यां ध्रुवायां मध्यमायां प्रतिष्ठायां दिशि ये के च कुरुपाञ्चालानां राजानः सवशोशीनराणां राज्यायैव ते अभिषिच्यन्ते । राजेत्येनानभिषिक्तानाचक्षते । एतामेव देवानां विहितमनु । अथैनमूर्ध्वायां दिशि मरुतश्चाङ्गिरसश्च देवाः षड्भिश्चैव पञ्चविंशैरहोभिरभ्यषिञ्चन् । एतेन तृचेन एतेन च यजुषा एताभिश्च व्याहृतिभिः पारमेष्ठ्याय माहाराज्याय आधिपत्याय स्वावश्याय आतिष्ठाय स परमेष्ठी प्राजापत्य अभवत् । स एतेन महाभिषेकेनाभिषिक्त इन्द्रः सर्वाभिजितीरजयत् । सर्वान् लोकानविन्दत् । सर्वेषां देवानां श्रेष्ठ्यमतिष्ठां परमतामगच्छत् । साम्राज्यं भौज्यं स्वाराज्यं वैराज्यं पारमेष्ठ्यं राज्यं महाराज्यम् आधिपत्यं जित्वा अस्मिन् लोके स्वयंभूस्वराडमृतः अमुष्मिन् स्वर्गे लोके सर्वान् कामानाप्त्वा अमृतः समभवत्" इति ॥

यद्यप्यत्र ऐन्द्रो माहाभिषेकः प्रस्तुतः, अथापि लौकिकान्येवोदाहरणानि अत्र दीयन्ते । पूर्वस्मिन् ब्राह्मणे सप्रजापतिका देवा ओजिष्ठं बलिष्ठं साहिष्ठं सत्तमं तारयिष्णुतमम् इन्द्रमभिषेक्तुं प्रयत्नं कृतवन्त इत्युच्यते ॥

वस्वादिभिः कृतस्याभिषेकस्य प्रमाणतया दीयमानमुदाहरणम् अभिप्रायविशेषं प्रकाशयत्येव । तेनैतज्ज्ञायते । ऐतरेयब्राह्मणकाले राज्यतन्त्रपरिस्थितिः एवमासीदिति । प्राच्यां दिशि वर्तमाना जनाः साम्राज्यायैव स्वराजमभ्यषिञ्चन् । राजानं च सम्राडित्येव व्याजह्रुः इति

च। तथा दक्षिणस्यां दिशि वर्तमाना जनाः सत्वताख्याः स्वराजं भौज्याख्यराज्यतत्त्वार्थमभिषिञ्चन्। स्वराजं च भोजपदेन व्यवहृतवन्तः। तथा प्रतीच्यां ये नीच्या अपाच्याश्च जना आसन् ते च स्वराजं स्वराज्याख्यराज्यतत्त्वायैवाभ्यषिञ्चन्। स्वराजमपि स्वराट्शब्देन व्यवहृतवन्त इति। तथोत्तरमद्राख्यप्रदेशेषु हिमवन्तं परेण विद्यमानेषु जनपदेषु वर्तमाना जनाः स्वराजं वैराज्याख्यराज्यतत्त्वायाभ्यषिञ्चन्। स्वराजं विराट्पदेन व्यवहृतवन्तः। तथा ध्रुवायां मध्यमायां दिशि वर्तमानाः स्ववशोशीनराः कुरुपाञ्चालाः च स्वराजं राज्यतत्त्वायैवाभ्यषिञ्चन्। अभिषिक्तं च पुरुषं राजपदेन व्यवहृतवन्त इति॥

अत्र सम्राट्विराट्स्वराट्राट् इत्याख्यानां राज्यतन्त्राणां श्रूयमाणः प्रस्तावो नापह्नोतुं शक्यते। ब्राह्मणं च तत्तन्नाम्ना द्योत्यमानं राजतन्त्रतत्त्वभेदमपि सुस्पष्टमेव सूचयति। परं त्वाधुनिकाः पाश्चात्या अस्मदीयाश्च नामभेदेन राज्यतन्त्रभेदं नाङ्गीकुर्वन्ति। अर्वाचीनानां मध्ये जयस्वाल्महाशय एव नामनिर्देशभेदेन राज्यतन्त्रभेदं पश्यति। अन्ये पुनः एकस्यैव राज्यतत्त्वस्यैतानि विशेषणानि भवितुमर्हन्तीति वदन्ति। जयस्वाल्महाशयः स्वकीये ग्रन्थे सोपपत्तिकं सप्रमाणं च सम्राट्विराडित्यादिपदानां राज्यतन्त्रभेदपरत्वं प्रतिपादयति। तस्यायमभिप्रायः—ऐतरेयब्राह्मणे प्रतिपाद्यमानं भौज्य-स्वाराज्य-वैराज्य-राज्यादिकं राज्यतन्त्रे तत्काले वर्तमानं भेदमेव प्रतिपादयति। तत्र भौज्यशब्दः "अपरम्पराप्राप्तनेतृत्व"परः। नेतारश्च बहवः। भौज्यशब्दश्च भोजशब्दादुत्पन्नः। भोजनामका जनाः तेषां राजा च तत्र तत्रेतिहासपुराणेषु श्रुताः; यथा वा भोजाः श्रुताः तथा महाभोजा अपि श्रुताः प्राचीन-शिलालेखेषु। अशोकशिलालेखानुसारेण राष्ट्रिका एव भोजा इति ज्ञायते। शिलालेखेषु राष्ट्रिकाः पेत्तनिकस्य प्रतिद्वन्द्वितया श्रुताः। पेत्तनिकानां च परम्पराप्राप्तनेतृत्वप्रतिपादनात् तत्प्रति-द्वन्द्विनां भोजानाम् अपरम्पराप्राप्तनेतृत्वमस्तीति ज्ञायते। अङ्गुत्तनिकायनामबौद्धग्रन्थ-प्रामाण्येनैवं जयस्वाल् महाशयो निश्चिनोति। सङ्गच्छते चैतत्। दक्षिणस्यां दिशि वर्तमाना जनाः सात्वतशब्देन ऐतरेयब्राह्मण एव प्रतिपाद्यन्ते। "आदत्त यज्ञं काशीनं भरतः सात्वतामिव" इति अन्यत्र प्रतिपादितम्। सात्वताश्च जना अन्धकवृष्ण्यादिशब्दैः पुराणेषु प्रतिपादिताः। तेषां विलक्षणं च राज्यतन्त्रमासीदिति प्रमाणेभ्योऽवगम्यते॥

तथा "स्वराज्य"शब्दोऽपि विभिन्नराज्यतन्त्रतत्त्वमेव प्रतिपादयति। इतरानपेक्षराज-त्वमेव स्वराज्यमिति गम्यते। "गच्छति स्वाराज्यम् अग्रं समानानां पर्येति। अतिष्ठन्तास्मै ज्यैष्ठ्याय" (तै. ब्रा. 1-3-22) इति तैत्तिरीयब्राह्मणे श्रूयते। अनेन ज्ञायते सदृशानां मध्ये कस्यचिदध्यक्षत्वेन वरणम् इति। जयस्वाल्महाशयमतानुसारेण समानाधिकारवतां पुरुषाणां मध्ये एकस्य संवरणम्। स च स्ववरणानन्तरं स्वकार्यं स्वयमेव करोति। तत्र तत्र राज्यतन्त्र-

निर्वाहार्थं गणा आसन् । गणेषु च सभ्याः समानाधिकारवन्त एव । परं तु गणकार्यनिर्वाहार्थं स्वेषां मध्ये एकं नियोजयन्ति । ऐतरेयब्राह्मणकाले प्रतीच्यां दिशि एतद्राज्यतन्त्रमासीत् । तथा वैराज्यशब्दोऽपि राज्यतन्त्रभेदप्रतिपादकः । विराट्शब्दस्य विगतो राजा यस्मादिति व्युत्पत्त्यनुसारेण यत्र राजा न वर्तते तादृशमेव राज्यतन्त्रं वैराज्यशब्देनोच्यत इति तस्याभिप्रायः । तत्रैव राज्यतन्त्रानुसारिजनतन्त्रतत्त्वस्य सम्पूर्णता अस्ति । व्याकरणसूत्रानुसारेण मद्रदेशे गणतन्त्रमेवासीदिति निश्चेतुं शक्यते । ऐतरेयब्राह्मणे चोत्तरदिक्षु वर्तमानजनानां प्रस्तावकाले 'जनपद' शब्दः अन्यभागविलक्षणतया प्रयुक्तः । "परेण हिमवन्तं जनपदाः" इति हि तत्रोक्तम् । अन्यदिग्भागेषु हि "नीच्यानां राजानः" इत्यादिव्यवहारो दृश्यते । यद्यपि व्याख्यातारो वैराज्यशब्दस्य विशेषेण राजत इति अर्थमनुसृत्य सामान्यराजपरत्वमेवाभिप्रयन्ति । परं त्विदमसङ्गतम् । विभिन्नराज्यतन्त्रप्रतिपादनप्रकरणे हि वैराज्यशब्दः प्रयुक्तः । अतश्च वैराज्यस्य राज्यतन्त्ररीत्या मुख्यत्वमस्तीति सर्वैरप्यङ्गीकार्यमेव ॥

कौटिल्यार्थशास्त्रे च वैराज्यपदं प्रयुक्तम् । तत्र तस्य च राज्यतन्त्ररीत्या मुख्यत्वमस्तीत्यपि सूचितम् । 'वैरज्यं तु जीवतः परस्याच्छिद्य नैतन्ममेति मन्यमानः कर्शयति अपवाहयति पण्यं च वा करोति । विरक्तं वा परित्यज्यापगच्छति' इति प्रतिपादितम् (अर्थशास्त्रं 8-2) । सुप्रसिद्धं च जैनग्रन्थेषु वैराज्यनामकराज्यतन्त्रम् । जयस्वालमहाशयस्याभिप्रायो यद्यपि न सर्वैरपि ऐतिहासिकैः अङ्गीकृतः । भौज्यशब्दव्याख्याने वैराज्यशब्दव्याख्याने च बहु विवदन्ते । अथापि जयस्वालमहाशयस्याभिप्रायोऽङ्गीकारार्ह एवेत्यस्माकमभिप्रायः ॥

तत्तद्दिक्सम्बन्धेन प्रतिपाद्यमानः सराट् विराट् स्वराट् इति व्यवहारो न सहसा परित्यागार्हः । यद्यपि राज्ञ एव विराट्त्वं स्वराट्त्वं सराट्त्वं चार्थविशेषप्रतिपादनपरत्वेन निर्वोढुं शक्यते । राज्ञ एव महिमप्रतिपादनार्थम् एतानि विशेषणानि । एतादृशानां विशेषाणां राज्यतन्त्ररीत्या मुख्यत्वं नास्ती'ति च वक्तुं शक्यते । अथापि सम्राट् विराट् स्वराडिति शब्दैः प्रतिपाद्यमानस्यार्थस्यैव राज्यतन्त्ररीत्या मुख्यत्वाङ्गीकारे विरोधं न पश्यामः ॥

यद्यपि राज्यजनपदशब्दयोः अर्थभेदेन भेदनिर्वाहः कर्तुं शक्यते । राज्यशब्दस्य राज्ञ इदं राज्यम् इति राजसम्बन्धः सुस्पष्ट एव । परं तु जनपदशब्देन व्यवहारे क्रियमाणे जनानामेव प्राधान्यं सूच्यते । तत्र राजा नागच्छति । जनपदशब्दस्य च जनावासस्थानपरत्वमेव प्रतीयते । अथापि राजशब्दं विहाय कृतो जनपदशब्दप्रयोगो विशेषमेव सूचयति । जनपदतत्त्वे राजानो नासन्निति । यद्यपि विराट्शब्दस्याराजकराज्यतन्त्रपरत्वं न झटिति प्रतिभाति, अथापि प्रकरणानुसारेणायमेवार्थः अङ्गीकार्यो भवति । ब्राह्मणान्तरेषु सम्राट्विराट्स्वराडिति प्रयोगो बहुलमुपलभ्यते । विराट्शब्दनाम्ना छन्दोऽपि प्रतिपादितम् । राट्, विराडिति व्यवहारश्च तत्तद्दिक्संबन्धित्वेनाद्भृताः । अथापि तावता न विराडित्यादिशब्दानां राज्यतन्त्रतत्त्वरीत्यासम्भाव्यमानं मुख्यत्वमपगतं भवति ॥

॥ सम्राट् ॥

पाश्चात्या अस्मद्देशीयाश्चाधुनिकाः प्राचीनतमे काले साम्राज्यतत्त्वं नासीत्, सम्राडिति न कोऽपि राजा आसीदिति च सुधीरमुद्घोषयन्ति। परं त्विदमसङ्गतमेव। सम्राडिति व्यवहारः ऋग्वेदकालादारभ्यैव प्रवृत्तो दृश्यते। प्रसिद्धमेव ऋग्वेदे वरुणस्य सम्राट्त्वम्। सम्राट्शब्देन राजा जनकोऽपि व्यवहृतः। राज्यापेक्षया साम्राज्यस्योत्कृष्टत्वमपि ब्राह्मणे प्रतिपादितम् इत्युक्तपूर्वमेव। परं तु साम्राज्यशब्दस्य को वार्थ इति निर्णेतव्यं भवति। संशब्दस्वारस्येनैवं निर्णेतुं शक्यते। बहूनां राज्यानां य एको राजा स एव सम्राडिति। बहूनि राज्यानि राज्यतन्त्ररीत्या मुख्यत्वं प्राप्तानि। यद्येकस्य राज्ञोऽधिकारस्यावस्थानं भवति तदा राज्ञः सम्राडिति व्यवहारः। तदधिकारस्य च साम्राज्यमिति च व्यवहारः। परं तु तानि तानि राज्यानि स्वराज्ये राजानं स्वीकृतवन्ति वा न वेति निश्चित्य वक्तुं न शक्यते। उभयथापि दर्शनात्। अनेकेषां राज्ञामुपरि वर्तमानस्य सम्राट्त्वम् इति कुत्रचिद्दृश्यते। कुत्रचित् पुनः एक एव राजा, तत्तद्राज्ये निर्वाहं करोतीति। साम्राज्यान्तर्गतानां राज्यानां कस्मिंश्चिद्विषये स्वातन्त्र्यमासीदित्यप्यङ्गीकर्तव्यं भवति। बहूनां राज्यानां समाहारस्य (Federation) इति व्यवहारोऽस्तीति प्रतिभाति॥

॥ सार्वभौमः ॥

सार्वभौम इति व्यवहारो राज्यतन्त्रसम्बन्धितया प्रयुक्तः । यश्च सर्वामपि भूमिं विजित्य सर्वस्या अपि भूम्या राजा भवति । तादृशसार्वभौमराज्यतन्त्रे एकस्यैव राजत्वम् । कृत्स्नाया अपि भूम्या एकराज्यान्तर्गतत्वमेव । तत्र तत्र ये राजान आसन् ते सर्वेऽपि एकेन जिता राज्याद्भ्रंशिताश्च । अथापि तत्र तत्र वर्तमानराज्यानाम् अङ्गीकार आसीद्वा न वेति न ज्ञायते । तथापि राजापेक्षया राज्यानां प्रधानत्वात् तत्र तत्र प्रजानां प्राधान्यस्याङ्गीकृतत्वाच्च तत्तद्राज्यव्यवहारविषये तत्तद्राज्यजनानामेवाधिकार इति वक्तुं शक्यते । सार्वभौमस्य परमुपरितनोऽधिकार एव । एकस्य राज्ञः एकस्मिन् राज्ये यावानधिकारः तावानेवाधिकारो बहुषु राज्येषु सार्वभौमस्य । सम्राडपेक्षयायं भिन्नः । द्व्यधिकराज्यानाम् उपरि यस्याधिकारो वर्तते तस्य सम्राडिति व्यवहारः । पञ्चषाणां राज्ञाम् उपरि अधिकारं प्राप्यापि सम्राट्त्वं प्राप्तुं शक्यते । सार्वभौमत्वं तु न तथा । सर्वस्या अपि भूमेर्विजयानन्तरमेव तस्य सार्वभौमत्वं भवति । नात्रान्यस्य राज्ञोऽन्यस्य राज्यस्य वा अवकाशः । एतादृशराज्यतन्त्रस्य सत्ता तत्र तत्र प्रतिपादिता । विशिष्य ऐतरेयब्राह्मणे इदं सम्यक् प्रतिपादितमभिषेकप्रकरणे । शतपथब्राह्मणे चैतादृशतत्त्वस्य प्रतिपादनं सार्वभौमानां राज्ञां च प्रस्तावोऽपि श्रुतः । बहवो राजानः सार्वभौमत्वेनोल्लिखिताः, द्वयोर्ब्राह्मणयोः एक एव । तेषां नामनिर्देशं यथाब्राह्मणं प्रदर्शयामः ॥

पारिक्षितो जनमेजयः मानवः शर्यातः शतानीकः सात्राजितः आम्बष्ठ्यः, युधाम्श्रौष्टिः औग्रसेन्यः, विश्वकर्मा भौवनः सुदासः पैजवनः अङ्गः दौष्यन्तिः भरतः अत्यरातिः जानन्तपिः इतीमे राजानः सार्वभौमत्वेनोल्लिखिताः । "समन्तं सर्वतः पृथिवीं जयन् पर्याय । अश्वेन च मेध्येन यजेत्" इति तेषां जयः अश्वमेधयागश्चोक्तः । अत्यरातिजानन्तपिविषये चायं विशेषः श्रूयते । सर्वभूमिजयानन्तरं यदा वासिष्ठः सात्यहव्यः अत्यरातिं जानन्तपिं महन्मागमेयेति उक्तवान् तदा "उत्तरकुरुजयानन्तरमेव सार्वभौमत्वं भवतीति" राजा वदति । एतसंबन्धि ऐतरेयब्राह्मणभागं प्रदर्शयामः ॥

(१) "एतेन ह वा ऐन्द्रेण महाभिषेकेण तुरः कावषेयो जनमेजयं पारिक्षितम् अभिषिषेच तस्मादु जनमेजयः पारिक्षितः समन्तं सर्वतः पृथिवीं जयन् परीयायाश्वेन च मेध्येनेजे ॥

(२) एतेन ह वा ऐन्द्रेण महाभिषेकेण च्यवनो भार्गवः शार्यातं मानवमभिषिषेच तस्मादु शार्यातो मानवः समन्तं सर्वतः पृथिवीं जयन् परीयायाश्वेन च मेध्येनेजे ॥

(३) एतेन ह वा ऐन्द्रेण महाभिषेकेण सोमशुष्मा वाजरत्नायनः शतानीकं सात्राजितं अभिषिषेच तस्मादु शतानीकः सात्राजितः समन्तं सर्वतः पृथिवीं जयन् परीयायाश्वेन च मेध्येनेजे ॥

(४) एतेन ह वा ऐन्द्रेण महाभिषेकेण पर्वतनारदावाम्बष्ठ्यमभिषिषिचतुस्तस्मा-द्वाम्बष्ठ्यः समन्तं सर्वतः पृथिवीं जयन् परीयायाश्वेन च मेध्येनेजे ॥

(५) एतेन ह वा ऐन्द्रेण महाभिषेकेण पर्वतनारदौ युधांश्रौष्टिमौग्रसैन्यमभिषिषि-चतुस्तस्मादु युधांश्रौष्टिमौग्रसैन्यः समन्तं सर्वतः पृथिवीं जयन् परीयायाश्वेन च मेध्येनेजे ॥

(६) एतेन ह वा ऐन्द्रेण महाभिषेकेण कश्यपो विश्वकर्माणं भौवनमभिषिषेच तस्मादु विश्वकर्मा भौवनः समन्तं सर्वतः पृथिवीं जयन् परीयायाश्वेन च मेध्येनेजे ॥

(७) एतेन ह वा ऐन्द्रेण महाभिषेकेण वसिष्ठः सुदासं पैजवनं अभिषिषेच तस्मादु सुदाः पैजवनः समन्तं सर्वतः पृथिवीं जयन् परीयायाश्वेन च मेध्येनेजे ॥

(८) एतेन ह वा ऐन्द्रेण महाभिषेकेण संवर्त आङ्गिरसो मरुत्तमाविक्षित-मभिषिषेच तस्मादु मरुत्त आविक्षितः समन्तं सर्वतः पृथिवीं जयन् परीयायाश्वेन च मेध्येनेजे ॥

(९) एतेन ह वा ऐन्द्रेण महाभिषेकेणोदमय आत्रेयोऽङ्गमभिषिषेच तस्माद्वाङ्गः समन्तं सर्वतः पृथिवीं जयन् परीयायाश्वेन च मेध्येनेजे ॥

(१०) एतेन ह वा ऐन्द्रेण महाभिषेकेण दीर्घतमामामतेयो भरतं दौष्यन्तिममभिषिषेच तस्मादु भरतो दौष्यन्तिः समन्तं सर्वतः पृथिवीं जयन् परीयायाश्वेन च मेध्येनेजे ॥

(११) एतं वा ऐन्द्रं महाभिषेकं बृहदुक्थ ऋषिर्दुर्मुखाय पाञ्चालाय प्रोवाच तस्मादु दुर्मुखः पाञ्चालो राजा सन् विद्यया समन्तं सर्वतः पृथिवीं जयन् परीयाय ॥

(१२) एतं ह वा ऐन्द्रं महाभिषेकं वासिष्ठः सात्यहव्योऽत्यरातये जानंतपये प्रोवाच तस्माद्वात्यरातिः जानन्तपिरराजा सन् विद्यया समन्तं सर्वतः पृथिवीं जयन् परीयाय ॥

शतपथब्राह्मणे चाश्वमेधप्रकरण एव एतेषां राज्ञां तथान्येषामश्वमेधकर्तॄणां । राज्ञां प्रस्तावोऽस्ति । शतपथब्राह्मणरीत्या अधिका इमे राजानः सार्वभौमत्वेन श्रूयन्ते ॥

जनमेजयः, भीमसेनः, उग्रसेनः श्रुतसेनश्च पालिक्षितीया राजानः, पर आट्नारः कौसल्यो राजा ऐक्ष्वाकः राजा पुरुकुत्सः मरुत्तः आविक्षित् ऋत्यः पाञ्चालो राजा हसावैतवः मात्स्यो राजा ऋषभो यज्ञातुरः शिक्नानां राजा शोणः सात्रासः पञ्चालानां राजा शतानीकः सात्रासः ॥

शतपथे अश्वमेधप्रकरणे हि अश्वमेधकर्तारः राजानः प्रतिपादिताः । नात्र तेषां सार्वभौमत्वनिरूपणमस्ति । प्रायः सर्वे ते ऐतरेयब्राह्मणोल्लिखिता एव । पञ्चषा एव अधिकाः । ऐतरेयब्राह्मणे समन्तात् सर्वतः पृथिवीं परीयाय अश्वेन च मेध्येनेजे इति प्रतिपादनात् शतपथब्राह्मणोक्ता अपि अश्वमेधकर्तारो राजानः सार्वभौमा एवेति निश्चीयते ॥ अत एव कल्पसूत्रे (आ.श्रौत-सू) "राजा सार्वभौमः अश्वमेधेन यजेत" इत्युच्यते ॥

॥ द्वैराज्यम् ॥

द्वैराज्यमिति व्यवहारो जैनग्रन्थे श्रुतः । तादृशव्यवहारो जैमिनीयब्राह्मणेऽपि उल्लिखितः । द्वयोस्त्रयाणां वा राज्यानाम् एको राजा भवति । तत्रापि एको राजा भवति । अपरश्च स्वराट् ॥

ऐतरेयब्राह्मणे राज्ञः उत्क्रोशकाले सम्राजं साम्राज्यं भोजं भौजमितरं स्वराजं स्वाराज्यं विराजं वैराज्यं राजानं राजपितरं परमेष्ठिनं पारमेष्ठ्यम् (ऐ. ब्रा. 8-17) इति निर्देशो वर्तते । तस्मिन्नेव ब्राह्मणे "महाराज्याय आधिपत्याय स्वातिष्ठाय" इति निर्देशो वर्तते । अभिषेकप्रकरणेषु "राजानम् अभिषेक्ष्यमाणः" इति राजशब्दघटित एव प्रयोगो दृश्यते । राजसूयप्रकरणे च राजपदघटितमन्त्रा एव वर्तन्ते । वाजपेयाभिषेकमन्त्रे परं साम्राज्यपदघटितमन्त्रा दृश्यन्ते । "अग्नेस्त्वा साम्राज्येनाभिषिञ्चामि, इन्द्रस्य त्वा साम्राज्येनाभिषिञ्चामि, बृहस्पतेस्त्वा साम्राज्येनाभिषिञ्चामि" ॥ अत्र सम्राट्पदप्रयोगोऽस्ति । "य इच्छेत् एवंवित्क्षत्रियम् अयं सर्वाजितीर्जयेतायं सर्वाँल्लोकान्विन्देतायं सर्वेषां राज्ञां श्रेष्ठ्यम् अतिष्ठां परमतां गच्छेत साम्राज्यं भौज्यं स्वाराज्यं वैराज्यं पारमेष्ठ्यं राज्यं माहाराज्यम् आधिपत्यमयं समन्तपर्यायी स्यात् सार्वभौमः सार्वायुष आन्तादापरार्धात् पृथिव्यै समुद्रपर्यन्ताया एकराडिति तमेतेनैन्द्रेण माहाभिषेकेण क्षत्रियं शापयित्वा अभिषिञ्चेत्" इति । (ऐ. ब्रा. 8 4-15-4-15) ॥

यजुर्मन्त्रेषु "राज्ञी विराज्ञी सम्राज्ञी स्वराज्ञी अधिपत्नी"त्यादि व्यपदेशोऽपि वर्तते । "राज्ञ्यसि प्राची दिक् विराडसि दक्षिणा दिक् सम्राडसि प्रतीची दिक् स्वराडस्युदीची दिक् अधिपत्नी असि बृहती दिक्" इति तत्तद्दिक्पुरस्कारेण राजविराजादिपदानि प्रयुक्तानि । राट् विराट् सम्राट् स्वराडिति व्यवहारो यजुर्मन्त्रेषु चयनप्रकरणे बहुलमुपलभ्यते । परं तु तेन तेन पदेन प्रतिपाद्यमानार्था न कुत्रापि निरूपिताः । शब्दार्थस्वारस्यात् अर्थविशेषकल्पनं सूचितमेव । अथाधिराजतत्त्वसम्बद्धा वेदभागाः प्रदर्श्यन्ते । "इन्द्रो जयाति न परा जयातै अधिराजः राजसु राजयाति" इति मन्त्रे अधिराजप्रस्तावोऽस्ति । तैत्तिरीयसंहितायां (2-3-6-1) "इन्द्राय राज्ञे पुरोडाशमेकादशकपालं निर्वपेत्, इन्द्रायाधिराज्याय इन्द्राय स्वराज्ञे" इति पठ्यते । अत्र राज-अधिराज-स्वराजशब्दा अर्थविशेषप्रतिपादकाः । राज्यतन्त्र-रीत्या मुख्यत्ववन्तः ॥

मैत्रायणीसंहितायां "इन्द्राय आधिराज्याय एकादशकपालं निर्वपेत् । यत्र राजानः सदृशा इव स्युः । इन्द्रो वै देवानामधिराजसमेव भागधेयेन उपासरत् स एनमधिराज्यं गमयति" (मै. सं. 2-2-11) इत्युक्तम् । अत्र द्वयं प्रतिपाद्यते । सदृशेष्वेव राजसु आधिक्येनैकः अधिराजो भवति । तथाधिराजप्राप्त्यर्थं यागोऽपि वर्तत इति । अतश्च सदृशानां राज्ञां मध्ये एकस्याधिकारो वर्तते, स चाधिराज इति । तथा "उग्रं चेत्तारम् अधिराजमक्रन्" इति ऋग्वेदे (10-128-9) अधिराजप्रस्तावोऽस्ति । तथा एकराट्-पदप्रयोगोऽपि ऋग्वेदे (8-37-3) वर्तते । ऐतरेयब्राह्मणेऽपि पृथिव्यै सागरान्ताया एकराडिति श्रूयते । तथा "क्षत्रस्य राजा वरुणोऽधिराजः" इति अधिराजप्रयोगोऽपि दृश्यते ॥

स्वाराज्यतत्त्वसम्बन्धिवेदभागान् प्रदर्शयामः । स्वराट् स्वाराज्यमिति व्यवहारोऽपि मन्त्रब्राह्मणेषु बहुलमुपलभ्यते । "स्वाराज्यं गच्छति" (मै. सं. 2-5-10) । "प्रजापतेस्त्वा परमेष्ठिनः स्वाराज्येनाभिषिञ्चामि" इत्याह । स्वाराज्यमेवैनं गमयति" (तै. ब्रा. 2-6-73) इति स्वाराज्यव्यवहारः कृतः ॥

वाजपेयस्य सम्राट्सवत्वेन स्तुतिरप्यस्ति । "यो वै वाजपेयः ससम्राट्सवः" (तै-ब्रा-2-7-7) । पञ्चविंशब्राह्मणेऽपि "स्वाराज्यकामः" (21-2) । स्वाराज्यकामस्य प्रयोग-विशेष उक्तः । तथान्यत्र "स्वाराज्यो वा एष यज्ञः" (2 1) इति दृश्यते । मैत्रायणीसंहितायां राज्ञ एव परमेष्ठीति व्यवहारोऽस्ति । "परमेष्ठी राजन्यो मनुष्याणाम्" "इन्द्राय वृत्रतुरे आलभेत" इति यागं विधाय स्वाराज्यमेव गच्छतीति फलमपि श्रुतम् । तथा 'वृत्रतूरित्येतमाहुः यः स्वाराज्यं गच्छति' इति । अनेन ज्ञायते शत्रुवधानन्तरं स्वबलेनैव लब्धस्य राज्यस्य स्वाराज्यमिति व्यवहारः । तथा अन्येष्वपि मन्त्रब्राह्मणभागेषु साम्राज्य-स्वराज्यादिव्यवहारो वर्तते । 'साम्राज्यमाधिपत्यं गच्छति' (प.ब्रा-15-3) 'बृहती च्छन्दसां स्वाराज्यम् अश्नुत अश्नुवते स्वाराज्यम्' (तै.सं.5-4-6-3) (मै.सं.3-7-6) 'स एष स्वाराज्यो यज्ञः स्वाराज्यं गच्छति' (का.सं.14-5) । तैत्तिरीयब्राह्मणे—"तद्धि स्वाराज्यम्" इति त्रिवारं पठितम् । काठकसंहितायां "सम्राडसीति प्रतीची दिक्" इति मन्त्रविवरणावसरे प्रतीच्यां दिशि साम्राज्यस्यास्तित्वमुच्यते । अत्र साम्राज्यमिति तथा "स्वराडस्युदीची दिक्" इति मन्त्रविवरणावसरे तस्मादत्र स्वाराज्यम् इत्युच्यते (का.स.20-11) । तेन ज्ञायते काठकसंहिताकाले प्रतीच्यां दिशि राज्यतन्त्रतत्त्वरीत्या साम्राज्यमासीत्, उदीच्यां दिशि स्वाराज्यमासीदिति । परं तु ऐतरेयब्राह्मणे प्राच्यां दिशि राज्यतत्त्वमासीत् । प्रतीच्यां दिशि स्वाराज्यतत्त्वमासीदिति च ज्ञायते । जैमिनीयब्राह्मणे एवं श्रूयते—"स योऽन्वावैकस्य राज्यस्य त्राता द्वयोः यत्त्रयाणां लोकी वा व स तेन मन्यते । अन्ये तु सलोकी असत् । यस्तेषामेकः असत् येऽस्य लोकस्य त्रातारः अस्य सलोकस्य त्रातॄणामेको भवति । एवं वेद" (जै. ब्रा. 1-241) । अत्रैकस्यैव

राज्ञो द्वयोः त्रिषु वा राज्येषु आधिपत्यं प्रतिपाद्यते। तथान्यत्र "अथैते विराट्स्वराजौ" इति यागद्वयं विधाय तन्निरूपणावसरे कश्चनेतिहासश्च प्रतिपादितः। तत्र "सह वै विराट् यत्रान्यस्य लोकं नाभिध्यायते" इत्युच्यते। तथा "ततो वैते विराजमन्नाद्यम् अवरुध्य स्वाराज्यं लोकमगच्छन्। विराजमेवान्नाद्यमवरुध्य स्वाराज्यं लोकं गच्छति" इति च। एतत्सम्बन्धीतिहासश्चैवं दृश्यते—

"देवा वा अकामयन्त विराजमन्नाद्यमवरुन्धीयेति। विराज्यं राज्ये प्रतिष्ठामेति। य एतं विराजं यज्ञमपश्यन्। तमाहरन् तेनायजन्त। ततो वै ते विराजमन्नाद्यमवरुन्धत विराज्यमन्नाद्ये प्रत्यतिष्ठन्" इति। अनेनेतिहासेन अन्नादिसमृद्ध्या विशेषेण राजा विराट् इत्युक्तम्॥

स्वराड्विषयेऽपि अयमितिहास एवं दृश्यते—

तमु वा अकामयन्त स्वराज्यम् अन्नाद्यमवरुध्य स्वराज्यं गच्छेमेति। त एतं स्वराज्यं यज्ञमपश्यन्। तमाहरन्। तेनायजन्त। ततो वै ते स्वराजमन्नाद्यमवरुध्य स्वाराज्यं लोकमगच्छन्" इति॥

अनेनान्नाद्यावरोधेन स्वाधीनराज्यत्वम् भवतीति प्रतिपाद्यते॥

राज्यस्वाराज्यादीनां प्रस्तावो जैमिनीयब्राह्मणे अन्यत्र एवं वर्तते। "अथैषोदुम्बरी राजासन्दीम्। तस्यै बृहद्रथन्तरे सर्वौ पादौ। वैरूपवैराजे अपरौ शाक्वरैवतेनूच्यानि-ऋचः प्राचीनमातनो-यजूँषि तिरश्चीनम्। सामान्यास्तरणम्। वाकोवाक्यमतीरोका श्रीरुपबृंहणम्। तस्यै प्रजापतिश्च बृहस्पतिश्च पूर्वौ पादावधारयेताम्। सोमश्च वरुणश्चापरौ। तस्यामेतमादित्यमभ्यषिञ्चन्ते। वसवो राज्याय, रुद्रा वैराज्याय, आदित्याः स्वाराज्याय। विश्वेदेवाः साम्राज्याय, मरुतः सार्ववश्याय, साध्याश्चाप्त्याश्च पारमेष्ठ्याय, त ह तावत् कयाचन देवतया मितं यावदादित्येन, (2-25) अत्राभिषेकप्रकरण एव ऐतरेयवत् राज्यादीनां प्रस्तावोऽस्ति। "श्रीर्वै राज्यम्" 3. 26B) । तथा तत्रैवान्यत्र "तस्मै जाताय एतामासन्दीं न्यदधुः। तस्मादेनमभ्यषिञ्चन्ते। वसवो राज्याय, रुद्रा वैराज्याय, विश्वेदेवाः साम्राज्याय, मरुतः सार्ववश्याय, साध्याश्चाप्त्याश्च पारमेष्ठ्याय" (3-2-67) इति। अत्रापि अभिषेकप्रकरण एव प्रस्तावोऽस्ति। "एतद्वैराज्यं यद्विराट् अथैतत्स्वाराज्यं यदनुष्टुप् विराजेव कनीयान् राज्यं गच्छति। अनुष्टुपाज्यायां स्वाराज्यं लोकम्" इति। अत्र राज्यस्वाराज्ययोर्भेदो मुखान्तरेण प्रतिपादितः। राज्यस्य कनीयस्त्वं स्वाराज्यस्य ज्यायस्त्वं च प्रतिपाद्यते। अन्यत्रापि—"स यथा नानाग्रामौ मित्राणि व्यतिषिज्य अभयं आस्ताम्" इति कालविशेषे बहूनां ग्रामाणां व्यतिषङ्गः प्रतिपादितः। ऋग्वेदे दशराजयुद्धवर्णनं सप्तमे मण्डले कृतम्। तत्र

च सुदासेन सह अन्ये राजानो जना वा युद्धं कृतवन्त इति प्रतिपाद्यते । जैमिनीयब्राह्मणे एतत्सम्बन्धिविषयः प्रकाशितः । जैमिनीयब्राह्मणरीत्या सुदासेन युद्धार्थं तात्कालिकतया दश राजानः सङ्ग्रामं प्राप्ता इति । राजसूयमन्त्रे 'क्षत्राणां क्षत्रपतिरसि' इति मन्त्रभागो वर्तते (तै. सं. 1-8-14-2) (वाज. सं. 10-7) । तद्व्याख्यानानुसारेण शतपथब्राह्मणे "राज्ञामधिराज एधि इति वा वैतदाह" (5-4-2-2) इत्युच्यते । अनेन क्षत्रपतित्वम् अधिराजतत्त्वेन सममिति निश्चीयते । तथा पञ्चविंशब्राह्मणे 'एतेन चित्ररथं कापेया अयाजयन् तमेकाकिनम् अन्नाद्यस्याध्यक्षमकुर्वन् । तस्माच्चित्ररथानाम् एकः क्षत्रपतिर्जायते । द्वितीयः अनुचरः" (20-12-5) इति । अनेन राजकुटुम्बेषु एको राजा भवति । अन्योऽनुचरत्वेन वर्तत इति । तथा अभिषेकप्रकरणे राजपितरमिति अभ्युत्क्रोशः क्रियते । राजपितरमित्यनेन परम्पराप्राप्तराजप्रधानराज्यतन्त्रस्यापि अवकाशोऽस्ति इति ज्ञाप्यते । तथा तस्य तस्य राज्ञः प्रजाभिवरणम् अप्युच्यते ऐतरेयब्राह्मणे (1-14) । ऐतरेयब्राह्मणे अभिषेकप्रकरणे एवं पठ्यते—"भूरिति इच्छेत् इममेव प्रत्यन्नम् अद्यादिति । अथैच्छेत् द्विपुरुषं भूर्भुव इति । अथैच्छेत् त्रिपुरुषं वा अप्रतिमं वा भूर्भुवस्स्व" (8-7) इति । अनेन द्विपुरुषत्रिपुरुषराज्यतत्त्वमपि अस्तीति निश्चीयते । मैत्रायणीसंहितायाम् आधिपत्यमिति कश्चन व्यवहारोऽस्ति । अधिपतिरेव समानानां भवति इति । पञ्चविंशब्राह्मणे (15-3-35) आधिपत्यप्राप्त्यर्थं कल्पविशेषश्च प्रतिपादितः । (पञ्च.ब्रा 15-3-35) "पारमेष्ठ्यं माहाराज्यम् आधिपत्यं स्वावश्यं अतिष्ठः" इत्यादिव्यवहाराणां राज्यतन्त्ररीत्या न नूतनाभिप्रायसूचकत्वं दृश्यते । ऐतरेयब्राह्मणे विशेषाप्रदर्शनात् "परमेष्ठी राजन्यो मनुष्याणाम्" इति ब्राह्मणे दर्शनात् परमेष्ठिशब्दो नूतनाशयावेदक इति निश्चीयते । किं च पूर्वं राजतत्त्वोत्पत्तिप्रतिपादकतयोदाहृते तैत्तिरीयब्राह्मणे "अयं वा इदं परमोऽभूत्" इति । "तत्परमेष्ठिनः परमेष्ठित्वम्" । इति दृश्यते । तेन राज्ञ एव प्रजासूत्कृष्टस्थानभाक्त्वात् तस्य परमेष्ठिशब्दवाच्यत्वमपि भवतीति निश्चिनुमः ॥

"वेदकालीनजननन्त्रस्थानानि"

अग्निहोत्रं रामानुजताताचार्येण कृतं

सम्पूर्णम्

Bharatiya Vidya Bhawan's Sri Sankaracharya Sanskrit Mahavidyalaya
588

KENDRIYA SANSKRIT VIDYAPEETHA PUBLICATIONS

1. Sāmavidhana Brāhmaṇa with the commentaries of Sayana and Bharatasvāmin edited by Dr. B. R. Sharma with a Foreword by Dr. V. Raghavan ... 15 00
2. Devatādhyāya Brāhmana with the commentary of Sayana
3. Samhitopaniṣad Brāhmaṇa with the commentary of Sayana and Dvijarāja Bhaṭṭa
4. Vamsa Brāhmaṇa with the commentary of Sayana—all three in one volume edited by Dr. B. R. Sharma } 12 00
5. Malaya Māruta, a collection of minor works in Sanskrit, edited by Dr. V. Raghavan ... 5 00
6. Jaiminiya Arṣeya Brāhmaṇa
7. Jaiminlya Upaniṣad Brāhmaṇa—both in one volume, edited by Dr. B. R. Sharma } 24 00
8. Sāmavedārseya Dipa of Bhaṭṭa Bhāskara Adhvarindra, edited by Dr. B. R. Sharma ... 13 50
9. Arṣeya Brāhmaṇa with the commentary of Sayana, edited by Dr. B. R. Sharma ... 18 50
10. Ṣaḍvimsa Brāhmaṇa with the commentary of Sayana, edited by Dr. B.R. Shaıma ... 20 00
11. Bhāratiyam Vṛttam—India's Past by A. A. Macdonell translated into Sanskrit by V. S. Venkata Raghavacharya ... 19 00
12. Sriprasna Samhitā—edited by Smt. Sita Padmanabhan ... 36 00
13. Vedakālina Janatantra Sthānāni by Sri Agnihotram Ramanuja Tatacharya ...

FORTHCOMING PUBLICATIONS

14. Pancavidhasutra with commentary, edited by Dr. B.R. Sharma
15. Mātrālakṣana with commentary, edited by Dr. B. R. Sharma ...
16. Pratihārasutra with the commentary of Varadarāja, edited by Dr. B.R. Sharma ...
17. Nyāyakalpalatikā—edited by Sri V. Subrahmanya Sastri ...
18. Visvāmitra Sāmhitā—edited by U. Shankar Bhatt ...
19. Malayamāruta II—edited by Dr. V. Raghavan ...
20. The System of Kṛt Accentuation in Pāṇini and the Veda, by Dr. M. D. Balasubramanyam ...
21. Nāradiya Samhita, edited by R. P. Chaudhury ...
22. Viṣvaksena Samhita, edited by Lakshminarasimha Bhatta ...
23. Pāncarātra—A study, by Dr. P. P. Apte ...